शास्त्रसंदेश-२८

# स्तोत्रसंदेशमाला

## बहुकर्तृकृतानेकस्तोत्रसमुच्चयः

३



मुनि विनयरक्षितविजयजी म.सा.

शास्त्रसंदेश-२१

# स्तोत्र संदेशमाला-३

बहुकर्तृकृतानेकस्तोत्रसमुच्चयः

: સંપાદક - સંકલન :

પ.પૂ.આચાર્ય ભ.શ્રીમદ્
વિજય રામચન્દ્રસૂરીશ્વરજીના સામ્રાજયવર્તી
પૂ.આ.શ્રી બોધિરત્નસૂરીશ્વરજી મ.સા.ના
શિષ્યરત્ન
પૂ.મુ.શ્રી વિનયરક્ષિતવિજયજી મ.સા.

પ્રકાશક-પ્રાપ્તિ સ્થાન

शास्त्रसंदेश

C/o અસલ, ૩, મણિભદ્ર એપાર્ટમેન્ટ,
આરાધના ભવન માર્ગ, સુભાષચોક, ગોપીપુરા-સુરત-૧

# સ્તોત્ર સંદેશમાલા-૩

**बहुकर्तृकृतानेकस्तोत्रसमुच्चयः**

આવૃત્તિ : પ્રથમ, વિ.સં. ૨૦૭૮, મૌન એકાદશી,
તા. ૧૪-૧૨-૨૦૨૧

પેજ : ૧૦ + ૨૫૨ + ૧૦

સ્તોત્ર : ૧૪૩ શ્લોક : ૧૯૩૨

: **પ્રમાર્જના** :

પૂ.આ.શ્રી **દીવ્યકીર્તિસૂરિશ્વરજી** મ.સા.

પૂ.પં.શ્રી **શ્રુતતિલકવિજયજીગણી**

પૂ.મુ.શ્રી **હિતરક્ષિતવિજયજી** મ.સા.

: **છંદ-સંયોજના** :

પૂ.સા.શ્રી **ભવ્યરત્નાશ્રીજી** મ.સા.ના શિષ્યા

પૂ.સા. શ્રી **પુણ્યરત્નાશ્રીજી** મ.સા.

ટાઈપ સેટીંગ : શ્રી સાંઈ કોમ્પ્યુટર્સ-નિતિનભાઈ, અમદાવાદ.

મુદ્રક : બાલારામ ઓફસેટ-અમદાવાદ.

વિશેષ નોંધ : સ્તોત્ર સંદેશમાલાના ૨૦ ભાગનું સંપૂર્ણ પ્રકાશન જ્ઞાનદ્રવ્યના વ્યયથી કરવામાં આવેલ છે. ગૃહસ્થવર્ગે મૂલ્ય આપી ઉપયોગ કરવો.

આભાર...! અનુમોદનીય...! અનુકરણીય...!

## સ્તોત્ર સંદેશમાલાના
## ભાગ ૧-૨-૩ ના દ્રવ્ય લાભાર્થી

શ્રી સિદ્ધગિરિરાજની છત્રછાયામાં
વિ.સં. ૨૦૬૭ની સાલે જૈનશાસનશિરતાજ,
દીક્ષાયુગપ્રવર્તક, તપાગચ્છાધિરાજ, પૂજ્ય આચાર્યદેવ
શ્રીમદ્ **વિજય રામચંદ્રસૂરીશ્વરજી મહારાજાના** શિષ્યરત્ન
ગુરુગચ્છવિશ્વાસધામ, વર્ધમાનતપોનિધિ,
**પૂ. આ. શ્રી વિજય ગુણયશસૂરીશ્વરજી** મહારાજાના શિષ્યરત્ન
પ્રવચનપ્રભાવક
પૂ. આ. શ્રી **વિજય કીર્તિયશસૂરીશ્વરજી મહારાજાની** નિશ્રામાં
કુળદીપિકા **પૂ. સા. શ્રી રાજનંદિતાશ્રીજી** મ. સા. ના સદુપદેશથી
ધાનેરા નિવાસી

**માતુશ્રી ચંપાબેન જયંતિલાલ દાનસુંગભાઈ અજબાણી**
**ધાનેરા ડાયમંડ પરિવારે**

૬૦ શ્રમણો, ૩૦૦ શ્રમણીઓ, ૧૭૦૦ જેટલા ચાતુર્માસ આરાધકો, ૧૦૬૦ જેટલા ઉપધાન તપના આરાધકો અને તેમાં ૫૮૫ જેટલા માળ આરાધકો આદિથી સભર ઐતિહાસિક ચાતુર્માસ તથા ઉપાધનતપનું આયોજન કર્યું હતું. એ દરમ્યાન થયેલી જ્ઞાનખાતાની વિશિષ્ટ ઉપજમાંથી સ્તોત્ર સંદેશમાલાના ભાગ-૧થી ૩ ના પ્રકાશનનો લાભ લેવામાં આવ્યો છે.

**અમો એ સુકૃતની ભાવપૂર્વક અનુમોદના કરીએ છીએ.**

**શાસ્ત્રસંદેશ, સુરત**

**સ્તોત્ર સંદેશમાલાના ૨૦ ભાગમાં નીચે જણાવેલ પુસ્તકોનો સંપૂર્ણ સમાવેશ કરવામાં આવેલ છે. તેના પૂર્વ પ્રકાશકોના અમો આભારી છીએ.**

(૧) જૈન સ્તોત્ર સંચય-૧, ૨, ૩ - આ. માણિક્યસાગરસૂરિ
(૨) જૈન સ્તોત્ર સંચય-૪, ૫ - મુનિ લાભસાગરગણિ
(૩) જૈન સ્તોત્રાવલી - મુનિ લાભસાગરગણિ
(૪) જૈન સ્તોત્ર સંગ્રહ ભાગ-૧,૨ - મુનિ ચતુરવિજયજી
(૫) સ્તોત્ર સમુચ્ચય-મુનિ ચતુરવિજયજી
(૬) શ્રી જૈન સ્તોત્ર સંગ્રહ ભાગ-૧,૨ - યશોવિજય જૈન ગ્રંથમાળા, બનારસ
(૭) શ્રી સ્તોત્ર રત્નાકર ભાગ ૧,૨ - યશોવિજય જૈન સંસ્કૃત પાઠશાળા, મહેસાણા
(૮) સ્વાધ્યાય દોહન - આ. કનકચન્દ્રસૂરિ
(૯) શ્રી નેમિનાથ સ્તોત્ર સંગ્રહ-મુનિ તીર્થભદ્ર વિ.ગણિ
(૧૦) સ્તોત્ર સંગ્રહ - મુનિ વૈરાગ્યરતિ વિ.ગણિ.
(૧૧) બૃહદ્-નિર્ગ્રન્થ-સ્તુતિ મણિમંજુષા-મધુસૂદન ઢાંકી - જિતેન્દ્ર શાહ
(૧૨) સંસ્કૃત પ્રાચીન સ્તવન સંદોહ-મુનિ વિશાલવિજયજી
(૧૩) વિવિધ તીર્થકલ્પ - મુનિ જિનવિજયજી
(૧૪) શ્રી જૈનસ્તોત્રકોશ - મુનિ ચંદ્રોદયવિજયજી સૂર્યોદયવિજયજી
(૧૪) શાસન પ્રભાવક આ. જિનપ્રભસૂરિ ઔર ઉનકા સાહિત્ય
(૧૫) અનુસંધાન ભાગ ૧ થી ૮૫ - આ. શીલચન્દ્રસૂરિ

*(દરેક ભાગમાં આવતા પ્રાચીન અપ્રકાશિત સ્તોત્રો)*

**સ્તોત્ર સંદેશમાલાના આ ૨૦ ભાગમાં નીચે જણાવેલ પુસ્તકોમાંથી અમુક સ્તોત્રો લીધેલા છે. તેના પૂર્વ પ્રકાશકોના અમો આભારી છીએ.**

(૧) વિવિધ કલ્પ સંગ્રહ
(૨) નમસ્કાર સ્વાધ્યાય ભાગ ૧,૨, ૩
(૩) સરસ્વતી પ્રાસાદ
(૪) કાવ્ય સંગ્રહ ભાગ ૧,૨
(૫) વર્ધમાન વિદ્યાકલ્પ
(૬) વિધિ માર્ગપ્રપા
(૭) શ્રી વલ્લભીય લઘુકૃતિ સમુચ્ચય
(૮) સમયસુન્દર કૃતિ કુસુમાંજલી
(૯) ચતુર્વિંશતિ જિનેન્દ્ર સ્તવનાવલિ
(૧૦) શ્રી જિનવલ્લભસૂરિ ગ્રંથાવલિ
(૧૧) યુગાદિવંદના
(૧૨) શ્રી અજીતનાથ વંદનાવલી
(૧૩) શ્રી સંભવનાથ વંદનાવલી
(૧૪) શ્રી પ્રકરણ રત્નાકર ભાગ-૨
(૧૫) મહાકવિ શ્રી જયશેખરસૂરિ ભાગ-૨

(૧૬) શ્રી પાર્શ્વનાથ ઉપાસના

(૧૭) મહાપ્રભાવિક નવસ્મરણ

(૧૮) ભૈરવ પદ્માવતી કલ્પ

(૧૯) તુલસીપ્રજ્ઞા (પાર્શ્વ સ્તુતિ સંગ્રહ)

(૨૦) ધર્મવર્દ્ધન ગ્રન્થાવલી

(૨૧) બૃહત્ હ્રીંકારકલ્પ વિવરણ તથા વર્ધમાન વિદ્યા કલ્પ

(૨૨) શ્રી ઋષભ-વીરેશાદિ ચતુર્વિંશતિ જિન સ્તવનાવલી

(૨૩) મન્ત્ર કલ્પ સંગ્રહ

(૨૪) શ્રી જિનેન્દ્ર નમસ્કારાદિ સંગ્રહ

(૨૫) ગિરનાર ગ્રંથોની ગોદમાં

(૨૬) સૂરિમન્ત્ર સમુચ્ચય ભાગ-૧/૨

(૨૭) શ્રી જીરાવલા સ્તોત્રાદિ સંગ્રહ

(૨૮) સમ્બોધિ (ઈ.સ. ૨૦૧૪ સુધીના)

(૨૯) નિશ્રેયસમ્ ભાગ ૧ થી ૧૧

(૩૦) શ્રુતસાગર - કોબા

---

*આ સિવાયના પણ અનેક પુસ્તકોમાંથી સ્તોત્રો એકત્રિત કરવામાં આવેલ છે તે સર્વેના પૂર્વ પ્રકાશકોના અમો આભારી છીએ.*

---

સ્તોત્ર સંદેશમાલાના આ ૨૦ ભાગમાં એકત્રિત કરેલ સ્તોત્રોના પુસ્તકો માટે નીચે જણાવેલ જ્ઞાનભંડારોનો વિશેષ સહકાર મળેલ છે. તેના ટ્રસ્ટીગણ અને કાર્યકરોના અમો આભારી છીએ.

(૧) વિજયરામચન્દ્રસૂરીશ્વરજી આરાધના ભવન
ગોપીપુરા-સુરત

(૨) વિજય દાનસૂરીશ્વરજી જૈન જ્ઞાનભંડાર
ચંદનબાળા- મુંબઈ-૭

(૩) શ્રી રત્નત્રયી આરાધના ભવન - પાલડી - અમદાવાદ

(૪) શ્રી કૈલાસસાગરસૂરિ જ્ઞાનમંદિર - કોબા - અમદાવાદ

(૫) શ્રી ગીતાર્થ ગંગા- પાલડી - અમદાવાદ

(૬) શ્રી નેમિ-નંદન શતાબ્દિ ટ્રસ્ટ - પાલડી-અમદાવાદ

(૭) શ્રી શ્રુતઆનંદ ટ્રસ્ટ -પાલડી - અમદાવાદ

(૮) આ.શ્રી ૐકારસૂરિ જ્ઞાનમંદિર - સુરત

(૯) શ્રી હરિભદ્રસૂરિ શાસ્ત્રસંગ્રહ - સુરત

# પ્રકાશકીય...!

પૂર્વના પુણ્યવંતા મહાપુરુષોએ પ્રરૂપેલા પ્રકરણોની એક ગ્રંથમાળા એટલે શાસ્ત્રસંદેશમાલા, આજથી ૧૬ વર્ષ પૂર્વે ૪૦૬ પ્રકરણો ગ્રંથો ૨૦ ભાગમાં પ્રકાશિત કરેલ તે પછી ૧૧ વર્ષે પૂર્વે ૧૩૭ પ્રકરણ ગ્રંથો ચાર ભાગમાં તથા ૬૨૬ ગ્રંથોના ૧,૭૭,૦૦૦ શ્લોકો સમાવતા અકારાદિના ચાર ભાગ અને સંવેગરંગશાળા નામનો મહાનગ્રંથ પ્રકાશિત કરેલ અને આજે ૮૦ પ્રકરણ ગ્રંથો બે ભાગમાં પ્રકાશિત થઈ રહ્યા છે. એટલે આજ સુધીમાં ૬૨૩ પ્રકરણ ગ્રંથોના ટોટલ ૨૬ ભાગ અને અકારાદિ ચાર ભાગમાં સમાવિષ્ટ કરી પ્રકાશન કરવાનો લાભ અમોને મળેલ છે.

પ્રકરણોની સાથે સાથે પૂજ્યશ્રી સ્તોત્રો-સ્તુતિઓ પણ સંગ્રહિત કરી રહ્યા હતા તે પણ આજે ૨૨૦૦ થી અધિક સ્તોત્રો અને ૨૦૦૦ થી અધિક સ્તુતિઓના ૨૦ ભાગ અમો પ્રકાશિત કરી રહ્યા છીએ.

જૈનશાસનમાં આજ સુધીમાં પ્રકાશિત થઈ બહાર પડેલ પ્રકરણ ગ્રંથો અને સ્તોત્રો-સ્તુતિઓ જે અલગ અલગ હતા તે બધા જ આજે હવે એક સાથે મળી રહેશે. આ

દ્વારા શ્રી ચતુર્વિધ સંઘની સેવાનો લાભ અમોને મળેલ છે તે માટે અમો ધન્યતા અનુભવીએ છીએ.

સંખ્યાની દૃષ્ટિએ અધધ... થઈ જાય તેવા ૬૨૩ પ્રકરણ ગ્રંથો ૬૨૬ + ૮૦ ગ્રંથોની અકારાદિ, ૨૨૦૦ થી અધિક સ્તોત્રો અને ૨૦૦૦ થી અધિક સ્તુતિઓ પૂજ્યશ્રીએ સંકલન-સંપાદન કરી આપ્યા તે માટે અમો તેઓશ્રીના આભારી છીએ.

પૂર્વની જેમ આ ૨૦ + ૨ પુસ્તકો માટે પણ અલગ-અલગ સંઘોએ પોતાના જ્ઞાનદ્રવ્યમાંથી લાભ લીધેલ છે તે માટે પણ અમો તે તે સંઘ + ટ્રસ્ટીઓ + કાર્યકરોના પણ આભારી છીએ.

ટાઈપ સેટીંગ શ્રી સાંઈ કોમ્પ્યુટર્સવાળા નિતિનભાઈ તથા પ્રીન્ટીંગ બાઈન્ડીંગનું કાર્ય બાલારામ ઓફસેટવાળા રીતેશભાઈએ વિશેષ ખંત-કાળજીપૂર્વક કરી આપેલ છે.

**-શાસ્ત્રસંદેશ**

# अनुक्रमणिका


| क्र.नं. | स्तोत्र | कर्ता | पेज नं. |
|---|---|---|---|
| १ | अपह्नुतिद्वात्रिंशिका | पू.आ.श्री रामचन्द्रसूरि | १ |
| २ | अर्थान्तरन्यासद्वात्रिंशिका | पू.आ.श्री रामचन्द्रसूरि | ७ |
| ३ | व्यतिरेकद्वात्रिंशिका | पू.आ.श्री रामचन्द्रसूरि | १० |
| ४ | भक्त्यतिशयद्वात्रिंशिका | पू.आ.श्री रामचन्द्रसूरि | १४ |
| ५ | प्रसादद्वात्रिंशिका | पू.आ.श्री रामचन्द्रसूरि | १७ |
| ६ | साधारणजिनस्तवः (१ से १७ षोडशिका) | पू.आ.श्री रामचन्द्रसूरि | २४थी५२ |
| ७ | युष्मच्छब्दनवस्तवी | पू.आ.श्री सोमसुन्दरसूरि | ५३थी६१ |
| ८ | अथास्मच्छब्दरूपाङ्कितानवस्तवी | पू.आ.श्री सोमसुन्दरसूरि | ६२थी७१ |
| ९ | त्रिदश तरङ्गिणी | पू.आ.श्री मुनिसुन्दरसूरि | ७२थी९५ |
| १० | चैत्यषट्कबन्धचित्ररूप-जिनस्तवावलिः | पू.आ.श्री मुनिसुन्दरसूरि | ९६थी१४४ |
| ११ | स्तोत्रावली (प्रथम चतुर्विंशतिका) | पू.पं.श्री नेमिरत्नगणी | १४५थी१७३ |
| १२ | स्तोत्रावली (द्वितीय चतुर्विंशतिका) | पू.पं.श्री नेमिरत्नगणी | १७४थी२०५ |
| १३ | स्तोत्रावली (तृतिय चतुर्विंशतिका) | पू.पं.श्री नेमिरत्नगणी | २०५थी२३८ |
| १४ | स्तोत्रावली (चतुर्थ चतुर्विंशतिका) | पू.पं.श्री नेमिरत्नगणी | २३८थी२५२ |

पू.आ. श्री रामचन्द्रसूरिविरचिता

श्रीपार्श्वनाथस्य

# १. ॥ अपह्नुतिद्वात्रिंशिका ॥

(वंशस्थ)

भवद्गुणानां स्तुतये जगद्गुरो !
कृतादरः सोऽयमपह्नुतौ जनः ।
अशस्तमप्याश्रितकर्म मन्यते
यतः प्रसन्नः शुभमेव सुप्रभः ॥ १

सितं न ते सद्म हिरण्यमाचले
चकास्त्यदः पन्नगसेव्य ! किन्त्वसौ ।
फणीश्वरः क्ष्माभरभङ्गुरस्थितिस्त-
वाश्रिते वो[वा ?]पिकया रसातलात् ॥ २

जिनेश ! नेदं सदनं तवेन्दव-
प्रभावभासि प्रतिभाति किं पुनः ।
वृषाह्वसिंहस्य विपद्द्विपावली-
विपाटनस्फाटिकपञ्जरं परम् ॥ ३

इदं न ते नीलतनुच्छविच्छटा-
कदम्बकं किन्तु फणीन्द्रकेतन ! ।
त्वया त्रिलोकीविपदां विपत्कृते
तरङ्गितं कालभुजङ्गमण्डलम् ॥ ४

अदः समुन्मीलितनीलमङ्गतः
प्रभोर्मिजालं त्रिजगत्पते ! न ते ।
अपि त्वसौ स्फूर्त्तिमियर्ति चापल-
च्छिदे श्रियामायसशृङ्खलावलिः ॥ ५

सरोजसौन्दर्यजुषोस्तवोन्मिषत्-
यसौ मुनीश ! क्रमयोर्न शोणिमा ।
प्रसह्य रागः स बहिष्कृतो हृद-
स्त्वदङ्घ्रिसेवामपि तु प्रपन्नवान् ॥ ६

निरायतात्मा न तवोपरि स्फुरत्-
ययं भुजङ्गाधिपनि (ति)र्गुणाधिकः ।
अपि त्वसौ रज्जुरजीर्णरागया
स्वधाम नेतुं मुमुचे शिवश्रिया ॥ ७

क्षमाभृतां धुर्य ! तवेदमुद्ययौ
तदा न शोणाहिफणामणीमहः ।
अभूदयं किन्त्वरुणोदयः पुरा
स्फुरिष्यतो ब्रह्ममयांशुमालिनः ॥ ८

तवायमाभाति भुजङ्गपुङ्गवः
प्रशान्तमूर्द्धन्य ! न मूर्ध्नि किन्त्वियम् ।
तपोऽधिकं त्वां भुवनाभयाचलं
विचिन्त्य भेजे कमठाज्जटावली ॥ ९

अशोषिताशेषरुजस्तव प्रभो !
न धर्मचक्रं पुरतः स्फुरत्यदः ।
स्वकुष्ठनिष्ठापननिष्ठुराशया
समाश्रितः किन्त्वयमीश्वरस्त्विषाम् ॥ १०

अयं जिनानामधिराज ! राजते
न ते जितारिव्रज ! वज्रभृद्ध्वजः ।

असौ स्फुटं किन्त्वतिवृद्धिविश्वग-
त्वदीयकीर्त्तेरवलम्बयष्टिका ॥ ११

सुवर्णशैलः किल नायमत्र ते
जिनेन्द्र ! नैतद् भवनं च निर्मलम् ।
असौ कुमारक्षितिभृद्यशोङ्कुरः
शुभैक कन्दाद्धु(दु)दगादपि त्वतः ॥ १२

इयं न ते पादनखोज्ज्वलद्युति-
र्विनम्रभालेष्वभिषङ्गमङ्गति ।
तदाश्रया पुण्यलिपेरपि त्वदः
प्रमार्ज्जनोर्ज्जस्वलमम्बु वल्गति ॥ १३

तव प्रभाचक्रमुदञ्चिमेचकं
चकास्ति नैतन्मणिमात्रपन्नगम् ।
तनुं दधानः क्षणदामयि त्विदं
विभाति सप्तर्षिविभूषितं नभः ॥ १४

स एव रोचिष्णुकडारकेसर-
च्छटाकटप्रा तप (तव) मौलिपृष्ठतः ।
नृसिंह ! नैदं तु महःकदम्बकं
विडम्बयद् बिम्बमशीतरोचिषः ॥ १५

इदं न फुल्लत्फणभृत्फणामणी-
महस्तवोच्चैः शमिनामधीश्वर ! ।
समुल्लसद्ध्यानसुधाभयात्
त्वहेर्विषार्चिरेतन्मिषतः पलायितम् ॥ १६

इदं तव ज्योतिरुदेति विष्टप-
त्रयोदरव्यापि जिनेश ! न त्वदः ।
अहीन्द्ररत्नाक्षिकरस्फुरन्नखै-
रुपर्यधोमध्यविकस्वरं महः ॥ १७

न रक्तकङ्केल्लिरसौ चकास्ति ते
निषेवते त्वामपि नृत्वगुप्तये ।
अशेषषड्जीवनिकायतायिनं
मुनीश ! रागः स वनस्पतीभवन् ॥ १८

जिन ! द्विजानां तव देशनावना-
वमी न कान्तिस्तबकाश्चकासति ।
विमुक्तिकान्ताभरणाय किन्त्वयं
कृपापयः सागरमौक्तिकोत्करः ॥ १९

न मूर्ध्नि भूषा प्रणयी फणीश्वरं
क्षमाभृतामीश ! बिभर्षि किं पुनः ।
अमुं दधानेन कलापिना त्वया
शिवं विरोधप्रशमा प्रकाश्यते ॥ २०

अमी न नम्रावनिशासिनां शिरः-
स्रजः पुरस्ते पतयालवोऽलयः ।
अपि त्वसौ पादनखांशुताडिता
गलत्यहो पापमलस्य मालिका ॥ २१

इदं न ते नीलतनूरुचामुप-
र्युदञ्चि दन्तोज्ज्वलरोचिरासदः ।

जगत्त्रयीमङ्गलवल्लिकाननं
चकास्त्यदः किन्तु लसत्प्रसूनकम् ॥ २२

इयं न ताम्राङ्घ्रिनखांशुमञ्जरी
जिनेश ! लेश्यापि तु भाति तैजसी ।
विनम्रदुष्कर्मदिधक्षया तव
प्रसन्नपद्भ्यां झटिति स्फुटीकृता ॥ २३

इदं न मौलौ धरणोरगेश्वर-
स्फुरत्फणालीफलकं जगत्पते ! ।
तवापि तु ध्यानसुधाम्बुपायिनः
करातपत्रं भुवनश्रिया धृतम् ॥ २४

अयं न गाङ्गेयगिरिस्त्वमप्यसौ
न चेह नीलीदलसोदरद्युतिः ।
अदस्त्रिलोकाभरणैकपङ्कजं
हिरण्मयं किन्तु सनीलषट्पदम् ॥ २५

नमस्यतां भालतलेषु नैष ते
जपासखः पादनखत्विषां चयः ।
पदं ददत्याः सुकृतश्रियस्त्विदं
विराजते यावकरागवल्गितम् ॥ २६

अयं न नीलोपलशेखरायितं
त्वदीयमूर्त्तिस्तपनीयभूधरः ।
जगत्सु कल्याणनिपः स्फुरत्यपि
त्वसौ वतंसार्पितनीलपल्लवः ॥ २७

इयं न ते पादनखांशुमण्डली
सतां ललाटाङ्गणकुङ्कुमच्छटा ।
उदेष्यतः पुण्यरवेरपि त्वसा-
वबन्ध्यसन्ध्याभ्रकदम्बडम्बरः ॥ २८

फणीन्द्ररत्नाञ्चितमेचकद्युता-
मिदं न ते वृन्दमुदेति देहतः ।
नभःकृतावासमपि त्वदस्तडित्वतां
कदम्बं कमठाम्बुभृज्जयात् ॥ २९

यमीष्टसिद्धेर्गृहमिन्द्रनीलजं
न ते विनीलाङ्गरुचामयं चयः ।
इदं त्वया किन्तु वियन्नखच्छवि-
च्छलात् स्वतेजःप्रसराय कल्पितम् ॥ ३०

विभाति भोगीन्द्रफणामणिप्रभा
क्षमाभृतामीश ! न ते शिरस्यसौ ।
अपि त्वयं सिद्धिवधूविभूषणो-
पयोगभूर्गैरिकधातुसञ्चयम् ॥ ३१

गगनपुलिनप्रेङ्खज्ज्योतिर्नखोत्करतारका
तव तनुरियं श्यामा वामातनूद्भव ! भासते ।
शुचिरदरुचिर्नैषा व्याख्याविधाविह केवला-
ऽभिनवशशिनः सञ्चक्राणां मुदेऽपि तु कौमुदी ॥(हरिणी) ३२

पू.आ.श्री रामचन्द्रसूरिविरचिता

॥ श्रीपार्श्वनाथस्य ॥

## २. ॥ अर्थान्तरन्यासद्वात्रिंशिका ॥

धर्मार्थकामात्मकमीश ! ते गिरा निर्बाधमर्थत्रितयं प्रसाधयन् ।
अर्थान्तरन्यासविधिं समीहते
सोऽयं जनस्तावकभूमिकातिथिः ॥ (इन्द्रवंशा) १

(रथोद्धता)

संस्तुतौ तव जिनेश ! नेशते तेऽपि वन्ध्यधिषणाः पुरन्दराः ।
तत्र सादरमतिस्तदप्यहं कोऽपि वा स्खलति नो मनोरथः ॥२

अश्वसेनतनुभूः स भूयते यः स्वयं फणिफणोष्णवारणम् ।
बिभ्रदन्तमनयज्जगत्त्रयीतापमद्भुतगुणा हि सज्जनाः ॥ ३

येन काञ्चनगिरौ विनिर्ममे शासनोन्नतिवधूकरग्रहः ।
युक्तमेतदथवा कुमारतां बिभ्रतां खलु भुजङ्गसङ्गिनाम् ॥ ४

रक्षितो विषधरः कृपालुना येन तापसहुतासविह्वलः ।
आपदं गतवति द्विजिह्वकेऽप्युत्तमाः स्युरुपकारतत्पराः ॥ ५

यत्प्रसादमुदितस्तदा फणी प्राप नागनगराधिराजताम् ।
उत्तमेषु नियमेन रागिणां सम्पदः करतले गतापदः ॥ ६

यश्चकार करुणाचणं मनो दुर्गतिं स कमठस्तदप्यगात् ।
सज्जनेषु सहनेष्वपि ध्रुवं दुष्कृतेन पतयालवः खलाः ॥ ७

यो वितृष्णहृदयः प्रकाशयन् पीतशान्तरससुस्थतां स्वयम् ।
देहिनां भववनभ्रमक्लमं चिक्षिपे चरितमद्भुतं सताम् ॥ ८

येन वाञ्छितफलैः समन्ततो दर्शनान्तरजुषोऽपि योजिताः ।
अत्युदारचरितोज्ज्वलात्मनां नास्ति वा स्वपरयोरिहान्तरम् ॥९

येन तैः स्वचरितैरलित्विषा सौरभं किमपि हेमभूभृतः ।
ख्याप्यते प्रकटमेव किन्तु तद्
यन्न शक्यमिह वा कलावताम् ॥ १०

यः कषायकलुषाभिषङ्गिनां क्षालयन् गलितरागसङ्गतिः ।
मुक्तिरक्तहृदयश्चिरं बभौ को नु वेत्ति चरितं महात्मनाम् ? ॥११

तत्त्वपावन ! मुनीश ! दर्शनाद्दन्तिजन्मनि मनस्यबोधि याः ।
सङ्गमाद्धि महतां महात्मनां
चित्कला कलति किं कुतूहलम् ॥ १२

रागिणां किल रसायनं तनूद्वर्त्तनं तदपि यस्य जायते ।
सर्वमेव जगतां हिताय वा कल्पते परमसिद्धिशालिनाम् ॥१३

याञ्चया भवतु सन्तनोति यश्चित्त एव नहि तं समीहितम् ।
लाघवाय यदमुष्य लङ्घनं कोऽपि हन्त महतां महाग्रहः ? ॥१४

मौलिमण्डलविलासमण्डनं दर्शयन् शति(त)फणीशमुत्फणम् ।
सन्तनोत्यहिभयज्वरक्षयं चित्रमेव चरितं महात्मनाम् ॥ १५

वर्त्तमानमपि भूतभावि वा दूरवर्त्त्यपि समीपवर्त्ति वा ।
योऽवलोकयति विश्ववल्गितं कापि दृष्टिरपरैव योगिनाम् ॥१६

एक एव जगतां मनस्सु यः कृष्णमूर्त्तिरवदातपुण्यभूः ।
भोगिकेतुभिरगम्यविग्रहो योगिनो हि विपरीतवृत्तयः ॥ १७

यः स्वयं दधदनश्वरात्मतामिष्टसिद्धिघटनामिषुः सताम् ।
अध्युवास कनकाद्रिचूलिकां शैलवासरतयो हि योगिनः ॥१८

नेत्रयोः प्रणयितामुपेत्य यः सज्जकज्जलसगोत्रगात्रकः ।
दृष्टिमाशु तनुते निरञ्जनां सृष्टिरेव हि नवा महात्मनाम् ॥१९

यस्य न स्खलति तत् क्वचिन्महः स्फूर्जितं नृपशतैर्नतात्मनः।
सौजसः स्फुटमधृष्यतेजसः स्युर्यतः शिरसि दुर्गशालिनः ॥२०

बिभ्रता भृशमताड्यजीवतां येन धर्मकलयात्र दुष्कलौ ।
आन्तरारिविजयः कृतः सतां चातुरी जयति काचिदद्भुता ॥२१

निर्व्यपेक्षहृदयो दयानिधिः कल्पयत्युपकृतिं जनेषु यः ।
कारणेन किल योपकारिता सा हि नूनमथवा स्वविक्रयः ॥२२

आग्रहो जनयितुं प्रभावतां यस्य काञ्चन कलामुपेयुषः ।
इन्दुसुन्दरयशःफलेग्रहिर्निर्वृतिं दिशति वा स्थितिः सताम् ॥२३

यं प्रभुं समधिगम्य धारयत्युच्चकैः कनकभूधरः शिरः ।
कः क्षितौ सकलकाङ्क्षितप्रदं प्राप्य रत्नमथवा न दृप्यति ?॥ २४

यत्पदप्रणयिनां नृणामगुः सिद्धिपद्धतिमहो मनोरथाः ।
येन गौरवभृतामुपासनं कामधुक्सुरभितो न भिद्यते ॥ २५

यस्य रूपमनघं परं किमप्यस्ति कः कलयितुं प्रगल्भधीः ।
एवमेव सकलातिवर्त्ति वा वृत्तमद्भुतरसाय कल्पते ॥ २६

यः सुवर्णगिरिविस्फुरत्यदस्तत्प्रकाशयति वृत्तमात्मनः ।
कस्य गोप्रकटितप्रभावतः श्लोकसिद्धिरुदयं न याति वा ?॥ २७

भारतीं यदुपदेशपेशलामर्थसिद्धिमनुधावति ध्रुवम् ।
काञ्चनाचलकलामुपेयुषां सिद्धयो हि वृषलीसमाः सताम् ॥२८

कालकूटमपि सत्यमुत्कटं यत्प्रभाववशतः सुधायते ।
विश्ववल्गदघमृत्युहारिणो नेदमद्भुतममुष्य वा प्रभोः ॥ २९

येन सान्द्रकरुणार्द्रचेतसा वैभवाभ्युदयभङ्गिसङ्गिना ।
उद्धृतं विपदुदन्वतो जगद् विश्वदुर्गतिहृतः श्रियः सताम् ॥३०

यस्य संस्मरणमीक्षणं गुणोत्कीर्त्तनं स्नपनमर्चनं च तत् ।
पूरयत्यसुमतां मनोरथान् किं न वा भगवतः शुभावहम् ? ॥३१

एवं विशेषकमवाप्य जिनं सुवृत्त-
कार्त्तस्वरक्षितिभृताखिललोकलक्ष्मीः ।
त्यक्तान्यवीक्षणरसा विदधे क्षणेन
क्षोभावहो भवति वा तिलकप्रयोगः ॥ (वसन्ततिलका) ३२

पू.आ.श्री रामचन्द्रसूरिविरचिता

॥ श्री पार्श्वनाथस्य ॥

## ३. ॥ व्यतिरेकद्वात्रिंशिका ॥

(द्रूतविलम्बित)

यदिह देवकदम्बकतः स्वकैर्गुणगणैस्त्वमसि व्यतिरेकभूः ।
तदवतंसितशारदया दयानिलय ! तत्प्रयतोऽस्मि तव स्तवे ॥१

स भवताद् भवतां भवतान्तिहृद् भुजगभूषणभूः परमेश्वरः ।
जगति पूरितकाममहोत्सवः कनकसानुगतो नवशङ्करः ॥ २

स्फुटसुदर्शननन्दकविक्रमः सकलविश्वनिषेव्यमहोदरः ।
इह बभौ भुवि यः पुरुषोत्तमः
कमठकीर्त्तिसहस्तु न केवलम् ॥ ३

अकृत तल्लवनाश्रयि कर्म यः स्फुटमपातकपङ्ककलङ्कितः ।
त्रिजगदुद्धरणोद्धुरया धुरा नववराहतया विदितः क्षितौ ॥ ४

परमहंसमनोहरविग्रहः शुचिचतुर्वदनः कमलालयः ।
समधितिष्ठति यः परमेष्ठितां वहति नैव तु वेदसमुन्नतिम् ॥५

हरिमनोहरचित्रचरित्रभूर्जगति बिभ्रदनन्त इति श्रुतिम् ।
भजति यः कलितं बलडम्बरं कमपि नैष तु काममपालयन् ॥६

परशुभासितनीलतनुद्युतिश्चरणसंश्रयसाधुवृषस्थितिः ।
वहति विघ्नविनायकतां परं
सकलनागशिराः खलु यः श्रुतः ॥ ७

असमशक्तिरनङ्गशरज्वरानुपहतः स्फुटपावकजन्मभृत् ।
जगति योऽत्र बभार कुमारतामयमहो स्वयमेव तु तारकः ॥८

क्षणविनश्वरविश्वमयीं स्थितिं
व्यवहरन् विदितः खलु मारजित् ।
भजति बुद्धकलां स्वयमेव यः
प्रथयति स्म पुनर्न निरात्मताम् ॥ ९

जितमनस्कतया सुसमाधितां दधदपि प्रथयन् वपुषः क्षयम् ।
परमयोगरहस्यनिवासभूरितरनाथविलक्षण एव यः ॥ १०

निखिलविश्वगशाश्वतरूपभृन्निजगुणोद्यतशब्दमनोहरः ।
भजति काञ्चन योऽभिनवाम्बरश्रियमनश्वरतारकशीतगुः । ११

अनुपलभ्यखमण्डलडम्बरः सकलतारकवैभवभासुरः ।
य इह क्लृप्तकलानिधिकौशलो
नवमहः स्फुरितं तुलयत्यलम् ॥ १२

न कमलं विकचं कुरुते गवां व्यतिकरैर्विकिरंस्तमसस्ततिम् ।
मुदितकौशिकसंश्रितपादतां वहति योऽत्र नवीनदिवाकरः ॥१३

न वियति स्थितिवल्गितमादधे न खलु कैरवबोधकृदक्षि यः ।
क्षणदयाधिगतप्रणयो नवामृतकरः कलिताभ्युदयो नवः ॥१४

प्रमदयन्नमृतेन कृताञ्जलीन् गततृषः शिखरिश्रियमावहन् ।
अकलुषः कमठाम्बुदवृष्टिभि-
स्त्वभिनवः किल यः कमलाकरः ॥ १५

प्रकटयन्नवनस्थितिपाटवं भुवि कलां कलयन्निह हारिणीम् ।
सकलकामसमुद्भवसौहृदः
श्रयति यो नवकेसरिणः श्रियम् ॥ १६

दधदहो विबुधाश्रितपादतां भुजगराजिविराजितमौलिताम् ।
किमपि यः स्वगुणैर्भुवनाद्भुतैर्दिविषदामचलाददतिरिच्यते ॥१७

सुमनसामधिगम्य तयाऽत्र यः श्रयति नन्दनतां कमलाचले ।
परमयं शतधारिभिदेलिमाद्भुतमहाबलवैभवशोभितः ॥ १८

विबुधकुञ्जरतां विततान यः कनकसानुमति स्थितिमाश्रितः ।
विजयिनागकृतोच्चरणः परं शितितनुः सततं विमदोदयः ॥१९

शिरसि बिभ्रदहीन्द्रनिभाज्जटापटलमिष्टफलस्फुटपादभृत् ।
तनुकलां कलयन्नभसः सखीमभिनवः खलु यः सुरपादपः ॥२०

भुवनतापकृदक्षणिकोन्नतिर्भुवि विकीर्णरजाक्षतकन्दलः ।
अपर एव विनीलघनद्युतिर्य इह भाति गिरौ विहितस्थितिः॥२१

अहरसत्कवृषोदयमादधद् भृशमरालवयो (?) नुदयन्मदः।
वहति मानसमप्यजलाशयं स्फटिकशैलयशा नव एव यः ॥२२

असमरत्नजिघृक्षुजनं नयन्नहह कन्दरमीरितदुर्गतिः ।
वहति सद्गुणरोहणतां परं य इह नागवरश्रियमाश्रयत् ॥ २३

निजशिरस्यहिमक्षयमावहन्नपि निवर्त्तितवेपथुरङ्गिनाम् ।
य इह नव्यशिवोदयकृद्गिरीश्वरतया जगति स्पृशति प्रथाम् ॥२४

स्फुरदगास्तिमिताद्भुतवैभवः परमशङ्खगणेन च न श्रितः ।
कमठभृङ्गभृदस्खलितक्षमस्त्वजनि यो नव एव महोदधिः ॥२५

प्रगुणनायकतां स्वयमेव तां दधदशेषितदुष्कृतवैकृतः ।
सकललोकशिरःकृतसंश्रयः
श्रयति यो नवमौक्तिकयष्टिताम् ॥ २६

न धरणीसुविरागमुपैति यः किल नवालिसमोन्नतविग्रहः ।
अरिपुरीत्यधिकं प्रमनःस्थितिः प्रकटयत्यहरीशमहोबलम् ॥२७

न चरणाश्रयणं भरतो दधौ स्फुरति किञ्चन रौरवनिग्रहम् ।
मनसि यस्य गुरुश्च नगाधिभूर्वसति नूतनरागकलाश्रितः ॥ २८

विषमहारि विजृम्भितमीयुषः श्रवणवीक्षणतुल्यलसद्दृशः ।
फणपतेर्न च यस्य कलान्तरं किमपि भोगपरित्यजनं विना ॥२९

शुचिदशाश्रयदीप्रमहोदयः कुशलभासितसन्ततनामभृत् ।
दधदजस्रनिरञ्जनतां न यः
स्फुरति कोऽपि नवः खलु दीपकः ॥ ३०

जगति पूर्वविधेर्विनियोगजं विधिनतान्ध्यगलत्तनुतादिकम् ।
सकलमेव विलुप्यति यः क्षणा-
दभिनवः शिवसृष्टकरः सताम् ॥ ३१

इत्थङ्कारमकारणैकसुहृदं विश्वस्य पार्श्वं जिनं
तं स्तोतुस्त्रिजगद्विलक्षणगुणग्रामाभिरामाकृतिम् ।
यः कश्चिद्विकचीबभूव बत मे भाग्यातिरेकस्ततः
तल्लोकव्यतिरिक्तमुक्तियुवतिप्रेमप्रमोदोत्सवः ॥ (शा.वि.)३२

पू.आ.श्री रामचन्द्रसूरिविरचिता
श्रीपार्श्वनाथस्य

## ४. ॥ भक्त्यतिशयद्वात्रिंशिका ॥

(उपजाति)

एकातपत्रामिव शासनस्य लक्ष्मीं दधानः फणभृत्फणाभिः ।
आरूढ'जाबालि'पुराद्रिहस्ती श्रियेऽस्तु वः
पार्श्वजिनाधिराजः ॥ १

सर्वज्ञ ! विज्ञप्यमिहास्ति यत्तन्न वेदनातीत ! भवान्न वेद ।
तथापि माध्यस्थ्यमिदं त्वदीयं किमप्यहो मां मुखरीकरोति ॥२

महीभृतोऽमुष्य महाप्रभावः प्रासादवर्यस्तिलकीभवंस्ते ।
नेत्रातिगे मेरुगिरौ व्यनक्ति युक्तं सुवर्णाचलराजलक्ष्मीम् ॥ ३

मात्राधिकश्रीर्भवता सनाथः प्रासाद एष प्रभुपार्श्वनाथ ! ।
सतां हृदि स्फूर्त्तिमियर्त्ति चेत्तदन्तः प्रविष्टस्तव स प्रसादः ॥४

त्वद्बिम्बरत्नाञ्चितचूलदण्डं नीलं नभश्छत्रमुपर्यवाप्य ।
व्यनक्तु साम्राज्यमयं जिनेश ! निःशेषशैलेषु सुवर्णभूभृत् ॥५

द्युलोकलक्ष्मीप्रणयं परत्र कल्याणमत्रापि च दातुकामः ।
शङ्के प्रभोऽभ्रंलिहचारुचूलं चामीकरक्ष्माधरमध्यरोहः ॥ ६

रक्षोरगासङ्गतिरङ्गिताङ्गः प्रोत्सर्पदित्यद्भुतवृत्तभूमिः ।
त्रिलोकलक्ष्मीनिधिकुम्भशोभां
बिभ्रत् प्रभो ! पार्श्व ! पुनासि विश्वम् ॥ ७

निरूपितं तावकमुख्यरूपं जायेत सिद्ध्यै खलु युक्तमेतत् ।
दृष्टा जिनेन्द्र ! प्रतिमापि यत्ते धत्ते परेषामुपकारमेषा ॥ ८

त्वं नन्दतात् पार्श्व ! चिरं शरण्यशिरोमणिः कश्चन यद्दधासि ।
जनस्य निःशेषभियां भियेव पलायनायोरगमुत्तमाङ्गे ॥ ९

श्रीपार्श्व ! पुन्नाग ! विपन्निरासव्रतं यदात्तं भवता पुराऽभूत् ।
अद्यापि जागर्त्ति तवाहतं तन्महाशया हि प्रतिपन्नसाराः ॥ १०

जिनाधिनाथ ! प्रतिमा यथा ते कल्याणजन्माकरतां दधाति ।
चामीकराद्रिप्रतिमस्तथैष मन्येऽस्ति जाबालिपुराचलोऽपि ॥११

सङ्क्रान्तसिद्धोज्ज्वलसंविदेव निष्पादितं सिद्धशिलादलेन ।
त्वदीयमेतज्जिनचन्द्र ! बिम्बं ज्योतिर्मयत्वेन चमत्करोति ॥१२

श्रीअश्वसेनक्षितिभृत्कुमार ! सुवर्णधात्रीधरमौलिरत्न ! ।
अमोघवाचस्तव पार्थिवत्त्वं सम्प्रत्यनन्यप्रतिमं चकास्ति ॥१३

वितन्वती कामपि कामपुष्टिं तुष्टिं नयन्ती कृतिनां मनांसि ।
त्वत्पादसेवादवथुं जिनेन्दो ! युक्तं निकृन्तत्यमृतैकहेतुः ॥ १४

दुःस्थात्मनोऽस्याः कलिकालसिन्धौ रूपान्तरेणोद्धरणे धरित्र्याः।
जगत्पते ! श्रीपुरुषोत्तम ! त्वं गदाधरत्वं किरसीति युक्तम् ॥१५

दुष्काललीलायितदुःस्थलोककल्याणसम्पत्तिपवित्रसत्रम् ।
सुवर्णगोत्रे तिलकः स कोऽपि
सद्वृत्त ! भासद्म चिराय जीयाः ॥ १६

कामान् निकामं तनुताज्जनानां पतिर्जिनानामविपन्नगाङ्कः ।
नावन्ध्यचक्षुर्मुदमाप वीक्ष्य यत्तीर्थलक्ष्मीमविपन्नगाङ्कः ॥ १७

कृतार्थतां नाथ ! समेत्य तावदशेषसत्त्वेषु वहस्युपेक्षाम् ।
त्वद्भक्तिकल्पद्रुमकन्दलीयं तदप्यहो यच्छति वाञ्छितानि ॥ १८

एकातपत्रा जिन ! शासनश्रीर्जाताऽधुनेयं भवता जिनेश ! ।
तच्छायया स्वास्थ्यजुषां जनानां
भवोऽस्तमभ्येतु स तापहेतुः ॥ १९

रत्नार्चिरुन्मञ्जरिभङ्गियोगिफणौघपर्णं सुमनोचिताङ्गम् ।
गाङ्गेयभूभृद्भुवि सुप्रतिष्ठं श्रीपार्श्वकल्पद्रुममाश्रिताः स्मः ॥२०

देव ! त्वदीयं वदनं विलोक्य कृतार्थतां मेऽद्य दृशौ प्रपन्ने ।
धत्तः समस्तेन्द्रियमण्डलेऽपि
बाष्पाभिषेकस्फुटराज्यलक्ष्मीम् ॥ २१

सन्तापकेऽस्मिन् भवघर्मकाले तव प्रणामावसरे ममाद्य ।
भालस्थलेऽजायत भूरजोऽपि
सत्कन्दलः पुण्यकदम्बशाखी ॥ २२

त्रातस्तवाङ्घ्री शरणं श्रितस्य ममाङ्गतः सम्प्रति निःसरन्तु ।
धर्मार्पितं द्वारमवाप्य साक्षाद्
भियाऽन्तरङ्गा इव कण्टकास्ते ॥ २३

संस्नाप्य पञ्चामृतपूर्णकुम्भैर्भवन्तमभ्यर्चनमल्लिकाभिः ।
स्वामिन् ! मयात्मा विमलीकृतोऽयं
चित्रं त्रिलोक्यां सुरभीकृतश्च ॥ २४

भवप्रभूतासुखसन्निपातकदर्थितस्य स्तुवतो भवन्तम् ।
भवागदङ्कार ! चिराय जिह्वा
सुधामयीं मेऽद्य कलां दधाति ॥ २५

आपीय कर्णाञ्जलिसम्पुटेन प्रभाववृत्तानि तवाद्भुतानि ।
करालखेलत्कलिकालदुःखक्लान्तं चिरान्निर्वृतिमेति चेतः ॥२६

वैडूर्यरत्नाङ्कुरसोदराणि तवाङ्गवल्लिद्युतिडम्बराणि ।
विपच्चमूसंहरणैषिणो मे प्रयान्तु कालायसकङ्कटत्वम् ॥ २७

आज्ञेश्वरस्त्वं जगदेकनाथ ! विज्ञातनिःशेषमनोविशेषः ।
तवाज्ञया तन्मयि वर्त्तमाने गतावसादः किमु न प्रसादः ? ॥२८

श्रीअश्वसेनान्वयपूर्णचन्द्र ! विश्वैककारुण्यसुधासमुद्र ! ।
कुलप्रभुत्वं चिरसेवकोऽहं मयि प्रसादस्तव युज्यते तत् ॥२९

महाप्रभावोऽसि महेश ! मह्यं प्रभावलेशं कमपि प्रयच्छ ।
त्वद्गर्भदासोऽहमिति प्रसिद्धि-
रन्योन्यलभ्या भुवने ममास्ताम् ॥ ३०

स्वामी त्वमेकः खलु मे जिनेश ! चिरेण वा सम्प्रति वा प्रसीद।
तावत्त्वदीयाङ्घ्रिसरोजसेवा.....रामलीनं हृदयं मदीयम् ॥३१

मामेकमेव व्यवसायसारमनन्तरायं दधतो द्विधापि ।
यत्किञ्चिदस्तीह तदस्तु नान्यदभ्यर्थये त्वां भुवनैकनाथ ! ॥३२

पू.आ.श्री रामचन्द्रसूरिविरचिता

श्रीपार्श्वनाथस्य

## ५. ॥ प्रसादद्वात्रिंशिका ॥

(मन्दाक्रान्ता)

पायात् पार्श्वस्त्रिभुवनपतिर्यत्प्रसादोर्जितानां
निःसामान्यं स्फुरति परमप्रीतिहेतुः फलं तत् ।

धन्याः सिद्धिप्रणयिनिपुणा (?) नर्घ्यरत्नत्रिकात्मा
भावं लब्ध्वा दधति यदहो विश्वलोकाग्रभूषाम् ॥ १

संसाराब्धौ प्रकृतिविषमावर्त्तदुर्द्देशमूर्त्तौ
श्रेयः किञ्चित् क्वचन भविनां यत् कदाचित् कथञ्चित् ।
निःसन्देहं तदिह भुवनामेय ! वामेय ! देव !
त्वत्पादाब्जप्रणयकणिकाक्रीडितानां विवर्त्तः ॥ २

सम्भेदेन प्रसृमरनिजस्रोतसां तीर्थभूताः
क्रीडापूताखिलवसुमतीमण्डलाः केऽप्यमोघाः ।
मोक्षाय स्युर्भुवि तनुभृतामाश्रितानां यदेषां
योगीश ! त्वच्चरणयुगलीपांशुसंसर्गलीलाः ॥ ३

यज्जिह्वाग्रोज्झितजललवासङ्गतः कुष्टशान्ति-
र्यन्मूत्राम्भःपरिमलतया हेमतामेति लोहम् ।
अक्षीणत्वं दधति निधयो यत्करन्यासयोगात्,
त्वद्योगश्रीपरिचयमृते तादृशस्ते कथं स्युः ? ॥ ४

यद् गाहन्ते तरणिकिरणालम्बनेनाम्बराग्रं
यद्वर्षास्वप्यसलिलजुषः क्ष्मातले सञ्चरन्ति ।
मध्येज्वालागहनदहनं यत् समाधिं दधन्ते
धन्याः केचित् तदखिलमदः खेलितं त्वत्प्रसत्तेः ॥ ५

अन्तःक्रीडाविपिनवसुधं बद्धकेलिक्रमो यत्
यत्सन्मुक्ताप्रकरमरजः पुष्पवर्षं दधानः ।
स्वःश्रीसङ्गं प्रथयति हरिः साप्सरः सन्निधानः
स्वामिन् ! सोऽयं लवणिमकणस्त्वत्पदद्वन्द्वभक्तेः ॥ ६

वृत्तेर्नोर्व्यां शशिमदमुखापीतशौर्योष्मणेव
क्ष्माभृद्वंशैरिव च कलितैः स्वप्रतापाग्निना च ।
एकच्छत्रं विरचयति यत्कोऽपि मर्त्याधिपत्यं
सोऽयं वामातनुभव ! भवत्पादपद्मप्रसादः ॥ ७

गीतश्लोकः शशिशुचिगणोदञ्चिरोमाञ्चसूचि-
स्यूतिक्रीडानिबिडतरलत्कञ्चुकं पन्नगाभिः ।
यत्पातालं भुजगतिलकः शास्ति विश्वेश ! पार्श्व !
त्वत्पादाब्जद्वयपटलिमोल्लासलीलायितं तत् ॥ ८

यद्वैताढ्यं रजतवपुषं स्वं यशोराशिमुच्चैः
पिण्डीभूतं किल विलभते कोऽपि विद्याधरेन्द्रः ।
त्रैलोक्यश्रीतिलक ! भवतः स्मेरपादारविन्द-
द्वन्द्वासेवारसपरिणतेः स्फूर्जितं किञ्चिदेतत् ॥ ९

शृङ्गारस्याखिलरसमहाराज्यलक्ष्मीभिरुच्चै-
रभ्यर्च्यन्ते नयननलिनस्राविणीभिर्वधूभिः ।
केचिन्मर्त्या मदनजयिनो यन्महीमण्डपान्तः
श्रीमत्पार्श्व ! स्फुरति भवतः सैष सेवाप्रभावः ॥ १०

राज्यप्राप्तिक्षणसमुदितामन्दनान्दीनिनादैः
कर्णस्फोटादिव न वचनं श्रूयते कस्यचिद् यैः ।
भूपाः पुंसो यदिह सुधियां यान्ति वाग्वश्यतां ते-
ऽप्येष स्वामिंस्तव पदरजःसङ्गभङ्गैर्विलासः ॥ ११

गोष्ठीबन्धं विदधति मिथो निर्विरोधानुबन्धा-
स्त्वद्व्याख्यानाङ्गणधरणिषु प्राणिनो वैरिणोऽपि ।

तन्नाश्चर्यं जिन ! यदधिकं स्निह्यतन्वन्निवास-
स्त्वान्ते पुंसि प्रमदविशदाश्रीख (श्व) वागीश्वरी च ॥ १२

हेमक्ष्माभृत्तिलक ! तव यः प्रापितः पादनम्र-
स्तां कस्तूरीस्तबकरचनां मेचकाङ्गप्रभाभिः ।
व्यक्तं पीताम्बरमिव नरां कृष्णतां तं वहन्तं
प्रौढप्रेमासवपरवशाः संश्रयन्त्याशु लक्ष्मीः ॥ १३

शश्वन्नामाक्षरपरिचयश्वेतमासञ्चितस्ते
सेकः सत्यं स्फुरति परमः कामदः कोऽपि मन्त्रः ।
नव्यं केषामपि तदपि तं व्याकरोषि प्रतीमः
प्रीत्यै विद्याशतलिपिकरस्याहिभर्त्तुः श्रितस्य ॥ १४

साक्षात्कारः सकलजगतां स्याद् यतः केवलं त-
च्चक्षुः किञ्चिद्दिशति कृतिनां देव ! युष्मत्प्रसादः ।
अन्धानां तन्नियतविषयां शृष्टिसृष्टिं दधानः
केषामेष स्तवनवचसां गोचरे सञ्चरिष्णुः ॥ १५

मित्रीभावं भजति तपनः सोमनामेति दोषा-
धीशः शश्वद् भवति विलसन्मङ्गलश्रीः सवक्रः ।
सान्वर्थत्वं बुधगुरुगवी न त्यजत्येव मन्द-
स्थाना य[या]स्यादिति जिन ! तवाऽनुग्रहे सद्ग्रहाः स्युः ॥१६

भूताः स्यूताः स्वमनसि भिया राक्षसाः कातराक्षा
यक्षाः कक्षां दधति विधुरां स्युः पराञ्चः पिशाचाः ।
दुःस्वप्नास्ते प्रशमपदवीपान्थतामावहन्ते
सेवाहेवाकिनि तव जने निर्विरामं जिनेश ! ॥ १७

श्रीवामेय ! त्वयि विहरति प्रौढरूढप्रभावे
प्रादक्षिण्यप्रवणगतयः पक्षिणः प्राग् बभूवुः ।
तत् किं चित्रं वससि हृदये त्वं यदीयेऽधुनापि
स्यादेतस्याऽध्वनि न शकुनप्रातिकूल्यं कदाचित् ॥ १८

कारागारं विविशुरवशाः कण्ठपादप्रतिष्ठा-
माबिभ्राणाः कुपितनृपतौ शृङ्खलामायसीं ये ।
तां सौवर्णीं सपदि दधतस्ते निरीयुः करीन्द्र-
स्कन्धासीनास्तव जिनवर ! ध्यानबद्धावसानाः ॥ १९

मैत्रीं प्राप्य प्रसृमरमरुत्कल्पितां धूमकेतु-
र्यः स्वं तेजः प्रथयति समित्सङ्गलब्धाधिकश्रीः ।
पादन्यासं शिरसि तरसा ते नदीयेऽपि कुर्यु-
र्ये देव ! त्वाममृतमदुरं मानसे धारयन्ति ॥ २०

स्वर्णक्षोणीधरवरशिरःशेखर ! श्रीजिनेश !
व्यक्तं सेयं परमहिमता काचिदुज्जृम्भते वः ।
पुंसां पादास्थितिसमुचिता यत्तडागापगाम्भः-
सम्भाराणां परमहिमता स्यादनुद्वेगहेतुः ॥ २१

दुर्वर्णत्वं दधदपि रसाविद्धनिःशेषधातु-
श्च्योतत्कुष्टग्लपितवपुषां सिद्धनाथाऽधुनापि ।
सद्यः पिण्डं भवति विकसत्सौरभं यत्सुवर्ण
स्फूर्त्तिः कापि स्फुटमनवधेस्त्वत्प्रसादौषधस्य ॥ २२

तन्वन्नामस्मरणवशतः प्राणिनां पोतभाजा-
मम्भोराशेर्जलभरभृतो लङ्घनं दुर्दिनेऽपि ।

नूनं नाथ ! प्रथयसितरां सुप्रसन्नान्तरात्मा
संसाराब्धेरपि तटभुवः प्रापणे नैपुणत्वम् ॥ २३

सर्पद्दर्पोत्फणमभिसरन्नागलोकाधिराज–
स्फूर्जच्चूडाभरणधरणस्याज्ञयेव स्थिरात्मा ।
कालव्यालः स्थलकुवलयोल्लासलीलामुपैति
श्रीमत्पार्श्व ! त्रिभुवनपते ! त्वत्पदाम्भोजभाजाम् ॥ २४

कोपाटोपज्वलनजनितैस्तैः स्फुलिङ्गैरिवोग्रै–
रक्ष्णां पातैः कृतदवथुभिर्भिल्लसैन्यैर्निरुद्धे ।
अम्भःप्राप्तिर्यदि भयभवस्वेदभूर्यत्र सत्रं
दिष्ट्या युष्मच्चरणशरणास्ते लघूल्लङ्घयन्ति ॥ २५

स्थानेवात....मजजिन ! कृपास्तन्द्रपीयूषवृष्ट्या
दृष्ट्या दिष्ट्या तव नृपतयस्तापनिर्वापमापुः ।
यस्मादेषां समुदयिसमित्सङ्गमैरुष्मलश्री–
वैरिव्रातः प्रकटदहनः शान्तिमाशु प्रपन्नः ॥ २६

मूर्त्तं तेजः प्रकटयति यः केसरैः स्वैः कडारैः
किञ्च स्वीयं यश इव नखैर्मुक्तमुक्ताफलौघैः ।
विख्यातारिद्विरदविजयः सोऽपि राजा मृगाणां
न स्याच्चित्रार्पित इव भिया जाग्रति त्वत्प्रतापे ॥ २७

स्फूर्जद्गर्ज्जैः स्फुटमदपयोवृष्टिभृच्चीनपिष्ट–
व्यासक्रीडानिबिडतमतडिद्दन्तवल्गद्बलाकः ।
मत्तव्यालः प्रलयसमयाम्भोदमूर्त्यन्तरश्री–
स्तं त्वद्ध्यानाङ्कुशितमनसां स्यात्कृतातङ्कपङ्कः ॥ २८

सङ्ग्रामाब्धिं प्रबलविलसद्वाहिनीसन्निपातो-
द्यत्कीलालाकुलितसकलप्राणिवर्गं क्षणेन ।
निर्मथ्यान्तः सपदि बलिना भूभृता बाहुनैव
श्रीकान्तत्वं दधति कति न त्वत्प्रसादामृतार्द्राः ॥ २९

प्रौढोत्पात्ता अपि विदधते.....क्षमाकम्पनाशा-
प्लोषप्रायाः प्रशममचिरा....राष्ट्रेषु तेषाम् ।
ये निःस्यन्दीकृतनिजहृदा निष्प्रकम्पक्षमं त्वा-
मासावल्लीस्तवकनघनं निर्विरामं स्मरन्ति ॥ ३०

स्फूर्त्तिं बिभ्रत् परशुभरतो भद्रकुम्भाधिकश्री-
र्विघ्नश्रेणीहरणनिपुणः कोऽपि देवोऽयमेकः ।
श्रेयः कर्मोद्गमसमुचितारम्भसंरम्भभाज-
स्तद् भोरेनं गमयतितमां निष्प्रमादं प्रसादम् ॥ ३१

भालं कृत्वाञ्जलिमुकुलितं सोऽहमभ्यर्थये त्वां
तृष्णार्त्तं वा कथयतु जनो मामथो न्यस्ततृष्णम् ।
यद् यत् किञ्चिज्जगति परमानन्दसम्पत्तिकन्द-
स्तत्तन्मह्यं वितर वितर त्वं प्रसीद प्रसीद ॥ ३२

पू.आ.श्री रामचन्द्रसूरिविरचिताः

# ६. ॥ साधारणजिनस्तवाः ॥

## षोडशिका १

सकलसमयोपबृंहकसमयस्थितिजन्तुमखिलतुल्यगिरम् ।
गतपापं गतपुण्यं पुण्यकृते जिनपतिं स्तौमि ॥ १

दुरितानि हरसि जनयसि भद्राणि तनोषि मङ्क्षु दिक्षु यशः ।
किमपरमुपनयसि शिवं त्वमेव जिन ! दृष्टमात्रोऽपि ॥ २

नृत्यत्पुरन्दरवधूसिन्दूरपरागपिञ्जरदिगन्तम् ।
तव समवसरणमशरणशरणं शङ्केऽस्मि न गतोऽहम् ॥ ३

अपविस्मयविगतस्मयविश्वत्रयरूपदर्शनादर्श ! ।
गिरमिव सर्वपथीनां न दृष्टवानस्मि तव मूर्त्तिम् ॥ ४

पुरुहूतपाणिसञ्चार्यमाणकनकाम्बुजाङ्कविश्रान्ता ।
न भुवि न वियति गतिर्या तव समजनि सा न मे साक्षात् ॥५

तव पथि वितमसि विरजसि सच्छाये सामृते महासरले ।
अपरपक्षाधिगमकरे कृतवानहमीश ! नास्मि पदम् ॥ ६

आजन्मरुचां रुचिधामगुरुतिरस्कारसारभारखनिः ।
दुःखग्रामकुटुम्बी त्रातस्तेनाऽस्म्यहं जातः ॥ ७

लङ्घयति यस्तवाज्ञामात्मन्ययमीश ! वैरमुद्वहति ।
यः स्वात्मन्यपि वैरी कृपालुरन्येषु स कथं स्यात् ? ॥ ८

लक्ष्मीप्रभवे पुरुषोत्तमाश्रये सत्त्वधाम्नि निस्ताघे ।
यस्तव समयोदन्वति मज्जति स परं व्रजति पारम् ॥ ९

जम्भारिचक्रकृतसेव ! देवदेवस्त्वमेव खलु विदुषाम् ।
ये पुनरपरे देवास्ते देवाः कष्मलमतीनाम् ॥ १०

तव वचनसुधारसपानपावनीभूतकर्णपथकुहरः ।
कलुषविषगर्भिताभिर्मुह्यति को वाग्भिरपरेषाम् ॥ ११

अमरासुरनरलक्ष्मीः सौभाग्यं वहति तावदेवेयम् ।
भवदुपदेशसकर्णैर्न वीक्ष्यते चापलं यावत् ॥ १२

विषयविषघूर्णनावेगभङ्गुरस्तुत्यकृत्यमार्गाणाम् ।
अमृतप्रवेशकुशलं तव शासनमेव जाङ्गुलिकः ॥ १३

अभवनिरस्तु शिवस्य स्वर्गस्य क्ष्माश्रियश्च नित्यमपि ।
यदि भवति भवति तुष्टे स्वातन्त्र्यं मे सदा भवतु ॥ १४

अर्हन्ननन्तसुख ! शाश्वतिकावलोक !
विश्वोपकारिकरुणागृह ! मुक्तिनाथ ! ।
निःक्लेश ! निर्मम ! निरामय ! निःस्वभाव !
देवाधिदेव ! कृतसेव ! नमो नमस्ते ॥(वसन्ततिलका)१५

भवसङ्क्लेशसन्तप्ताराम चन्द्रांशुरोचिषि ।
प्रसीद यच्छ संवासं तस्यां मे निर्वृतिक्षितौ ॥ (अनुष्टुप्) १६

## २

### (अनुष्टुप्)

अनास्पद ! मनोवाचामिन्द्रियाणामगोचर ! ।
श्रद्धाविशुद्धिविज्ञेय ! श्रीमन्नर्हन् ! नमोऽस्तु ते ॥ १

पात्रं न वाचां सद्रूपं यत् पात्रं तदसत् पुनः ।
अवास्तवात् ततः सर्वे संस्तवास्त्वयि वस्तुतः ॥ २

सामान्यात्मा विशेषात्मा सर्वश्चेद् वस्तुविस्तरः ।
अन्यगीर्भ्यः किमेकान्तविशिष्टा भवतो गिरः ॥ ३

कस्यचिन्नागदङ्कारस्तामसस्य भवानपि ।
उलूकलोचनस्थस्य तिमिरस्येव भानुमान् ॥ ४

त्वयि श्रद्धोद्गमान्नाथ ! जानाम्यात्मनि भव्यताम् ।
कुतः सौदामिनी वारिवाहवन्ध्ये विहायसि ? ॥ ५

तस्यावश्यं पुरो मुक्तिर्योऽध्वनीनस्तवाध्वनि ।
वृष्टौ प्रकाशमानस्य तिग्मांशोरिव कार्मुकम् ॥ ६

सद्यः पुष्यन्ति ये योषित्पादघातमहोत्सवैः ।
अशोकगोत्रिणो देवास्ते पुरस्ते तृणं तृणम् ॥ ७

मञ्जुसिञ्जानमञ्जीरं निःस्वनद्भुजकङ्कणम् ।
अग्रतस्ते शचीलास्यं दृश्यं धन्यस्य कस्यचित् ॥ ८

स श्लाघ्यस्तुम्बुरोर्वीणाप्रपञ्चस्वरसञ्चयः ।
त्वद्गुणोद्घोषणोत्कण्ठैर्योगीन्द्रैरपि यः स्तुतः ॥ ९

कर्ममर्मभिदि श्राद्धो यः स्याल्लालाटिकस्त्वयि ।
असौ जायेत विश्वश्रीवक्त्राम्भोजललाटिका ॥ १०

भवतोऽचिन्त्यतेजांसि वचांसि सहजान्यपि ।
यथाधारं यथाम्भांसि परिणाममुपासते ॥ ११

सा ते सचेतसः कस्य विस्मयाय न जायते ।
अवाचः कुर्वती वाणी गतिश्च भुवि कण्टकान् ॥ १२

त्वत्प्रणामकिणश्रेण्या भालभूर्यस्य सिध्मला ।
दन्तुरा शक्रकोटीरभाभिस्तस्याङ्घ्रिपीठिका ॥ १३

हास्यादपि भवत्पादाः क्वापि तैर्वीक्षिता ध्रुवम् ।
दुर्नयैकनिषण्णानामपि येषां शुभोदयः ॥ १४

तवाङ्घ्रिनखरज्योत्स्नाशिखाचूडालभूमिषु ।
जङ्घालोत्कण्ठवैयात्यात् कामुकी मुक्तिकामिनी ॥ १५

स्वामिन्ननन्तफलकल्पतरो ! ऽभिराम-
चन्द्रावदातचरिताञ्चितविश्वचक्र ! ।
शक्रस्तुताङ्घ्रिसरसीरुह ! दुःस्थसार्थे
देव ! प्रसीद करुणाङ्कुरु देहि दृष्टिम् ॥(वसन्ततिलका) १६

३

(अनुष्टुप्)

अनन्तदर्शनज्ञानसुखवीर्यमविस्मयम् ।
अशोकहर्षाप्रत्यूहकल्याणं संस्तुवे जिनम् ॥ १

रजो हरन्तु ते धर्मदेशनासरितः सताम् ।
मज्जन्नपि जनो यासु न जाड्यमधिगच्छति ॥ २

त्वत्पादपाटलज्योतिःकडारकबरीजुषि ।
नम्राणां मांसला मूर्ध्नि कटाक्षा निर्वृतिश्रियः ॥ ३

लघुस्त्वदञ्चिनां देव ! भवाम्भोधिर्महानपि ।
सर्वज्ञसंविदो व्योम निरन्तमपि मुष्टिगम् ॥ ४

असान्तापिकसिद्धान्तविधुचन्द्रकितश्रुतिः ।
हिंसापिच्छलवेदोक्तिशूनां को नाम संस्पृशेत् ? ॥ ५

विसारिसौरभोल्लासमिलितालिकुलास्तृतः ।
दिव्यपुण्योपहारस्ते पञ्चवर्णोऽपि मेचकः ॥ ६

पुरस्ते भान्ति विश्वस्य वन्दारोः प्रति यातनाः ।
देशनां श्रोतुमायाताः पातालादिव नारकाः ॥ ७

विबुधाध्वन्यपि प्राप्ता ये नीचगतयो जनाः ।
ते प्रयान्त्येव पातालं नाथ ! पाथो यथाभ्रजम् ॥ ८

अक्षिगेणाऽपि निःशेषदोषकाननलाविना ।
ब्रह्मादीनामशेषाणां त्वया मूर्ध्नि कृतं पदम् ॥ ९

अद्यश्वीनो भवाम्भोधिसमुत्तारस्त्वदङ्घ्रिनाम् ।
अद्यप्रातीनमेवेश ! सिद्धिसौधाधिरोहणम् ॥ १०

वैहासिकः कथं न स्यादसौ निर्वाणकुट्टिमे ।
यः स्याद् भवद्गुणोद्घोषवाचाटश्चाटुकर्मभिः ॥ ११

निर्लूनकिन्नरीगीतगन्धारग्रामसौरभैः ।
भेरीमुखोदरोद्गीर्णैर्व्याकुलाशानि भाङ्कृतेः ॥ १२

प्रचलच्चामरोद्बुद्धगन्धवाहविशृङ्खलैः ।
धौतदिग्गजगण्डाङ्कदानाम्भांसि जलोर्म्मिभिः ॥ १३

चारीप्रचारनिर्घातपतद्भिः शैलसानुभिः ।
कम्पमानावनीव्यग्रनागराजशिरांसि च ॥ १४

त्वज्जन्म मज्जनारम्भसंरम्भोत्कर्षहर्षणैः ।
हरन्तु डिम्बषण्डानि ताण्डवानि बलत्विषः ॥ १५

स्वामिन्ननन्तफलकल्पतरो ! ऽभिराम-
चन्द्रावदातचरिताञ्चितविश्वचक्र ! ।
शक्रस्तुताङ्घ्रिसरसीरुह ! दुःस्थसार्थे
देव ! प्रसीद करुणां कुरु देहि दृष्टिम् ॥(वसन्ततिलका) १६

४

(अनुष्टुप्)

अर्हते देवदेवाय शीर्णसंसारहेतवे ।
पर्याप्ताशेषकृत्याय ज्योतिर्मात्रात्मने नमः ॥ १

वन्दारुशक्रकोटीररत्नच्छायाच्छटाच्छिदः ।
तमो मुष्णन्तु विश्वस्य भवत्पादनखांशवः ॥ २

तव क्रमनखादर्शरङ्गोत्सङ्गाग्रनर्त्तकीम् ।
स्वस्य पश्यन्ति ये मूर्त्ति कस्यास्ते नास्पदं श्रियः ॥ ३

विशीर्णाशेषदोषस्य कामाहङ्कारहारिणः ।
भवता देवदेवोऽस्तु कौ नामैकधुरः पुरः ॥ ४

पथा तवापि गच्छन्तः सारम्भा यान्ति दुर्गतिम् ।
यादांस्यपि जिनाधीश ! दह्यन्ते जातवेदसा ॥ ५

स्वयम्भुशम्भुवैकुण्ठैः शिल्पनाट्यच्छलोद्भटैः ।
यदा क्षिप्तमिदं विश्वमर्वाक्दृष्टि तदौचिती ॥ ६

हर्षाश्रुक्षालिता दृष्टिर्या न पश्यति ते मुखम् ।
सा पश्यति मदोत्तानचक्षुषां विद्विषां क्रमौ ॥ ७

त्वदुक्ततत्त्वयोग्यायामलङ्कर्मीणचेतसाम् ।
किमस्मिन्न षडक्षीणं त्रिलोकेऽस्तु समेधसः ॥ ८

तेजस्तेषां यशस्तेषां तेषां गौरवडम्बरम् ।
स्वर्गस्तेषां शिवं तेषां येषां त्वयि मनो रतम् ॥ ९

तव प्रसादैरानन्दं जिघृक्षोः स्थावरं परम् ।
यायावरेषु कः कामोद्यावाक्ष्माजन्मशर्मसु ॥ १०

भवद्वाक्यसुधासारैः कर्णाः पूर्णा न ये मुहुः ।
आकस्मिकरुषो मन्तुस्ते पूर्यन्ते वचोविषैः ॥ ११

कामव्यालविषोच्छालमूर्छालमनसां नृणाम् ।
नरेन्द्रवृन्दवन्द्याङ्घ्रिर्भवानेवाहितुण्डिकः ॥ १२

यादसामिव पाथांसि स्वर्गो दिविषदामिव ।
विश्वम्भरेव मर्त्यानां विरतेरिव मर्त्यता ॥ १३

सुखानामिव सन्तोषो दुष्कीर्तेरिव दुर्णयः ।
आत्मैव पुण्यपापानां प्रशमस्येव संवरः ॥ १४

प्रेष्यतेव महाधीनामारम्भ इव दुर्गतेः ।
क्षेत्रं त्वमेव देवेश ! सर्वज्ञ ! ज्ञानसम्पदः ॥ १५

स्वामिन्ननन्तफलकल्पतरो ! ऽभिराम-
चन्द्रावदातचरिताञ्चितविश्वचक्र ! ।
शक्रस्तुताङ्घ्रिसरसीरुह ! दुःस्थसार्थे
देव ! प्रसीद करुणां कुरु देहि दृष्टिम् ॥(वसन्ततिलका) १६

५

(अनुष्टुप्)

आनन्दमर्हतः पादास्ते देयासुरनश्वरम् ।
ये नखेन्दुप्रभाजालैः कुर्वन्ति वितमो जगत् ॥ १

विद्वानपि यथा हास्यः परकाव्यैः कविर्भवन् ।
तथा भक्तोऽप्यहं स्तोत्रं पात्रं कुर्वन् भवद्गुणान् ॥ २

त्वद्वाक्यश्रवणादेव देव ! भ्रश्यन्ति दुर्ग्रहाः ।
धूमरीशीकरासिक्ता माकन्दमुकुरा इव ॥ ३

द्विषोऽपि गमयत्येव त्वन्मूर्त्ति सौहृदं क्षणम् ।
पिचुमन्दफलानीव पाकः कामधुरं रसम् ॥ ४

शतपत्रपुष्पाणीव वचसा शिशिरेण ते ।
द्विषतामपि चेतांसि रक्तिमानमुपासते ॥ ५

उच्चं प्राप्याऽपि ते (मं)स्थानं ये न निश्चलवृत्तयः ।
पातालं ते प्रयास्यन्ति पादा वटतरोरिव ॥ ६

क्षेमङ्करा भद्रकरास्तव पादाः प्रियङ्कराः ।
सर्वङ्कषा विपत्तीनां किञ्च नाडिन्धमा द्विषाम् ॥ ७

प्राप्तः कुतीर्थिनां चण्डजाड्यपिण्डाल्पमेधसाम् ।
वचांस्यवास्तवान्येव रागद्वेषजुषामिव ॥ ८

वराकः किमलम्भूष्णुर्विज्ञातुं तां भवद्गवीम् ।
यां श्रुत्वा स्वर्गनाथोऽपि भिक्षुकत्वाय सोत्सवः ॥ ९

निर्वाणविमुखा हिंस्राः सर्वज्ञज्ञानविद्विषः ।
श्रुतयोऽपि प्रमाणं चेज्जितं देव ! तदांहसा ॥ १०

कुतीर्थिनां स्तवेन स्यात् कृपालुरपि निष्कृपः ।
अम्भांस्यपि दहन्त्येव देव ! पावकसङ्गमात् ॥ ११

स मेघः पुष्करावर्त्तो जडात्मा ते कुतः समः ? ।
युज्यते येन संसिक्ता कन्दलैश्च तृणैश्च भूः ॥ १२

परप्रसादैरुद्गर्वा ये वहन्तः शिरोधराम् ।
न लज्जन्ते ध्रुवं तैस्ते न पीतं वचनामृतम् ॥ १३

रजोगृहिरसावात्मा यथा विरजसीभवेत् ।
तथा स्वदृष्टिपीयूषच्छटाभिरभिषिञ्च माम् ॥ १४

स्थास्नवः कीर्तयस्तेषां म्लास्नवो दुरितादयः ।
निराकरिष्णवो येषामघानि तव दृष्टयः ॥ १५

स्वामिन्ननन्तफलकल्पतरोऽभिराम-
चन्द्रावदातचरिताञ्चितविश्वचक्र ! ।
शक्रस्तुताङ्घ्रिसरसीरुह ! दुःस्थसार्थे
देव ! प्रसीद करुणां कुरु देहि दृष्टिम् ॥(वसन्ततिलका) १६

६

(अनुष्टुप्)

जगन्ति तीर्थनाथस्य पान्तु पादनखांशवः ।
अगाधे रज्जवो येऽस्मिन् भवाम्भोधौ निमज्जताम् ॥ १

दत्तपद्मोदयाः क्लृप्तकलावत्कान्तिडम्बराः ।
जाड्यं हरन्तु ते पादा वसन्तदिवसा इव ॥ २

कल्पते नाथ ! घाताय स्वीकृतोऽपि कुतीर्थिकः ।
विध्यापयन्ति पाथांसि गाढोष्णान्यपि पावकम् ॥ ३

संयमैकधुरीणानामात्मनीनैकचेतसाम् ।
नाकेऽपि नरकास्थैव त्रातस्त्वन्मार्गदृश्वनाम् ॥ ४

नम्ररम्भालकोत्सङ्गसङ्गिकर्पूररेणवः ।
त्वदङ्घ्रिपङ्कजे देव ! बिभ्रतां ते परागताम् ॥ ५

जल्पाकास्त्वद्गुणौघस्य ये न स्युर्मन्दमेधसः ।
सौखप्रसुप्तिकास्तेषां कथं स्युर्जम्भविद्विषः ॥ ६

श्रियः कीर्तेश्च लुण्टाका ध्रुवं ते देव ! विद्विषाम् ।
कर्माचलस्य कुट्टाकास्त्वद्वाक्यकुलिशेन ये ॥ ७

भवक्लेशाग्निसन्तप्ताः पारदा इव पाथसि ।
शुद्धात्मानो निमज्जन्ति शीतलासु तवोक्तिषु ॥ ८

भवत्प्रणीतसिद्धान्तसुधास्नानं सुमेधसाम् ।
परोपनीतो मोक्षोऽपि नरकादतिरिच्यते ॥ ९

तव सूक्तिसुधासारैः परब्रह्माभिलाषुकाः ।
कामुका निर्वृत्तिश्रीणां न के कर्माणि घातुकाः ॥ १०

ईश ! त्वत्पादपद्मस्य पांसुरा ये रजःकणैः ।
ईशते स्वःशिवश्रीणामुदरम्भरयोऽपि ते ॥ ११

अन्तर्निःसारमापातरम्यं ग्राम्यानुरञ्जकम् ।
चित्रकाव्यमिवान्येषां वचः पर्यन्तनीरसम् ॥ १२

मनीषिपरितोषिण्यो मनःश्रोत्ररसायनम् ।
सत्काव्यानीव ते देव ! परमार्थपरा गिरः ॥ १३

निष्फला भोगिसंसेव्या जाड्यनिर्माणकार्मणम् ।
मिथ्यादृशां गिरो देव ! श्रीखण्डतरुसोदराः ॥ १४

वचस्वी च यशस्वी च तेजस्वी च क्षणेन सः ।
मल्लीविलासिनी यत्र खेलतस्तव लोचने ॥ १५

स्वामिन्ननन्तफलकल्पतरोऽभिराम-
चन्द्रावदातचरिताञ्चितविश्वचक्र ! ।
शक्रस्तुताङ्घ्रिसरसीरुह दुःस्थसार्थे
देव ! प्रसीद करुणां कुरु देहि दृष्टिम् ॥(वसन्ततिलका) १६

७

(अनुष्टुप्)

नमो निर्लूननिश्शेषदोषसन्तानवीरुधे ।
देवाय वीतरागाय प्राप्तनिर्वाणशर्मणे ॥ १

मनसा यत् परोक्षोऽसि हृदये निवसन्नपि ।
तत्ते चरित्रवैचित्र्यमवैति यदि केवली ॥ २

मलीमसदृशो जाड्यकण्डूलास्तुन्दिलांहसः ।
विशुध्येयुः कथं विश्वजनीनः स्यान्न चेद् भवान् ॥ ३

प्रकाशयति वस्तूनि प्रत्याशं ज्योतिषा त्वयि ।
कुतोऽन्येषां प्रभा चन्द्रे ताराणामिव पार्वणे ॥ ४

रक्तोद्भेदं पयांसीव मृदून्यपि वचांसि ते ।
विद्रावयन्ति जन्तूनामेनांसि प्रचितान्यपि ॥ ५

नखेन्दुमण्डलीज्योत्स्नावितानपरमांसलाम् ।
त्वत्पादपादपच्छायां श्रयन्ति परितापिनः ॥ ६

श्रेयांसि पशुघातेन शंसतामपि पूज्यता ।
येषां तेषां प्रशास्तारो नाथ ! मात्स्यिकसौनिकाः ॥ ७

तत्त्वस्पृशोऽपि वाचस्ते मुधा दुर्मेधसं प्रति ।
दिवाऽपि जनुषान्धस्य तमिस्रासोदरोदयम् ॥ ८

यः सर्वाङ्गीणरोमाञ्चपक्ष्मलः स्तौति ते गुणान् ।
सर्वकर्मीणविज्ञानः स स्यात् सर्वपथीनवाक् ॥ ९

रिपुश्रीवह्निना दृष्टिर्येषामाजन्म दह्यते ।
तैः कदाचिन्न दृष्टोऽसि पूजितोऽसि स्तुतोऽसि च ॥ १०

सन्ताप्यते यथा लोकः क्रूरैर्निःसत्त्वराजकः ।
त्वद्वियुक्तस्था नाथ ! मिथ्यात्वान्धैश्चरित्रवान् ॥ ११

चक्रासिचापदम्भोलिभाजो यस्य त्वदङ्घ्रयः ।
सहायाः सोऽभ्यमित्रीणः किं न स्याद् भावशत्रुषु ? ॥ १२

ये पराञ्चस्तवोपास्तेर्नास्तिकाः स्वस्तिवेश्मनः ।
वैभवान्धविरोध्यन्तरासंसारं वसन्ति ते ॥ १३

ते सिद्धिसुन्दरीवक्षःपर्यङ्कोत्सङ्गशायिनः ।
त्वत्पादपङ्कजक्रोडे ये रज्यन्ति मनीषिणः ॥ १४

अभङ्गुरामनाबाधाममन्दानन्दमेदुराम् ।
मुक्तिं त्वदङ्घ्रिनो यान्ति भासुरज्ञानमूर्त्तयः ॥ १५

स्वामिन्ननन्तफलकल्पतरोऽभिराम-
चन्द्रावदातचरिताञ्चितविश्वचक्र ! ।
शक्रस्तुताङ्घ्रिसरसीरुह ! दुःस्थसार्थे
देव ! प्रसीद करुणां कुरु देहि दृष्टिम् ॥(वसन्ततिलका) १६

८

(अनुष्टुप्)

स्वयम्भुवं भुवो नाथं लक्ष्मीनाथं कलानिधिम् ।
समन्तभद्रं भास्वन्तं तीर्थनाथमुपास्महे ॥ १

पापास्तवाङ्घ्रिपीठोपकण्ठं नैव लुठन्ति ये ।
वैरिवेश्माङ्गणक्षोणौ पांसुरायां लुठन्ति ते ॥ २

जगत्त्रयैकमित्रस्य ये तवाऽपि विरोधिनः ।
भृत्या भृत्यद्विषो भर्त्तुर्भूयासुः प्रतिजन्मनि ॥ ३

किं ते रजोभिराकीर्णामुद्वहन्ति वपुःस्थलीम् ।
भवत्पादनखज्योत्स्नाच्छटाभिः स्नान्ति येऽन्वहम् ॥ ४

मार्गतां यत्नतो देव ! त्वदाराधनसाधनम् ।
नास्ति वैनयिकादन्यत् किञ्चिदौपयिकं सताम् ॥ ५

वाचालोऽपि तव स्तोत्रैः पत्याहंयुरपि त्वया ।
कैः कैर्न पूज्यते[लोके]देवदैत्यनरेश्वरैः ॥ ६

आत्मद्विषो द्विषन्ति त्वां ये पापीयोमतल्लिका ।
अष्टमं नरकं यान्ति पारवश्यमिहैव ते ॥ ७

असौ किं गौर्न वोढा यः किं राजाऽसौ न पाति यः ।
असौ देवेश ! किं देवो यः कुटुम्बविसंस्थुलः ॥ ८

देवाश्चेत् कामिनीपादप्रणामनम्रमौलयः ।
ततोऽस्तु स्वस्ति भण्डेभ्यः संस्तुमो विटपेटकम् ॥ ९

नमो लीलाविलासाय पानशौण्डकलाय च ।
वन्दामहे भुजङ्गाङ्घ्रीन् निर्वाणप्राप्तिहेतवे ॥ १०

उद्गायन्तः प्रनृत्यन्तो विनिघ्नन्तश्च नित्यशः ।
यद्युपास्याः शिवश्राद्धैस्ततो योगजुषो हताः ॥ ११

पाणौ शस्त्रं प्रिया श्रोणौ शिखी भाले गले फणी ।
सायं नृत्तं वृषो यानमहो ध्येयस्य साधुता !!! ॥ १२

आदिशन्तः परं ब्रह्म मृत्कुशाग्नितिलोदकैः ।
त्वदन्ये कस्य हास्याय न जायन्ते विबुद्धयः ॥ १३

येऽमलस्यान्तरस्यापि स्नानेन ब्रुवतेऽत्ययम् ।
तेऽपि ग्राह्यगिरः पश्य लोकस्यापानमत्तताम् ॥ १४

स एव वाग्मी स श्राद्धः स प्रज्ञालः स मेधिरः ।
त्वत्प्रणामकिणैर्यस्य शुभंयोः पत्रलं शिरः ॥ १५

स्वामिन्ननन्तफलकल्पतरोऽभिराम-
चन्द्रावदातचरिताञ्चितविश्वचक्र ! ।
शक्रस्तुताङ्घ्रिसरसीरुह ! दुःस्थसार्थे
देव ! प्रसीद करुणां कुरु देहि दृष्टिम् ॥(वसन्ततिलका) १६

९

(अनुष्टुप्)

उपास्महे जिनेन्द्रस्य शङ्खपद्माञ्चितौ क्रमौ ।
शाश्वतीमस्तसङ्क्लेशां सम्पदं स्पृहयालवः ॥ १

यथा षण्ढस्य सौभाग्यमुपहासाय योषिताम् ।
तथा त्वयि मम स्तोत्रसंरम्भोऽयं सुमेधसाम् ॥ २

प्रमोदोद्भिन्नरोमाञ्चव्याजेन नवपल्लवान् ।
त्वदञ्चनपवित्राणां प्रसूते पुण्यपादपः ॥ ३

व्याकुलस्यापि यामिन्यां यथा निद्रा प्ररोहति ।
विशृङ्खलेन्द्रियस्यापि त्वदुपास्तौ यथा शुभम् ॥ ४

तस्य सौस्नातिकः सोऽपि जम्भारिः प्रोषितारये ।
नमस्करोति यस्तुभ्यमभ्यर्णशिववैभवः ॥ ५

स्तौति या न भवद्वीर्थीं त्रैलोक्यत्राणदीक्षिताम् ।
सन्त्रासकाहला स्तौति सा वाणी द्विषतां यशः ॥ ६

प्रयत्नेऽपि यथा मूको नालम्भूष्णुः प्रजल्पितुम् ।
त्वत्पदानि तथा देव ! क्रोधक्लिन्नोऽपि हिंसितुम् ॥ ७

त्वन्मार्गनिर्मलात्मानः पूर्णेऽपि निभृतं जडैः ।
निस्तुषाणीव शस्यानि न रोहन्ति भवे जनाः ॥ ८

प्रसाधितोऽपि रागाणां न यथा प्रवयाः प्रियः ।
तथा प्रख्यातिभाजोऽपि ब्रह्माद्या भवदङ्घ्रिनाम् ॥ ९

सौनिकानां पथा येन भूयते विश्वगर्हितैः ।
किं कुर्मः केऽपि तेनापि प्राप्ताः पूज्यतमां दशाम् ॥ १०

कोऽप्यनेहाः स ते देव ! प्रसादेन भवे भवेत् ।
चेतो जुगुप्सते यत्र योषित्प्रेम्णो भिदेलिमात् ॥ ११

योषितां न यथा कोऽपि स्वकीयः कुटिलात्मनाम् ।
तथा विरक्तचित्तस्य त्रातरस्तु ममान्वहम् ॥ १२

दृष्ट्याऽप्याजन्म सर्वेषां यथा भ्रान्तिर्नभो नतिः ।
तथा कालं प्ररूढापि तत्त्वक्लृप्तिः कुतीर्थिनाम् ॥ १३

मम त्यक्तान्यकृत्यस्य नासाग्रन्यस्तचक्षुषः ।
अस्तु पूर्वाह्णमध्याह्नसायाह्नेषु त्वयि क्षणः ॥ १४

किञ्चित् कारुण्यमास्थाय प्रसीद जगतां पते ! ।
पचेलिमानि जायन्ते यथैनांसि चितान्यपि ॥ १५

स्वामिन्ननन्तफलकल्पतरोऽभिराम-
चन्द्रावदातचरिताञ्चितविश्वचक्र ! ।
शक्रस्तुताङ्घ्रिसरसीरुह ! दुःस्थसार्थे
देव ! प्रसीद करुणां कुरु देहि दृष्टिम् ॥(वसन्ततिलका) १६

१०

(अनुष्टुप्)

अनाधेयमनाधारमसहायमनायकम् ।
अशात्रवममित्रं च नमस्यामो जिनेश्वरम् ॥ १

केवलं स्तोत्रमर्हन्ति दैवतेसु हरादयः ।
सर्वथा कुत्सिताचारैरपि यैर्मोहितं जगत् ॥ २

शासितारः स्वयं येषां रागान्धमनसः सदा ।
विषयेषु विरज्यन्ते यत् ते तन्नाथ ! नौचिती ॥ ३

उपालभामहे यद्वा त्वदन्याराधिनो मुधा ।
अयं हि पन्थाः सिद्धो यन्न देवचरितं चरेत् ॥ ४

दधानो यामिमां मुद्रामन्त्यजोऽपि विलज्जते ।
देवस्य पूजयन्तस्तां विलीयन्ते न किं जनाः ? ॥ ५

हराकारोऽपि चेद् याति पूज्यतां महतामपि ।
उपस्थाच्छादनक्लेशस्ततो लोकस्य दुर्जनः ॥ ६

निमील्य नेत्रे विद्वांसो द्वयं निश्चिन्वतामिदम् ।
मुक्तेरुपायास्त्वन्नीतौ परनीतौ तु संसृतेः ॥ ७

देव ! यद्यस्ति देवस्य भवतोऽन्यस्य कस्यचित् ।
देवलक्षणलेशोऽपि प्रमाणं जगती तदा ॥ ८

पन्थानौ द्वाविमौ देवनरकाव्यभिचारिणौ ।
अन्येषु प्रीतिलेशोऽपि द्वेषलेशोऽपि तु त्वयि ॥ ९

कृपाऽपि कल्पते दिष्ट्या त्वदन्यैः पापजन्मने ।
दहन्ति वीरुधोऽम्भांसि चित्रासु घनजान्यपि ॥ १०

सर्वस्यात्मा महांस्तेम शम्भुः स्त्रीशस्त्रवानपि ।
देवत्वमन्यतामन्ये मन्यन्ते तस्य किं पुनः ॥ ११

प्रतीक्ष्य नृत्यतो वीक्ष्य विलज्जेऽन्तः परानपि ।
स्वयं तु केऽपि नृत्यन्ति देवाः सन्तोऽपि कौतुकम् ॥ १२

न सूत्रयसि विश्वानि न नृत्यसि न गायसि ।
किञ्चिन्न दत्से नादत्से ततः किं मन्यसे जडैः ? ॥ १३

चाक्षुषानपि पश्यन्ति न ये भावान् यथास्थितान् ।
अतीन्द्रियं भवन्तं ते कथं पश्यन्तु तामसाः ॥ १४

स्त्रीशस्त्रगीतनृत्तादि यत् कुत्सायै महात्मनाम् ।
तदेव येषां पूजायै तेभ्यो भद्रं हितं नमः ॥ १५

स्वामिन्ननन्तफलकल्पतरोऽभिराम-
चन्द्रावदातचरिताञ्चितविश्वचक्र ! ।
शक्रस्तुताङ्घ्रिसरसीरुह ! दुःस्थसार्थे
देव ! प्रसीद करुणां कुरु देहि दृष्टिम् ॥(वसन्ततिलका) १६

## ११

### (अनुष्टुप्)

यथावस्थितबोधस्य यथावस्थितवादिनः ।
अरागद्वेषमोहस्य देवस्य पथमाश्रये ॥ १

उपेक्षावान् जगद् रक्षन् कृपावान् निर्जयन् परान् ।
मध्यस्थः परमाक्रामन् दत्से कस्मै न विस्मयम् ? ॥ २

प्रशान्तश्चेत् किमन्येषां मर्माणि तुदसे गिरा ।
निराकाङ्क्षोऽसि चेद् विश्वं केनोपकुरुषेऽधुना ॥ ३

प्रत्यूहं जयतात्मानमशेषं रक्षता परम् ।
निर्जिता यत् त्वया त्रातः ! परे चित्रं न कस्य तत् ? ॥ ४

न सैन्यानि न दुर्गाणि नोपाया न च हेतयः ।
एवमेव द्विषोऽशेषान् जयतस्ते नवो नयः ॥ ५

सर्वत्र मुदिता मैत्री कृपोपेक्षा च जन्तुषु ।
इयं वागपि नान्येषामनुष्ठाने तु का कथा ? ॥ ६

आत्मैकनिष्ठे निःशेष[देह]चिन्तापराङ्मुखे ।
न जानीमः कुतोऽप्यर्थादर्थिनस्त्वयि तात्त्विकाः ॥ ७

उदास्स्व यदि वा कुप्य प्रसीद यदि वा मयि ।
अहं पुनः शिवायापि प्रपद्ये नार्थितां त्वयि ॥ ८

आकृष्य पात्यमानानां विषयैर्व्यसनाम्बुधौ ।
स्वामी त्रिलोकलोकस्य त्राणं देव ! त्वमेव नः ॥ ९

न विस्मयो यदर्थन्ति त्वादृशो वीतविप्लवाः ।
यदिन्दुः पार्वणो रम्यस्तत्र किं नाम कौतुकम् ? ॥ १०

इयन्तं कालमुद्दण्डजाड्यपिण्डान्धमानसः ।
त्रातर्भ्रान्तोऽस्मि संसारकान्तारे सत्यपि त्वयि ॥ ११

पुण्यनैपुण्यसम्प्राप्यः साक्षात्कारः कुतस्त्वयि ।
स्वप्नेऽपि देव ! भूयान्मे त्वद्दर्शनमहोत्सवः ॥ १२

क्षीयन्तां नाम पापानि भवत्पादसपर्यया ।
पुण्यान्यपि यदायान्ति क्षयं तेनाऽस्मि विस्मितः ॥ १३

प्रसीद सीदते मह्यमेधि दीने मयि प्रभुः (भो !) ।
समाधिव्याधिविध्वस्तं.....देव ! पालय पालय ॥ १४

मादृशां पापबीजानां स्थानं क्वापि न विद्यते ।
वयं पूत्कुर्महे तेन भूयो भूयस्तवाग्रतः ॥ १५

स्वामिन्ननन्तफलकल्पतरोऽभिराम-
चन्द्रावदातचरिताञ्चितविश्वचक्र ! ।
शक्रस्तुताङ्घ्रिसरसीरुह ! दुःस्थसार्थे
देव ! प्रसीद करुणां कुरु देहि दृष्टिम् ॥(वसन्ततिलका) १६

१२

(अनुष्टुप्)

क्षमाभृतेऽर्हते तस्मै नमो विस्मयवेश्मने ।
जाड्यतापहरी यस्मात् प्रादुरास सरस्वती ॥ १

विस्मयाय परं तेषां येषां त्वं नासि संस्तुतः ।
चित्राय तारकास्तेषां साक्षाद् येषां न भानुमान् ॥ २

मिथ्यात्वान्धमनाः कालमियन्तं नाथ ! सर्वथा ।
कोऽस्मि कुत्रास्मि कस्यास्मि नेदमस्मि प्रपन्नवान् ॥ ३

त्वद्वाक्यभानुभिर्लूनसान्द्रमोहतमः स्थितिः ।
इदानीं स्वं परं स्थानमस्थानं चास्मि बुद्धवान् ॥ ४

विषं तैर्भक्षितं मूर्ध्नि पातितः स्वे महाशनिः ।
झम्पा प्रदत्ता कल्पाग्नौ नासि यैर्देव ! सेवितः ॥ ५

सैन्यानि सम्पदः पूजा वैभवानि महोत्सवाः ।
तेषां हर्षाय कल्पन्तां ये देव ! भवतो द्विषः ॥ ६

जातास्ते किं प्रवृद्धाः किं मर्त्त्याः किं च सचक्षुषः ? ।
वीतसंसारसञ्चार ! त्रातयैर्नासि वीक्षितः ॥ ७

येषामह्नाय देहेऽपि परित्यागोत्सुकं मनः ।
तेषां त्वदङ्घ्रिनां नाथ ! का नामास्था धनादिषु ? ॥ ८

गुणिनोऽपि रजोदेश्या न्यायिनोऽपि तिरस्कृताः ।
वयं तथापि......विरज्यामो न पाप्मनः ॥ ९

पाप्मानः केऽपि वैरस्यं त्वद्वाग्भिरपि बिभ्रते ।
कूपोद्भवानि यादांसि क्लाम्यन्ति क्षीरनीरधौ ॥ १०

त्वत्प्रसादेन जानीमः सन्तोषसुखसौरभम् ।
तथापि चेतोऽसन्तोषं दधाति करवाम किम् ? ॥ ११

द्विषन्तस्त्वां निमज्जन्तु कामं पापेषु कर्मसु ।
तव भृत्या निमज्जामो यद्वयं तत्र कौतुकम् ॥ १२

भ्राम्यन्तु नाम संसारे पराञ्चस्तव शासनात् ।
शासनं ते समारूढा भ्राम्यामः किं वयं हताः ? ॥ १३

त्वदाज्ञां नानुतिष्ठन्ति यद् द्विषस्ते तदौचिती ।
यद् वयं नानुतिष्ठामस्त्वद्भुजिष्याः स को नयः ? ॥ १४

अर्हन्नर्हन्निति त्रातस्त्रातुं पूत्कुर्वतो मम ।
समं समन्ततः कण्ठः पापं पुण्यं च शुष्यतु ॥ १५

स्वामिन्ननन्तफलकल्पतरोऽभिराम-
चन्द्रावदातचरिताञ्चितविश्वचक्र ! ।
शक्रस्तुताङ्घ्रिसरसीरुह ! दुःस्थसार्थे
देव ! प्रसीद करुणां कुरु देहि दृष्टिम् ॥(वसन्ततिलका) १६

१३

(अनुष्टुप्)

सजन्मानमजन्मानं स्थावरं नश्वरात्मकम् ।
विश्वरूपमरूपं च देवं जिनपतिं स्तुवे ॥ १

सतामुन्मीलयन् दृष्टिं पापपङ्कं त्वशोषयन् ।
भानुमान् भवतः कोऽन्यो लोकस्यास्य तमस्वतः ? ॥ २

कषायवह्निना विश्वे ज्वलत्यस्मिन् समन्ततः ।
त्वमेव पुष्करावर्त्तो देशनासारमावहन् ॥ ३

कुतीर्थयायिनां नाथ ! संसारापारवारिधौ ।
निर्यामको भवानेव नृणां सर्वपथीनदृक् ॥ ४

त्वदाधारमिदं येन विश्वं विश्वं चराचरम् ।
त्वमेव देव ! मन्यन्ते ततस्तत्त्वस्पृशो वियत् ॥ ५

अनन्तरत्नभाजोऽपि रत्नत्रयवतो मम ।
समुद्रास्ते जडात्मानः प्रकृष्यन्तां कुतः प्रभो ! ॥ ६

त्वत्तः समुद्रतः प्राप्तं रत्नत्रयमिदं मम ।
प्राणात्ययेऽपि नो शक्यं हर्त्तुमिन्द्रियदस्युभिः ॥ ७

त्वन्नीत्या कण्टकान् सोढुं गाढोत्कण्ठो यथास्म्यहम् ।
तथा न सम्पदो भोक्तुं भूर्भुवःस्वःसमुद्भवाः ॥ ८

तथा त्वयि न मे रागो मोक्षदानैकदीक्षिते ।
त्वदन्येषु यथा द्वेषो नाथ ! नारकवर्त्मसु ॥ ९

भवत्सिद्धान्तपीयूषपानसौहित्यसोत्सवः ।
लज्जते गर्हते विद्वान् ब्रह्मादीनां विचेष्टितैः ॥ १०

दैन्यं मर्त्येषु कुर्वन्ति मादृशाः किं सति त्वयि ।
ककुभो भासयत्यह्नां पत्यौ दीपेषु का स्पृहा ? ॥ ११

देव ! त्वन्मार्गसंवादिदुःखं प्राप्यापि ये हताः ।
न पापेषु विषीदन्ति पशवस्ते न मानवाः ॥ १२

शुभोदर्कां क्रियां कर्तुं नास्मि लब्धामपि क्षमः ।
त्वन्निश्चयः फलं किञ्चित् कुर्यात् कुर्यान्न वा न वा ॥ १३

निषिद्धाधानसोत्कण्ठान् मादृशो विहितद्विषः ।
त्वत्तस्त्राणैकहेवाकान् को नामाद्रियतां परः ? ॥ १४

शाधि नः कश्मलाचारानेधि नः शाश्वतः पतिः ।
आन्तरान् जहि नः शत्रून् देहि नः स्थिरमन्तिकम् ॥ १५

स्वामिन्ननन्तफलकल्पतरोऽभिराम-
चन्द्रावदातचरिताञ्चितविश्वचक्र ! ।
शक्रस्तुताङ्घ्रिसरसीरुह ! दुःस्थसार्थे
देव ! प्रसीद करुणां कुरु देहि दृष्टिम् ॥(वसन्ततिलका) १६

## १४
### (अनुष्टुप्)

क्षीणापायोऽपि निश्शेषविशेषोपेयसिद्धिभाक् ।
देव ! पुष्णातु विश्वस्य वीतरागो विरागताम् ॥ १

न पाप्मनो विरज्यन्ते शासकेन त्वयाऽपि ये ।
राज्येऽपि भास्वतस्तेषां ध्वान्ताभोगभृतैव भूः ॥ २

शाम्यन्नपि भवद्बाह्यः शमं नायाति तादृशम् ।
न सा कूपोदकैश्छाया वीरुधां या घनोदकैः ॥ ३

तपस्यन् शाश्वतं ज्योतिः श्रद्दधानोऽपि पश्यति ।
मर्मभेदिषु धर्मेषु वर्षास्वपि घनोदकम् ॥ ४

उपसर्गान् स्वयं सोढा बाध्यते न भवोर्मिभिः ।
हिमानीं बाधितुं देव ! नाम्भोमग्ना तरस्विनी ॥ ५

आकालं यैर्न लब्धोऽसि ते शोच्या एव जन्तवः ।
लब्ध्वापि यैः पुनस्त्यक्तः कस्तेषां ब्रूहि निर्णयः ? ॥ ६

निधीनालोक्य जाताः स्म सद्यस्तद् वयमन्धलाः ।
यदासाद्य भवान् भर्ता समीचीनं न सेवितः ॥ ७

महान्तो हन्तकारेऽपि यद् वैरिमुखवीक्षिणः ।
त्वदाज्ञालोपकोपस्य स ध्रुवं दण्डडिण्डिमः ॥ ८

प्रसीद कुरु कारुण्यं दीनचूडामणौ मयि ।
एनांसि बिभ्रतां नाशमेधांसीव कृशानुना ॥ ९

सम्पदो विपदः सर्वा विशीर्यन्ते यथा मम ।
तथा प्रतिक्रियां काञ्चित् कर्तुं संरम्भमुद्वह ॥ १०

भूयसीभिः समुद्वेगं याच्ञाभिर्नाथ ! मा कृथाः ।
पाल्यपालनकष्टा हि महीयःपदसम्पदः ॥ ११

संवरीतुं हृषीकाणि स्वस्वगोचरवर्त्मनः ।
ततो भवान् भवानेव ज्ञातुमौपयिकं क्षमः ॥ १२

तैस्तैः स्वकर्मभिर्यान्तं कृतान्तवदनोदरे ।
स्वं स्वकीयं च शोचन्ति भवन्मार्गबहिर्मुखाः ॥ १३

पथा केन भवस्यास्य स्तोत्रमाधातुमुत्सहे ।
भ्राम्यतो यत्र लब्धोऽसि दुरापस्त्वं मया पतिः ॥ १४

अनेहसे नमस्तस्मै सर्वकल्याणसंसदे ।
त्रातः ! स्यां यत्र निःशेषसङ्गभङ्गसमुत्सुकः ॥ १५

स्वामिन्ननन्तफलकल्पतरोऽभिराम-
चन्द्रावदातचरिताञ्चितविश्वचक्र ! ।
शक्रस्तुताङ्घ्रिसरसीरुह ! दुःस्थसार्थे
देव ! प्रसीद करुणां कुरु देहि दृष्टिम् ॥(वसन्ततिलका) १६

## १५

## (अनुष्टुप्)

रत्नत्रयनिदानाय दोषत्रयविनाशिने ।
जगत्त्रयनमस्याय देवाय प्रणिदध्महे ॥ १

स नाम कां गतिं यायात् यस्ते हास्यादपि द्विषन् ।
सोऽपि वा कां गतिं यायात् यस्ते हास्यादपि स्मरेत् ॥ २

समूलकाषं कषतः स्वस्यान्यस्य च शात्रवम् ।
तवैव परमां प्रापुः प्रवृद्धिं शमसम्पदः ॥ ३

परेभ्यस्ते विशेषोऽरितक्षणीयो जडैरपि ।
विवेकिमानिनोऽप्येतं लक्षयन्ति न केऽपि किम् ? ॥ ४

अन्यशिष्याः प्रतिष्ठातुं खपुष्पमपि वाग्मिनः ।
तव शिष्या पुनर्देव ! खरत्वमपि नो वयम् ॥ ५

त्वया प्रपञ्चिताः सर्वे पन्थानः स्यात्पदाङ्किताः ।
भारती भवतोऽन्येषां किमेकान्ता त
संसती (?)[ऽऽग्रहशंसती] ॥ ६

अन्तर्बहिश्च वस्तूनि भवन्मार्गानुगानि चेत् ।
तदा प्रपद्यतां लोकः का याच्ञा वास्तवे पथि ? ॥ ७

अन्यायैकजुषो मन्दान् वीक्ष्य मङ्गलशालिनः ।
भवान्तरं भवन्तं च पुण्यं चास्मि प्रपन्नवान् ॥ ८

पापैकबद्धकक्षोऽपि लक्ष्म्या यत्कोऽपि वर्द्धते ।
त्वदङ्घ्रिभक्तिलेशस्य विलासः स विजृम्भते ॥ ९

त्वयि भक्तेस्ततः शक्तिर्यदन्यायेऽपि सम्पदः ।
भिषजः कोऽनुभावोऽस्तु पथ्यलेहिनि देहिनि ॥ १०

भवद्भक्त्यैकनिष्ठेन बाह्यानुष्ठानविद्विषा ।
तदकृत्यं कृतं किञ्चित् प्रकम्पे यत् स्मरन्नपि ॥ ११

प्रकाशनं पुरोऽन्येषु कथाऽपीयं महीयसी ।
स्वस्य दुश्चरितान्यस्मि विज्ञातुं नात्मनाप्यलम् ॥ १२

श्रोत्रशूलं महापापकारि यद्वाऽन्यदुच्यते ।
अस्मत्पापप्रकाराणां विदुरो न भवानपि ॥ १३

त्वद्भक्तिलेशमात्रेण काचिद् यदि परङ्गतिः ।
अन्यथा नित्यमग्नोऽस्मि देव ! सन्तमसाम्बुधौ ॥ १४

स्वतन्त्रो देव ! भूयासं सारमेयोऽपि वर्त्मनि ।
मा स्म भूवं परायत्तस्त्रिलोकस्यापि नायकः ॥ १५

स्वामिन्ननन्तफलकल्पतरोऽभिराम-
चन्द्रावदातचरिताञ्चितविश्वचक्र ! ।
शक्रस्तुताङ्घ्रिसरसीरुह ! दुःस्थसार्थे
देव ! प्रसीद करुणां कुरु देहि दृष्टिम् ॥(वसन्ततिलका) १६

## १६

### (अनुष्टुप्)

मैत्री-प्रमोद-कारुण्यमाध्यस्थ्यमहितोदयम् ।
स्मरामि क्लेशनाशाय जिनेशस्य पदद्वयम् ॥ १

भवामि दीनः प्रत्यर्थं भूयसामीश ! जन्मिनाम् ।
निश्शेषहेतोरेकस्य हताशो न पुनस्तव ॥ २

लक्ष्मीलेशकृतो नीचानप्युपासितुमुत्सहे ।
तवोपास्तौ पुनर्मन्दः सर्वसम्पद्विधायिनः ॥ ३

त्वत्पथेनास्तु मैत्री मे पूर्णमन्यैर्जगज्जनैः ।
प्रमोदो विरतौ भूयाद् दूरे तिष्ठन्तु सद्गुणाः ॥ ४

भीतार्त्तदीनैः किं लोकैः कृपा स्वात्मनि जृम्भताम् ।
कृतं क्रूरैरुपेक्षास्तु कामिनीनेत्रकर्मसु ॥ ५

पत्तिस्तेऽहं पतिस्त्वं मे सैषा मे भावना सदा ।
एकत्वभावना तेषां येषां त्वं नासि नायकः ॥ ६

त्रिलोकैकपतिर्नाथ ! यस्य मे शरणं भवान् ।
सोऽहं हास्यः कथं न स्यां नास्ति मे शरणं ब्रुवन् ॥ ७

विश्वस्माद्विश्वतोऽन्यत्वं त्वत्तः पुनरनन्यताम् ।
य एव भावयेन्नाथ ! स एव शिवमश्नुते ॥ ८

अहं ममेति सम्मोहो येषां जीर्णस्तवोक्तिभिः ।
कृतिनस्ते न बाध्यन्ते स्वस्वकीयविपत्तिभिः ॥ ९

स्वाम्यं स्वतां च गच्छन्तस्ते विषीदन्ति किं बुधाः ।
भवद्वाक्यसुधासारैर्येषामार्द्रं सदा मनः ॥ १०

यत्पूर्वं पूजितो नासि न ध्यातो न च संस्तुतः ।
तेनास्मि पाप्मना प्राप्तस्त्रातः ! क्रूरेषु दासताम् ॥ ११

नास्म्यलं याचितुं किञ्चिल्लज्जमानः स्वपाप्मभिः ।
तथापि बोधिमाधेयाः कथञ्चित् क्वापि जन्मनि ॥ १२

तत्कर्म न कृतं किञ्चिदत्र जन्मनि शोभनम् ।
बोधिमात्रेऽपि येनाशां हताशः करवाण्यहम् ॥ १३

न नाम संयमं प्राप्य न कृतं संयमोचितम् ।
तत् किञ्चन कृतं देव ! यत्पापस्यापि नोचितम् ॥ १४

एकोऽहं देव ! दोषाणामशेषाणां महाखनिः ।
निवेदिते यथावस्तु साम्प्रतं यद् विधेहि तत् ॥ १५

स्वामिन्ननन्तफलकल्पतरोऽभिराम-
चन्द्रावदातचरिताञ्चितविश्वचक्र ! ।
शक्रस्तुताङ्घ्रिसरसीरुह ! दुःस्थसार्थे
देव ! प्रसीद करुणां कुरु देहि दृष्टिम् ॥(वसन्ततिलका) १६

१७

(अनुष्टुप्)

स्वातन्त्र्यश्रीपवित्राय परमब्रह्ममूर्त्तये ।
साधिताशेषसाध्याय नमो भगवतेऽर्हते ॥ १

त्रातस्त्वं त्राणमाधारः सम्पत्तिः प्राभवं गतिः ।
त्वमेव देव ! विश्वस्य विश्वस्याप्यस्य जीवितम् ॥ २

प्रशान्तपावनाकारे त्वयि येषामदेवधीः ।
तेषां हुताशसङ्कल्पः पार्वणे श्वेतरोचिषि ॥ ३

न प्रसीदसि रागान्धे न कुप्यसि विरागिणि ।
शुभाशुभे तथापि स्तस्त्वत्तो रक्तविरक्तयोः ॥ ४

इदं ध्यानमयं योगः सा श्रद्धा सा च भावना ।
यदन्तः सततं त्रातस्त्वदाज्ञापालनव्रतम् ॥ ५

कामधेनुर्वशे तस्य कल्पद्रुस्तस्य किङ्करः ।
त्वं भवाम्भोधिमग्नस्य यस्य हस्तावलम्बनम् ॥ ६

कामाः काममी तस्य पांशुदेश्याः सुमेधसः ।
शाश्वतानन्दमाशंसुर्यस्यासि त्वमधीश्वरः ॥ ७

तस्यास्य जन्मनः कुर्मो निजस्य कतिशो बलिम् ।
एकान्तश्रद्धतां प्राप यत्र नस्त्वयि मानसम् ॥ ८

तव स्तवनयोग्यायां यदि किञ्चित् फलं ततः ।
त्वदन्यस्य गुणान् स्तोतुमाकाले स्यामवागहम् ॥ ९

तथा न चूडारत्नस्य जङ्गालैः किरणाञ्चलैः ।
शोभते भालभूर्भूम्ना त्वत्प्रणामकिणैर्यथा ॥ १०

अमूर्द्धा तत्र भूयासं वासवस्यापि जन्मनि ।
प्रणामः क्रियते यत्र भवतोऽन्यस्य कस्यचित् ॥ ११

जानामि यद् विधाताऽसि नोपकारापकारयोः ।
त्वामेव सेवितुं देव ! स्पृहयालुस्तथाप्यहम् ॥ १२

न ते कोऽपि न कस्यापि महेश ! स भवान् भवान् ।
भूर्भूवःस्वस्तथाप्येतत् त्वत्पादाङ्कितमानसम् ॥ १३

ममाऽपवित्रो मूर्द्धाऽयं त्वदन्यनतिकल्मषैः ।
त्वत्प्रणामहुताशेन विशुद्धिं लभतां मुहुः ॥ १४

मुक्तिशुक्तिनिपेयस्य परब्रह्मरसस्य नः ।
सौहित्यसम्पदं देव ! प्रसीद भव दक्षिणः ॥ १५

स्वामिन्ननन्तफलकल्पतरोऽभिराम-
चन्द्रावदातचरिताञ्चितविश्वचक्र ! ।
शक्रस्तुताङ्घ्रिसरसीरुह ! दुःस्थसार्थे
देव ! प्रसीद करुणां कुरु देहि दृष्टिम् ॥(वसन्ततिलका) १६

पू.आ. श्री सोमसुन्दरसूरिविरचिता

# ७. ॥ युष्मच्छब्दनवस्तवी ॥

॥ अर्हम् ॥

स्तुवे पार्श्वं जिनाधीशं पार्श्वयक्षोपसेवितम् ।
प्रणतानल्पसङ्कल्पदानकल्पद्रुमोपमम् ॥ १

पूजितत्वं जनः पूज्यः स्यात्सर्वजगतामपि ।
हीलितत्वां तु नैवैति दुःखोच्छेदः कदाचन ॥ २

नाथीकृतत्वया देव ! भवारिर्जीयते क्षणात् ।
हर्षाद्वीक्षिततुभ्यं च स्पृहयेन्मुक्तिकामिनी ॥ ३

नतत्वत्पुरुषाद्दोषा रोषाद्या यान्ति दूरतः ।
सम्यग्ध्याततव स्वामिन् ! सिध्यन्ति च मनोरथाः ॥ ४

स्तुतत्वयि नरे नाथ ! विलसन्त्यखिलाः कलाः ।
उपमानोपमेयत्वं ! चिरं जीया जिनेश्वर ! ॥ ५

युष्मत्पदान्यपदगैकवचःप्रयोगैः
स्तुत्वेति पार्श्वजिन ! सद्गुणभाजनं त्वाम् ।
एकं प्रभुं त्रिभुवनेऽपि भवे भवेऽहम्
याचे शिवप्रतिभुवं ननु बोधिलाभम् ॥ ६

इति युष्मद्बहुव्रीह्येकवचनमयः प्रथमः श्रीपार्श्वस्तवः ।

॥ अर्हम् ॥

स्मृतिनिर्मितजनशान्ती महिमाढ्यावजितशान्तिनामानौ ।
नविकर्मीकुर्वेऽहं द्वितीयषोडशजिनौ समकम् ॥ १

पुष्पाद्यैर्महितत्वं परभागपरागभाग्भवेन्मर्त्यः ।
वृषभीभूतयुवां श्रीधर्मरथं श्रयति शिवगामी ॥ २

प्रिययुवया पुरुषेण प्राप्यन्ते शान्तिकान्तिधृतिमतयः ।
प्रतिपन्नप्रभुतुभ्यं जनाय भद्रं भवेन्नूनम् ॥ ३

नित्यं मनोधृतयुवन्नुर्नाऽन्यो जगति धन्यमूर्द्धन्यः ।
निजवित्तव्ययविषयीकृततव ऋद्धिः प्रवर्द्धेत ॥ ४

ध्यातश्रीविमलाचलतीर्थस्थितयुवयि भव्यता नियमात् ।
हे स्वस्वबोधकयुवां ! हृदि वसतं मे जिनाधिपती ॥ ५

नूतौ युवामजितशान्तिजिनौ मयेति
युष्मत्पदद्विवचनान्यपदैकतोक्त्या ।
श्रीनन्दिषेणगणिसंस्तुतपादपद्मौ
देयास्तमस्तविपदं सुखसम्पदं मे ॥ ६

इति युष्मत्पदद्विवचनबहुव्रीह्येकवचनमयो द्वितीयः
श्रीअजितशान्तिस्तवः ।

॥अर्हम् ॥

कल्याणकदिनपञ्चकसुरपतिततिविहितदिव्यमहिमानः ।
स्तुतिगोचरीक्रियन्ते मया जिना ध्वस्तसमवृजिनाः ॥ १

हृद्भक्तिगोचरानीतत्वं स्यादासन्नसिद्धिकः ।
सङ्कटेऽप्युत्कटे ध्यातयुष्मां नाऽऽयाति दुःखिता ॥ २

प्रासादस्थापितस्वर्णरूप्यादिमययुष्मया ।
निर्मीयन्ते नरेणौच्चैः स्ववशाः सर्वसम्पदः ॥ ३

अङ्गाद्यर्चाराधिततुभ्यं कः श्लाघते न देहभृते ? ।
आभरणमालभारीकृतयुष्मद् भाग्यवान् कोऽन्यः ॥ ४

अभिष्टुततवाऽष्टाऽपि सिद्धयः स्युः सहर्द्धयः ।
सम्यग्विधिसमाराद्धयुष्मयि स्युः श्रियः स्थिराः ॥ ५

ध्यातृध्येयोभयीभूतयूयं जीयास्त हे जिनाः ! ।
युष्मच्छब्दबहुत्वाऽन्यपदैकवचनस्तुताः ॥ ६

संस्तुत्य भक्तिभरतो वृषभादिमान् श्री-
वीरान्तिमान् जिनपतीनिततीतदोषान् ।
श्रीज्ञानसागरगतप्रवरार्थसार्थ-
लीलावगाहनकलाबलमेव याचे ॥ ७

इति युष्मत्पदबहुवचनान्यपदैकवचनगर्भः
साधारणजिनस्तवस्तृतीयः ।

॥ अर्हम् ॥

कृपया प्रकटीकृताखिलव्यवहारोत्तमधर्मसत्पथम् ।
प्रथमं जिननायकं मुदा विनयेन स्तुतिकर्मतां नये ॥ १

श्रुतत्वां मे श्रुती धन्ये दृष्टत्वां चक्षुषी स्तुवे ।
कराभ्यां चर्चितत्वाभ्यां कृताऽर्थोऽस्मि जिनेश्वर ! ॥ २

अभितः कृपाणधाराप्रतिफलनवशत्रिरूपितत्वाभ्याम् ।
त्वद्भक्त्या धरणेन्द्रो नमिविनमिभ्यामदाद् विद्याः ॥ ३

जटाभ्यां शोभितस्वर्णवर्णत्वाभ्यां तवांसयोः ।
श्रीर्मेरोः पार्श्वयोर्नीलवनालीभ्यामिवाऽभवत् ॥ ४

द्रव्यभावतमोरुद्धदृष्टेर्दिष्ट्या मम प्रभो ! ।
सूर्येन्द्वोरुदयो भूयात् स्वविभादर्शितत्वयोः ॥ ५

जन्मस्नात्रमहानन्दपदलाभार्हितत्वयोः ।
अष्टापदाद्र्योः केषां न सतां निविशते मनः ॥ ६

युष्मत्पदैकवचनान्यपदद्विवचनवचोविरचनेन ।
स्तुत इति मया प्रदेयाः प्रवचनचातुर्यमाद्यार्हन् ॥ ७

इति युष्मदेकवचनबहुव्रीहिद्विवचनप्रयोगसुभगः
श्रीऋषभस्तवस्तुरीयः ।

॥ अर्हम् ॥

पार्श्वसुपार्श्वाभिख्यौ फणमणिघृणिगणविभासिताकाशौ ।
स्तोष्ये ऋभुक्षिमुख्यस्तुतपदपद्मौ जिनौ भक्त्या ॥ १

स्यातां प्रमोदपुष्ट्या दृष्टयुवां स्त्रीनरौ विमलदृष्टी ! ।
मधुरस्वरगीतयुवां वाग्माधुर्यं सदाऽभ्येति ॥ २

उपासितयुवाभ्यां च लभ्यते भुवनेशता ।
भक्त्या प्रणतयुवाभ्यां वासवोऽपि नमस्यति ॥ ३

ऊरीकृतयुवाभ्यां नो दूरे लोकाग्रगं पदम् ।
सुप्रभूभूतयुवयोर्दासायन्ते सुरद्रवः ॥ ४

मनसि न्यस्तयुवयोर्लसन्त्यखिलसम्पदः ।
विभक्तिसप्तकेनैवं स्तुतौ श्रीजिननायकौ ॥ ५

युष्मत्पदान्यपदगद्विवचनगर्भोक्तियुक्तिरम्येण ।
स्तवनेन संस्तुतौ स्तां पार्श्वसुपार्श्वौ प्रसन्नौ मे ॥ ६

इति युष्मच्छब्दबहुव्रीहिद्विवचनगर्भः श्रीपार्श्वसुपार्श्वस्तवः पञ्चमः ।

॥ अर्हम् ॥

कल्पद्रुचिन्तामणिकामधेनुमुख्यार्थसार्थाधिकयत्प्रणामान् ।
जिनाँस्त्रिलोकीजनितांह्रिपूजान् भूजानिवंशप्रभवान्नुवामि ॥ १

स्थितनामद्रव्याद्यात्मकयुष्मां रोदसी बुधश्लाघ्ये ।
तुष्यन्ति गीतयुष्मां न के नराः किन्नरौ श्रुत्वा ? ॥ २

आशातितयुष्माभ्यां स्त्रीनृभ्यां लभ्यते न किं दुःखम् ? ।
आराधितयुष्माभ्यामभ्यायान्ति स्वयंवराः कमलाः ॥ [गीतिः]३

पथिषु स्मृतयुष्माभ्यां पलायते निखिलभीतिरतिदूरम् ।
पित्रोः सुत्रामाऽपि प्रणमति स्तुतयुष्मयोः पादौ ॥ ४

युष्मास्विव मम भक्तिः स्वात्मैकत्वाप्तयुष्मयोर्भूयात् ।
युष्मद्बहुवचनान्यद्वित्वोक्त्यैवं जिना नूताः ॥ ५

इत्थं स्तुत्वा सर्वतीर्थाधिनाथान् भव्यप्राणिप्रार्थितार्थामरद्रून् ।
दुःखोच्छेदं कर्ममर्मक्षयं स्नागन्तातीतं बोधिलाभं च याचे ॥ ६

इति युष्मच्छब्दबहुवचनबहुव्रीहिद्विवचनगर्भः साधारणजिनस्तवः षष्ठः ।

॥ अर्हम् ॥

सर्वान् सार्वान् रागरोषादिदोषैस्त्यक्तान् युक्तान्मुक्तसङ्ख्यातिशेषैः ।
हर्षादीडे व्रीडया पीडितोऽपि स्वाविज्ञत्वोद्भूतया भूतनाथान्॥१

अभिविजितयुष्मां कं मोदयेतां न चामरे ।
सदासेवितयुष्मां च देवदेव्यौ स्मराम्यहम् ॥ २

ज्ञानक्रियाभ्यां भव्यानां मोक्षसौख्याभिलाषिणाम् ।
देशकीभूतयुष्माभ्यां संसारः सुतरो भवेत् ॥ ३

अच्युतसुखान्तसत्फलदात्रीभ्यां द्रव्यभावपूजाभ्याम् ।
विषयीकृतयुष्माभ्यां प्रयतेत श्रावको न हि कः ? ॥ ४

व्याख्यानोद्युक्तयुष्माभ्यां धर्माभ्यां भव्यजन्तवः ।
तीर्णास्तरन्ति मोहाब्धिं तरिष्यन्ति तथा न के ? ॥ ५

साधयेन्निर्मलं धर्मं निश्चयव्यवहारयोः ।
मर्यादामनतिक्रामन् दर्शकीभूतयुष्मयोः ॥ ६

द्रव्यपर्यायनययोः प्रमाणीकृतयुष्मयोः ।
स्थितो भूपसभे वादी जल्पन्नाप्नोति वै जयम् ॥ ७

युष्मच्छब्दबहुत्वान्यपदद्वित्वोक्तिभिः स्तुता एवं ।
श्रीज्ञानसागरत्वं देयासुः सर्वसार्वा मे ॥ ८

इति युष्मच्छब्दबहुवचनबहुव्रीहिद्विवचनप्रयोगमय-
साधारणजिनस्तवः एष वा षष्ठः ।

॥ अर्हम् ॥

रैवताचलशृङ्गारं भृङ्गारं ज्ञानवारिणः ।
श्यामलच्छायमिच्छामि श्रीनेमिं स्तोतुमादरात् ॥ १

शिष्यीभूयानुयूयं ये भव्यास्ते नात्र संशयः ।
सम्यग्दृक्त्वादभित्वांश्च भजन्ति त्रिदशा विशः ॥ २

प्रियत्वाभिर्नरैरुच्चैर्मुच्यते विषयस्पृहा ।
रुचिगौचरितत्वभ्यं न रोचन्तेऽन्यतीर्थिकाः ॥ ३

निरन्तराविस्मृतत्वन्नश्यन्ति सकलारयः ।
ध्यानाधीनीकृतत्वाकं पादान्नमति विष्टपम् ॥ ४

नरेषु नायकत्वासु न स्याद्भवरिपोर्भयम् ।
एवं युष्मत्पदैकत्वान्यबहुत्वोक्तितो मया ॥ ५

श्रीमान् देवः शिवासूनुरानीतः स्तुतिगोचरम् ।
ब्रह्मविद्यामयं दद्यात् प्रसद्यात्मपदं मम ॥ ६

इति युष्मच्छब्दैकवचनान्यपदबहुत्वगर्भः श्रीनेमिस्तवः सप्तमः

॥ अर्हम् ॥

भवपङ्कपतज्जन्तुजातोद्धारधुरन्धरौ ।
स्तुवे जिनौ विदेहस्थौ सीमन्धरयुगन्धरौ ॥ १

स्वामिताङ्कितयूयं याः प्रजास्ता भाग्यभाजनम् ।
भावेनोपासितयुवान् स्तुवे सेवकपुङ्गवान् ॥ २

प्रथमं शिबिकारूढव्यूढयुवाभिर्नृभिस्तपस्यायाम् ।
इन्द्रेभ्योऽप्यखिलेभ्यः प्राधान्यं प्राप्यते स्म खलु ॥ ३

याचकेभ्योऽपि भद्रं स्ताद्वार्षिकत्यागपर्वणि ।
स्वहस्तदायकीभूतयुवभ्यं वाञ्छिताऽवधि ॥ ४

प्रदक्षिणीकृतयुवत् केवलिभ्यो भवत्सभाम् ।
संश्रितेभ्यो विदुः स्पष्टं के न वैनयिकक्रमम् ? ॥ ५

स्वविहारक्रमपावकयुवाकमुर्वीं महाविदेहानाम् ।
स्पृहयेद्बुधो न कस्कः सदा वहन्मोक्षनगरपथाम् ॥ ६

अवतीर्णतरुणतरणिप्रभप्रभास्वरयुवासु भूमीषु ।
तिमिरं न संशयमयं तिष्ठति भव्याङ्गिहृदयगतम् ॥ ७

अन्योऽन्योपमितयुवां युवां जिनाधीश्वरौ ? विजेज्याथाम् ।
आव्योमसोमसूर्यं महाविदेहाभरणभूतौ ॥ ८

सीमन्धरप्रभुयुगन्धरनामधेयौ
भक्त्या स्तुतो जिनवरौ युगपन्मयेति ।
अत्राप्यवाप्तजनुषः सुकृताऽशिषं त्वाम्
दत्तां मम प्रमदतो नमतोऽनुवेलम् ॥ ९

इति युष्मच्छब्दद्विवचनबहुव्रीहिबहुवचनप्रयोगगर्भः
श्रीसीमन्धरयुगन्धरस्तवोऽष्टमः ।

॥ अर्हम् ॥

यद्गुणस्तवने नालम्भूष्णवो योगिनोऽपि हि ।
तान् किलाऽखिलसर्वज्ञान् स्तोष्येऽहकमपि प्रभून् ॥ १

ये स्युः परिवृतयूयं निर्वृतभूयं भजन्ति ते शिष्याः ।
हृदयास्थाक्रोडीकृतयुष्मान्नाराध्यति नरान् कः ॥ २

दृष्टैः कः शशिविशदैस्त्रिकैरधिचतुर्दिशं दिव्यैः ।
छायास्थितयुष्माभिश्छत्रैः पात्रीभवेन्न मुदाम् ॥ ३

मध्यासितयुष्मभ्यं पर्षद्भ्यो द्वादशभ्य इह भव्यः ।
परिमुक्तनित्यवैरादिभ्यः श्लाघेत को न जनः ? ॥ ४

संसद्यनुकृतयुष्मन्मूर्त्तिभ्योऽन्याभ्य इह सुरकृताभ्यः ।
यौष्माकमूलमूर्त्तेर्भेदं न विवेद विदुरोऽपि ॥ ५

अन्तर्मृगेन्द्रविष्टरनिविष्टयुष्माकमुत्तमाः पुरुषाः ।
प्राकाराणां त्रितयीं रम्यां के नो दिदृक्षन्ते ? ॥ ६

संमुखनिविष्टयुष्मास्वनल्पसोपानपङ्क्तिषु सुखेन ।
आरोहन् समवसृतौ बालो वृद्धोऽपि न श्राम्येत् ॥ ७

ज्ञानातिशयगुणर्द्ध्या भरतैरावतविदेहसर्वजिनाः ।
अन्योऽन्यतुलितयूयं मम यूयं दत्त शिवसौख्यम् ॥ ८

युष्मत्पदान्यपदसत्कबहुत्वगर्भ-
मुग्धोक्तिभिः स्तुतिपथं गमिता मयेत्थम् ।
श्रीज्ञानसागरसमाः समतीर्थनाथाः
श्रीसोमसुन्दरगुणा ददतु प्रसादम् ॥ ९

इति युष्मच्छब्दबहुव्रीहिबहुवचनगर्भः सर्वजिनस्तवो नवमः ।

एवं च समाप्ता युष्मच्छब्दत्रिषष्टिरूपरचनाञ्चिता
क्षुल्लादिबुद्धिव्युत्पत्तये
तपागच्छाधिराजश्रीसोमसुन्दरसूरिभिर्विरचिता नवस्तवी ॥

पू.आ. श्रीसोमसुन्दरसूरिविरचिता

# ८. ॥ अथास्मच्छब्दरूपाङ्किता नवस्तवी ॥

॥ अर्हम् ॥

जिनं निरस्तवृजिनं भाजनं गुणसम्पदाम् ।
कृपापण्यापणं नाथं किञ्चिद्विज्ञपयाम्यहम् ॥ १

विडम्बिताऽहं मोहस्त्वां बाधते देव ! न क्वचित् ।
स्वदासीकृतमां कामं निकामं त्वं निहंस्यहो ! ॥ २

सेवकीभूतरोराभमयेन्द्रोपासित ! त्वया ।
न द्रुतव्यं यतः सन्तो राजरङ्कसदृग्दृशः ॥ ३

सर्पादिरूपतानीतमह्यं रोषाय न त्वया ।
ददेऽवकाशलेशोऽपि युक्तं सेवकवत्सलः ॥ ४

नारकीभूतमत्पापात् पाहि स्वं सेवकं जनम् ।
अनुगामिममार्हंस्ते भाविनी विहृतिः कदा ! ॥ ५

अनुकम्प्याश्रितमयि त्वयि नाथे प्रसन्नता ।
भूयादवश्यं देव ! स्यां फलेग्रहिजनुर्यतः ॥ ६

अस्मत्पदान्यपदयोरिति जिन ! नूतस्त्वमेकवचनेन ।
निजपदपङ्कजसेवाहेवाकितया कृतार्थय माम् ॥ ७

इति अस्मद्बहुव्रीह्येकवचनप्रयोगगर्भः स्तवः प्रथमः ।

॥ अर्हम् ॥

सुरासुरेन्द्रौ निस्तन्द्रौ कल्याणसमयागतौ ।
हर्षोन्निद्रौ जिनेन्द्राऽग्रे विज्ञप्तिं तनुतो यथा ॥ १

एवंविधर्द्धि प्राप्ताहमर्हणा पदयोस्तव ।
विनयावहिताऽऽवां त्वां निषेवन्ते न के नराः ? ॥ २

येन ब्रह्मादयोऽप्येते किङ्करीभावमापिताः ।
विगोपितावया तेन रागेण न जितो भवान् ॥ ३

भूयो भ्रमितमह्यं त्वं परतीर्थिकवादिने ।
विश्वार्च्यो रोचसे नैव घूकायार्क इव प्रभो ! ॥ ४

प्रबोधितावद्भावत्कविशुद्धागमभाषितात् ।
प्रबुद्धाः साधयामासुर्महानन्दपदं न के ? ॥ ५

निष्पत्त्युद्यतमम ते समवसृतेर्भुवि समं समासीनाः ।
बाधां न बुबुधिरे जन्तुकोटिकोट्योऽपि चित्रमिदम् ॥ ६
(जघनविपुला ।)

अनन्तदर्शनज्ञानवीर्यानन्दमयात्मनि ।
तृणप्रायावयि पदे परमेऽवस्थितो जय ॥ ७

अस्मच्छब्दद्विवचोऽन्यपदैकवचनःप्रपञ्चरुचिरेण ।
स्तवनेनाऽनेन नुतः प्रभो ! प्रसीद त्वमचिरेण ॥ ८

इति अस्मच्छब्दद्विवचनबहुव्रीह्येकवचनमयः
साधारणजिनस्तवो द्वितीयः ।

॥ अर्हम् ॥

उदितज्ञानदिनकरं विदांवरैर्वर्ण्यमानगुणविभवम् ।
समसमयमिन्द्रनिवहाः स्तुवन्ति भक्त्या जिनं वीरम् ॥ १

सकलातिशयसमृद्ध्या सर्वजिनोत्कृष्टतामवाप्नोति ।
सेवासक्ताहमहो ! धत्से नोत्सेकलेशमपि ? ॥ २

जननजरामरणोच्छलदतुच्छकल्लोलमालया कलितम् ।
निर्मग्नास्मां संसारसागरं तीर्णवान् भगवान् ॥ ३

पारप्राप्ताऽस्मया जज्ञे मन्ये दुःखाब्धिनाऽधुना ।
लभामहे महेश ! त्वद्दर्शनं पावनं यतः ॥ ४

दूरेऽपि सदनुष्ठानं कृतं जीवदयादिकम् ।
ईदृक्श्रीप्राप्तमह्यं त्वद्भक्त्यायेव हि कल्पते ॥ ५

यदर्ज्जितं भवेऽनादौ कषायविषयादिभिः ।
चिरं विधुरिताऽस्मत् प्राक् तस्मात् त्रायस्व कर्मणः ॥ ६

पत्तीयितमम सेवकजनदत्तात्मीयपदसदृशऋद्धेः ।
योगक्षेमविधायक ! तव नायकतामभीप्सामः ॥ ७

प्रकटीकृतजगतीगतजीवाजीवादिभावसद्भावे ।
सुज्ञायकीकृताऽस्मयि तवागमे स्ताद्रतिर्नित्यम् ॥ ८

अस्मच्छब्दबहुत्वाऽन्यपदैकत्वाङ्कितार्हतः ।
श्रीज्ञानसागरस्याऽस्तु स्तुतिरेखा सुखाय नः ॥ ९

इति अस्मच्छब्दबहुवचनबहुव्रीह्येकवचनप्रयोगमयः
श्रीवीरस्तवस्तृतीयः ।

॥ अर्हम् ॥

अर्बुदगिरिवरभूषणमदूषणं प्रथम तीर्थकरनाथम् ।
स्तुतिपथमानेताऽस्मि प्रसृमरमहिमानमतिमानम् ॥ १

कल्पद्रू इव ते पादौ मनोऽभीष्टार्थदायकौ ।
सेव्यावुपान्तविश्रान्तमां केषां नैव धीमताम् ? ॥ २

आसादि यत्प्रसादाद्धर्मः शिवशर्मकृद् भवदुपज्ञः ।
पितरौ तावभिवन्दे प्रसूतमां दुष्प्रतीकारौ ॥ ३

असाधारणसौभाग्यभवद्रूपनिरूपणे ।
भूयो व्यापृतमाभ्यां स्वचक्षुर्भ्यां सफलोऽस्म्यहम् ॥ ४

एतद्गिरिसत्काभ्यां त्वद्योगात्सर्वतीर्थभूताभ्याम् ।
मङ्गलमवनतमाभ्यामधित्यकोपत्यकाभ्यां स्तात् ॥ ५

चलनप्रवृत्तमाभ्यां त्वद्यात्राकरणक्षणे ।
एताभ्यामर्बुदोत्तंस ! पादाभ्यां पुण्यमाप्नुयाम् ॥ ६

यदा त्वद्दर्शनं लेभे दूरीभूतमयोस्तदा ।
तिर्यग्नरकदुर्गत्योः स्वप्नेऽपि व्यरमद्भयम् ॥ ७

त्वद्धर्मावाप्तितः पूर्वमनुत्पन्नमयोः किल ।
देवमानवसद्गत्योर्न वासं कः समीहते ? ॥ ८

इत्यस्मदेकवचननान्यपदद्वित्वोक्तिभिः स्तुतो वृषभः ।
देवोऽर्बुदगिरिमौलिः कलयतु लीलां मनोऽन्तर्मे ॥ ९

इति अस्मच्छब्दैकवचनबहुव्रीहिद्विवचनप्रयोगचारुः
श्रीऋषभस्तवश्चतुर्थः ।

॥ अर्हम् ॥

श्रीऋषभवद्र्धमानौ युगपत्पौरस्त्यचरमतीर्थपती ।
निभृतीभूय सुभक्ती इतीह जायापती नुवतः ॥ १

नेशते यद्यपीन्द्राद्याः स्तुत्यै तत्र तथाप्यहो ।
युवामुपस्थितावां ह्रीस्थानं नैव गुरुत्वतः ॥ २

यत्रार्च्येथे युवां युष्मद्धर्मश्च परिपाल्यते ।
कुलजाती पवित्रे ते जातावां स्तुवहे सदा ॥ ३

मूढावाभ्यामनिशं रागरुषाभ्यां जगज्जनमशेषम् ।
पीडितमवतामेनं प्रभू ! भवन्तौ दयावन्तौ ॥ ४

स्वायोग्यतया तादृग्विशिष्टकालेऽपि दूरितावाभ्याम् ।
अनिमित्तवत्सलाभ्यामपि विज्ञपयावहे किमु वाम् ? ॥ ५

मिथ्यात्वमहाम्भोधेर्निजागमप्रवहणार्पणादधुना ।
तीरानीतावाभ्यां परो युवाभ्यां कृपावान् कः ? ॥ ६

ऋजुवक्राज्ञयोर्योग्यं युवामन्तर्गतावयोः ।
विधिं पञ्चव्रतीमुख्यं दिशन्तौ न कथं हितौ ? ॥ ७

आद्यन्तयोश्चतुर्थारस्यानुचितावयोर्विमुक्तिपथे ।
सुवहेऽपि भवद्भ्यां नौ सिद्धं कार्यं न किं कुर्वः ? ॥ ८

इत्यानन्दपुरुस्थौ श्रीमन्नाभेयवीरतीर्थपती ।
स्तुत्वा कौचित् श्राद्धावार्जिजतां दम्पती पुण्यम् ॥ ९

अस्मत्पदान्यपदयोर्द्विवचनगर्भस्तवेन नुतिविषयम् ।
नीतौ जिनाविति मम प्रयच्छतां स्वच्छतां मनसः ॥ १०

इत्यस्मच्छब्दबहुव्रीहिद्विवचनगर्भ ऋषभवीरस्तवः पञ्चमः ।

॥ अर्हम् ॥

लोकान्तिकनाकिवरा जिनपुरतो मौलिमिलितभूमितला: ।
दीक्षासमयसमेता विज्ञप्तिं तन्वते मुदिताः ॥ १

अशक्तास्मां महाप्रज्ञावैभवेनापि केनचित् ।
स्तुतिपूजे विधातुं ते न शक्येते कदाचन ॥ २

गुणैर्विस्मायितास्मां त्वद्यतिसाध्वीजनौ कदा ।
प्रणंस्यामस्तवोपास्तिं कुर्वाणौ वह्निदिक्स्थितौ ॥ ३

निजगुणगणैरधरितास्माभ्यां सुस्त्रैणपौस्नवर्गाभ्याम् ।
सद्देशविरतिमद्भ्यां कदा विभास्यति सभा भवतः ॥ ४

कदा चान्तर्गतास्माभ्यां त्वद्व्याख्याक्षिप्तचेतसाम् ।
नरामराणां वृन्दाभ्यां न सुधाऽपि स्वदिष्यते ॥ ५

तवेश ! देशनाभ्यां द्विर्दिने के नेह देहिनः ।
प्रीतास्माभ्यां प्रपत्स्यन्ते सम्यक्त्वचरणादिकम् ? ॥ ६

निशादिवससम्बन्धिप्रतिक्रमणयोः क्रियाः ।
अत्यस्मयोः कदा देव ! भवान् प्रादुष्करिष्यति ?॥ ७

ध्यानयोर्दुर्गतिक्षिप्तास्मयो रौद्रार्त्तयोर्विभो ! ।
वर्त्तमानं जनं भव्यं निवर्त्तय दयानिधे ! ॥ ८

जय त्वं नन्द भद्रं ते धर्मतीर्थं प्रवर्तय ।
इत्यादिवचनैर्लोकान्तिकाः शंसन्ति यं विभुम् ॥ ९

स एषोऽस्मद्बहुत्वेनाद्वित्वेनान्यपदस्य च ।
स्तुत एवं जिनो देयान्निर्व्रणेचरणे रतिम् ॥ १०

इत्यस्मच्छब्दबहुवचनबहुव्रीहिद्विवचनगर्भो
लोकान्तिकदेवविज्ञप्तिरूपः साधारणजिनस्तवः षष्ठः ।

॥ अर्हम् ॥

श्रीऋषभवर्द्धमानौ चन्द्राननवारिषेणसञ्ज्ञौ च ।
शाश्वतजिनेश्वराननिति नवीमि चतुरोप्यचतुरोऽपि ॥ १

दूरस्थितवयं यूयं ध्यानेनासन्नतां गताः ।
प्रसीदत ममायोग्यस्याप्यचिन्त्यसुखार्पणात् ॥ २

अत्रस्थ एव वन्देहं साक्षाद्द्रष्टुमशक्तमान् ।
युष्मान्मानस एवेह व्यापारो हि सतां मतः ॥ ३

सम्पादनानलम्भूष्णुमाभिः पुष्पादिकैर्जिनाः ।
मर्त्यलोकासम्भविभिः पूज्यध्वे सर्वदा सुरैः ॥ ४

दर्शनपूजनवन्दनसेवादिमनोरथोच्छ्वसितमभ्यम् ।
युष्मभ्यं भद्रं स्तात् सनाप्यनाद्यन्तरूपेभ्यः ॥ ५

प्रत्यक्षाश्रितदेवेभ्यः परोक्षाश्रितमत्पुनः ।
युष्मद्भवेत्फलं तुल्यं सद्भावाद् उभयेष्वपि ॥ ६

सुलभं कृतपुण्यानां दुर्लभं पापिनां पुनः ।
युष्माकं सद्गुणास्वादलुब्धमाकं सुदर्शनम् ॥ ७

वागतिक्रान्तसौभाग्ययुष्मद्रूपकथास्वहो ! ।
अशक्तमासु सुत्रामादिमा अपि हि न क्षमाः ॥ ८

अस्मत्पदैकवचनान्यपदबहुत्वेन संस्तुता एवम् ।
मम ददतु शाश्वतजिनाः शाश्वतपदसम्पदं सपदि ॥ ९

इति अस्मच्छब्दैकवचनबहुव्रीहिबहुवचनगर्भः
शाश्वतजिनस्तवः सप्तमः ।

॥ अर्हम् ॥

सूर्येन्दू सविमानौ वन्दनहेतोरितौ मुदा नुवतः ।
कौशाम्ब्यां समवसृतं श्रीवीरं चरमतीर्थकरम् ॥ १

स्वतेजसा जितवयं चातुरूप्यभृतस्तव ।
धर्मचक्राणि चत्वारि दीप्यन्ते देशनाक्षणे ॥ २

आन्तराणि तमांसि त्वं भव्यस्वान्तगतान्यहो ।
अनीशतावानुच्छेत्तुं निर्णाशयसि सर्वतः ॥ ३

स्वामिन्ननुकृतावाभिर्भास्वद्धामण्डलैस्तव ।
चतुर्भिदेशनासद्म सदोद्योतं विराजते ॥ ४

सङ्कोचादिविशेषाप्रौढावभ्यं सदा स्मिताब्जेभ्यः ।
त्वच्चरणयुग्मसङ्गमपूतेभ्यः प्रणमति न कस्कः ? ॥ ५

प्राप्तत्वदुपास्तिभ्यो दिवसनिशाभ्यः शुभोदयकृताभ्यः ।
हेतूभूतावत् को नार्जयति स्वर्गमोक्षसुखम् ॥ ६

रसलयलीनावाकं त्वद्वचनानां सुधायमानानाम् ।
तृप्ताः कदापि न स्युर्भव्यजना बहु लिहन्तोऽपि ॥ ७

देव ! सदृग् नौ न रुचिः प्रियाप्रियावासु कमलकुमुदेषु ।
विश्वाप्रियस्य नु कृपारूपरुचिः सर्वसदृशी ते ॥ ८

स्तुतवन्तौ भक्त्यैवं यं देवं शशिरवी स मे वीरः ।
अस्मत्पदद्विचनान्यबहुत्वनुतस्तनोतु शिवम् ॥ ९

इति अस्मच्छब्दद्विवचनबहुव्रीहिबहुवचनमयः
सूर्येन्दुस्तुतिरूपः श्रीवीरस्तवोऽष्टमः ।

॥ अर्हम् ॥

श्रीवर्द्धमानमनघं सुरासुरा भक्तिभासुरा एवम् ।
गमयन्ति स्तुतिविषयं जिनेश्वरं समवसरणस्थम् ॥ १

बद्धा अपि महाकाव्यप्रबन्धैर्विबुधैर्गुणाः ।
प्रसरन्ति जगत्पीठे स्तवनुन्नवयं तव ॥ २

स्मृतमात्रा अपि घ्नन्ति विघ्नं सङ्घजनस्य ये ।
नामवर्णा न के जापरतास्मांस्तान् स्तुवन्ति ते ? ॥ ३

पद्मसञ्चारसंरब्धास्माभिर्मोहतमोहरैः ।
रविणेव त्वया पादैः को देशोऽद्योति न प्रभो ! ॥ ४

निर्मितिमुदितास्मभ्यं तव समवसृतौ प्रदीप्रवप्रेभ्यः ।
द्वादशयोजन्या अपि धन्याः के के न गच्छन्ति ? ॥ ५

पुरःस्थितास्मत्पर्षद्भ्यो वर्षति त्वयि गीःसुधाम् ।
सबाह्याभ्यन्तरस्तापो दवीयान् जायते प्रभो ! ॥ ६

चतुर्णामाननानां ते मोहितास्माकमीक्षणे ।
तृप्तिर्न जायते देव ! लावण्यामृतवारिधे ! ॥ ७

प्रातिहार्येषु निर्माणसुहितास्मासु ते प्रभो ! ।
स्पष्टं दृष्टेषु सदृष्टिः को न चित्रीयतेतराम् ! ॥ ८

अस्मत्पदबहुव्रीहिबहुत्वरचनाश्रितः ।
इत्यमर्त्यकृतो वीरस्तवः स्ताद्वास्तवश्रिये ॥ ९

इत्यस्मद्बहुव्रीहिबहुवचनमयः
सुरासुरविज्ञप्तिरूपः स्तवो नवमः ।
एवं च समाप्ताऽस्मच्छब्दत्रिषष्टिरूपचार्वी नवस्तवी ।

श्रीदेवसुन्दरगुरूत्तमशिष्यमुख्यश्रीज्ञानसागरगुरुक्रमपद्मरेणोः ।
श्रीसोमसुन्दरगुरोरिति युष्मदस्म-
दष्टादशस्तवकृतिः कृतिना मुदेऽस्तु ॥ १

एतामष्टादशस्तोत्रीमुद्युक्तो गुरुभक्तितः
अशोधयद् शुद्धबुद्धिः सोमदेवगणिर्गुणी ॥ २

इति श्रीतपागच्छाधिराजश्रीसोमसुन्दरसूरिभिः
क्षुल्लादिबुद्धिव्युत्पत्त्युपकारकौतुकितया कृता
अष्टादशस्तवाश्चिरं जीयासुः ।

सहस्त्रावधानि-पू.आ. श्री मुनिसुन्दरसूरिप्रवरप्रणीता

# ९. ॥ त्रिदश-तरङ्गिणी ॥

जयश्रिप्राप्तिसौभाग्य-श्रेयांसि ददतां सताम् ।
महोदयं समृद्धींश्च, श्रीजिनः कल्पपादपः ॥ १

शब्दरूपं मङ्गलाष्टकमाविष्कुर्वन् श्रीमहापर्वविज्ञप्ति-त्रिदशतरङ्गिणीप्ररोहमूलं पद्मह्रदतुलां कलयत्ययं श्लोकः ।

सान्द्रानन्दैः सुरेन्द्रैः प्रकटितमहिमोल्लासितश्रीप्रकर्षं,
दुर्गग्रन्थप्रमाथप्रथितविभुबलक्षिप्तदुष्कर्मशत्रु ।
एकान्तात्यन्तसाताभ्युदयि विजयते केवलं यस्य राज्यम्,
त्रैलोक्यव्याप्यनन्तं स जयति भगवान् कोऽपि सर्वज्ञराजः ॥१

ध्यानाभ्यासप्रकर्षात् पवनसहचरीभूतचेतःप्रशान्ति,
सम्प्राप्यो (पाग्रजापात्) सहजनिरुपमानन्दसान्द्रप्रवो[बो]धैः ।
योगीन्द्रैः कुण्डलिन्यां नियमितमरुदापूरितब्रह्मरन्ध्रै-
र्ध्येयं यस्य स्वरूपं स जयति पुरुषः कोऽपि सर्वार्थवेदी ॥ २

यस्य ब्रह्मार्णवान्तर्विधिहरिपुरभिद्वज्रिमुख्यामराणां,
ज्ञानश्रेणी मुनीनामपि परिमिलिता निम्नगाऽऽलीव भाति ।
तेजांस्यादाय वाब्दा इव जलनिचयान् भानुवद् यातुविश्वं,
प्रीणन्ति(णाति) स्वावबोधं सकल-
भुवनवित् कोऽप्ययं नः प्रदेयात् ॥ ३

सिद्धानन्तगुणस्य यस्य विधिना प्रक्षालितस्याभितो,
व्याप्याशेषजगत्त्रयं स्थितवतो व्योमद्रहे ज्योतिषः ।
उत्तीर्णास्तुषराशयो ग्रहगणव्याजादमुष्य प्रभोः,
सर्वज्ञस्य पदावनुत्तरचिदानन्दाप्तये तोष्टुमः ॥ ४

सान्द्रानन्दमुपास्महे भगवतो निःश्रेयसश्रीपतेः,
सर्वज्ञस्य पदाम्बुजं निरवधौ प्रज्ञानदुग्धाम्बुधौ ।
अभ्रं शैवलतिवसा (क्षमा) धरगणाः शङ्खाद (य) यन्त्यर्णवाः,
पीयूषन्ति च मौक्तिकन्त्युडुगणा मीनन्ति विश्वानि च ॥ ५

सम्यक्तत्त्वप्रबोधेऽनघविधिनिरुपध्यातसाम्यैकसात्म्याद्,
हेयोपादेयचिन्ताव्यतिकरविधुरीभावमुल्लङ्घ्य वृत्तौ ।
सर्वोपाधिप्रणाशादुपरतसकलद्वन्द्वभूयो विवर्त्त-
स्तादृक् तैरेव लभ्यः क्षिपतु
सकलदृग्गोऽतिनिन्द्यां स विद्याम् ॥ ६

यत्सत्तां परिनिश्चिनोति विलसच्चिन्तारतस्यानुमा,
भावानामनुमानगोचरतया चाध्यक्षमानार्पणम् ।
शास्त्रोक्तार्थततेर्यथावदविसंवादित्वमप्युच्चकैः,
सर्वज्ञं तमुपास्महेऽस्तु कुमतध्वान्तप्रबोधाप्तये ॥ ७

आज्ञाराधनतत्परेषु विदधत् सम्यक्पदं निर्वृतो,
नाकश्रीललितान् दधाति विषयान् सन्न्यायमुद्रां दधत् ।
शुद्धोपायगुणप्रकर्षकलितं यच्छासनं राज्यव-
द्विश्वव्यापि जयत्यनन्तमहिमाधारः स सर्वज्ञराट् ॥ ८

इति-युगप्रधानावतारबृहत्तपागच्छाधिराजश्रीपरमगुरुश्रीदेवसुन्दर सूरिचरणकमलसौभाग्यगुणमहिमार्णवानुगामिन्यां विनेयजनपरमाणु श्रीमुनिसुन्दरमणिहृदयहिमवदवतीर्णविस्तीर्णगुरुप्रभावपद्महृदप्रभवायां श्रीमहापर्वविज्ञप्ति त्रिदशतरङ्गिण्यां प्रथमे नमस्कारमङ्गलस्रोतसि मङ्गलशब्दश्लोकसर्वज्ञाष्टकनामा प्रथमस्तरङ्गः ॥

यस्य ज्ञानसरोवरे निरवधौ वातोद्धुताम्भःकण-
प्रख्योडुप्रकरायितं जलजति व्योमाष्टकाष्ठादलम् ।
सूर्याचन्द्रमसौ मरालतुलनां धत्तश्च रातु प्रभु-
र्योगिध्यानपरम्परापरिचितश्रेयः स सर्वार्थवित् ॥ १

इति तरङ्गान्तराशीर्वादः, तरङ्गचूलाप्रायः ॥

एवं नित्यनिरञ्जनाव्ययपदं सर्वार्थसंवेदिनं,
शक्रालीमुनिसुन्दरस्तवगणैर्नूतक्रमं यः स्तुते ।
सर्वाभीष्टसुखोच्छ्रयैरविरतं स्फूर्जत्प्रमोदाद्वयो,
मोहद्वेषिजयश्रिया स लभते श्रेयोऽचिराच्छाश्वतम् ॥ २

इति तरङ्गप्रतिचूलाऽपि ।

देवा यस्य शिवश्रियस्त्रिजगतश्चेतांस्यतीता द्विधा,
ब्रह्मेशाच्युतचन्द्रभानुमघवन्मुख्याश्च तत्प्रार्थकाः ।
सर्वाशाप्रसृताः शतं च विदिताः शाखाः परानन्दचिद्-
रूपः कल्पतरुर्नवः स ददतां श्रेयो युगादिप्रभुः ॥ १

राज्यं सूनुषु दानमासनकलाज्ञानप्रभावांशकान्
यः कल्पद्रुमचन्द्रभानुमुनिसन्म (त्तीर्था) शकेषु न्यधात् ।
मन्ये मुक्तिपुरीं व्रजन् जनहितायैतानि तत्सन्तति-
ष्वाप्यन्ते ह्यधुनाऽप्यसौ विजयते श्रीमान् युगादीश्वरः ॥ २

मुक्तिर्यस्यप्रयातस्त्रिभुवनजनतोद्भूतदुःखार्तिताप-
व्यापध्वंसाय ध्मताजडिमजलनिधेर्नूनमादाय बिन्दून् ।
चिन्तारत्नं चकारामरतरुसुरभीकुम्भमुख्यांश्च भावान्,
स श्री नाभेयदेवो वितरतु परमानन्दसम्पद्विलासम् ॥ ३

विश्वं यस्यालवालो महिमभरतरोः कल्पवृक्षाश्च शाखा-
श्चिन्तारत्नानि पुष्पप्रकरसमुदयः कामकुम्भाःफलानि ।
सिक्ता ध्माताधिकूपाहृतजलनिभृतैर्वारिदस्फारकुम्भै-
र्जीयात् कश्चित्पुराणस्त्रिभुवनमहितः पुरुषोऽसौ युगादिः ॥ ४

बौद्धा बुद्ध इति प्रबुद्धमतयो ब्रह्मेति च ब्राह्मणाः,
विष्णुश्चेति च वैष्णवाः शिव इति ध्यायन्ति शैवाश्च यम् ।
अर्हन्नित्यपि चार्हतास्तदखिलध्यानैकविश्रामभू-
र्व्यक्ताव्यक्तगुणः स पातु भगवानाऽऽदिप्रभुः सर्वगः ॥ ५

श्रीनाभेः परितोष्टुमस्तनुभुवः पादान् क्षमाभृद्गुरोः
स्फूर्जन्नीतिनदीप्रवाहजनकस्योच्चैः पदं यच्छतः ।
वंशान् यत्प्रभवानसङ्ख्यसमयं सद्वृत्तपर्वोल्लस-
च्छश्वन्मौक्तिकसम्पदो गतमलत्रासाः समाशिश्रियुः ॥ ६

आज्ञां यस्य समस्तवस्तुनिकरः स्याद्वादमुद्रामयीं,
दण्डाद्वि[द्वि]भ्यदिव स्वभावविगमान्नैवातिचङ्क्रम्यते ।
वीक्ष्यैवैतदतिक्रमोद्भवफलं भव्योम-पद्मादिकं,
त्रैलोक्याधिपतिं स्तुमः सुरनराभ्यर्च्यं तमादिप्रभुम् ॥ ७

दुष्कर्मारिप्रमाथात् परममहिमकं सुप्रयुक्तैर्नयाद्यैः,
स्फीतीभूतार्थसूत्रं विभवसुखकरं रक्षणीयक्षमेव (मंवै) ।
धर्मं राज्यं च लब्ध्वा त्रिभुवनमहितं यत्प्रणीतं जनाः स्युः
स्तुत्या देवेन्द्रवृन्दैरपि स विजयते नाभिभूरादिनाथः ॥ ८

इति युगप्रधान० प्रथमे नमस्कारमङ्गलस्रोतसि,
श्रीयुगादिदेवस्तवनाष्टकनामा द्वितीयस्तरङ्गः ।

यो धर्म्मव्यवहारसङ्गतकलाः प्राक् शिक्षयन् प्राणिनो-
ऽशाशासीत् किल यां प्रकाशनकलां चन्द्रार्कदीपादिकाः ।
स्तामद्यापि निदर्शयन्ति भुवने ते प्रत्यहं लेशतः,
श्रेयो यच्छतु सादिमो जिनपतिर्विश्वेप्सितार्थप्रदः ॥ १

इति द्वितीयतरङ्गचूलाकल्पः श्रीयुगादिजिनाशीर्वादः ।

एवं नित्यनिरञ्जनाऽव्ययपदं श्रीमद्युगादिप्रभुं
शक्रालीमुनिसुन्दरस्तवगणैर्नूतक्रमं यः स्तुते ।
सर्वाभीष्टसुखोच्चयैरविरतं स्फूर्जत्प्रमोदाद्वयो,
मोहद्वेषि जयश्रिया स लभते श्रेयोऽचिराच्छाश्वतम् ॥ २

इति तरङ्गप्रतिचूलाऽपि

जयश्रियाऽऽश्रितकेवलरूपया,
दमलया मलयामल ! यातरूट् ।
जगति शान्तिजिनाऽमरपादप-
प्रतिमताऽतिमताऽतिमतान्तरुक् ॥ १

जितरवे तव वाणिसुधां पिबन्, वरमते रमते रमतेऽञ्जसा ।
अभिलषन् शिवसम्पदमत्र नो, नरमणी रमणी रमणीयके ॥२

त्यजसि नाथ ! कदाचन चेन्मनो,
दममना ममनाऽमम नायक ! ।
न विशतां मरुतां तदिदं श्लथ,
कमलयाऽमलयाऽऽमलयाऽऽलय ॥ ३

शमरथस्य न के तव धुर्यतां, मधुरयाऽधुरयाऽधुरयाद् गिरा ।
वशिगणेन यथा खलु तन्मनांस्यनवमानवमानव मा धूनात् ॥४

स्पृहयतो विषयांस्तव सर्वतो, विरतये रतये रतये न खे ।
अपहरन्ति धियं धिगिमेऽपि मे, परमता रमतारमतागमः ॥५

त्वदुपदेशरमान्मनसाविभो, शममयाममया मम याच्यते ।
गतभवेच्छमनन्तसुखामिमां, शिवरमां वरमांबर ! मां नय ॥६

सुतपसां गमसारतरागमाद् गमय मामयमामयमाश्रितम् ।
शिवरमाऽस्तु वशा विनतैव मे, प्रभवता भवता भवतारणा ॥७

वितरणे जगतां हितसन्तते-र्वितरता तरताऽतरतारक ! ।
शिवपदस्य जिनेश्वर ? सङ्गमं, परमया रमया रम यारमे ॥८

एवं स्तुतस्त्रिदशदानवमानवाऽर्च्यो,
भक्त्या जगत्त्रयपतिः सकलार्थवेदी ।
शान्तिर्जिनो भवभयार्त्तिहरो विलासं
देयान्महोदयपदाऽप्रतिमश्रियं मे ॥ ९

इति युगप्रधाना० नमस्कारमङ्गलस्त्रोतसि
श्रीशान्तिजिनयमकस्तवाष्टकनामा तृतीयस्तरङ्गः ॥

श्रीशान्तिर्जगदेकमङ्गलततिप्रोद्यल्लताकन्दल-
प्रोल्लासाम्बुधरो भवाद्भवभृतः पायान्नताऽऽखण्डलः ।
रूपस्यैव निरूपणार्थमदधाच्चक्षुःसहस्रं हरि-
र्वक्तुं यस्य गुणांस्तथोरगपतिर्जिह्वासहस्रद्वयम् ॥ १

इति तृतीयस्तरङ्गचूला श्रीशान्तिजिनाशीर्वादरूपा ॥

एवं नित्यनिरञ्जनाऽव्ययपदं श्रीशान्तिनाथं मुदा,
शक्रालीमुनिसुन्दरस्तवगणैर्नूतक्रमं यः स्तुते ।

सर्वाभीष्टसुखोच्चयैरविरतं स्फूर्जत्प्रमोदाऽद्वयो,
मोहद्वेषिजयश्रिया स लभते श्रेयोऽचिराच्छाश्वतम् ॥ २

इति तृतीयतरङ्गप्रतिचूला ॥

सुरासुरोर्व्वीश्वरराशिसेव्यं, विशालवीर्यं सुयशोविलासम् ।
शैवेयसार्वं शिवशीर्षहीरं, शैवश्रियः शंविसराय सेवे ॥ १

श्रितोत्सवः शंवरवैरिवारविलाससालावलिहव्यवाहः ।
यशःसरस्यां वरलेशलीलां, शिश्राय यस्येह सरोरुहारिः ॥ २

विशालसंसारविलासवार–वारीशशोषे रुषिरोवरोवः ।
सार्वेश्वरो रोषविलोल वीथि–शरीरिसर्वाशिवराशिवल्ली ॥ ३
वशेश्वरं सिंह इवासि हंसि
विश्वाविलांहोविसरं विहास्य (विहाय) ।
विहाशश्यास्य (विध्यस्य विद्धाशयमेव सा) वसावलिं
शिवश्रीविषयंयियासुः ॥ ४

अवार्यवीर्यालयविश्वविश्वाशोल्लासिवल्लीवरवारिवाह ! ।
उल्लासय स्वांह्रिसरोरुहस्य, सेवारसं यस्य शिवे यियासा ॥ ५

ईशास्य यस्योरुयशोविलासाः, शेषाहिहारेश्वरसावहेलाः ।
आशासु सर्वास्विह शार्वरालेः,
संशिश्रियुः सारशरारुलीलाम् ॥ ६

सुश्रेयसालीसरसीरुहेषु यो हेलिलीलः सुवशाविलासैः ।
सारैरवश्यः स्ववशी विवेश, शिवालयं शैशवशीलशीलः ॥७

शैवेयसार्वः स शिवश्रियं वो, रायाल्लयी शैलरसारुहेषु ।
सः सारवैरस्यहरः शरीरिराशेर्वयस्यो हरिवंशसूरः ॥ ८

स्तुतोऽपवर्गान्तरसंस्तवेन, भक्त्या मयाऽप्येवमुदारमोदात् ।
श्रीनेमिनेता भवतात् प्रसद्य, दाताऽपवर्गान्तरसम्पदां मे ॥ ९

इति युगप्रधाना० नमस्कारमङ्गलस्त्रोतसि
पञ्चवर्गपरिहारश्रीनेमिजिनस्तवाष्टकनामा चतुर्थस्तरङ्गः

नूनं येन जगद्विडम्बनपटुर्दासीकृतेशाच्युतः
कामोऽघानि तदाद्यभूच्चपलतादोषः श्रियः प्राग् न तु ।
सारापत्यवियोगजारतिभृतः स्थेमाहि मातुः कृतः ?,
श्रेयो रातु सुखाकृतत्रिभुवनः श्रीनेमिनाथः स वः ॥ १०

इति चतुर्थतरङ्गचूला श्रीनेमिजिनाशीर्वादरूपा ॥

अञ्जनश्यामलेनाऽपि येनाङ्गिनां,
तन्मयीभावमाप्तानि चेतांस्यहो ।
चारुवैशद्यमाबिभ्रते श्रेयसां,
सन्ततिं रातु नेमिर्जिनेन्द्रः स वः ॥ ११

इति चतुर्थतरङ्गस्य प्रतिचूलाऽपि

एवं नित्यनिरञ्जनाऽव्ययपदं श्रीनेमिनाथं मुदा,
शक्रालीमुनिसुन्दरस्तवगणैर्नूतक्रमं यः स्तुते ।
सर्वाभीष्टसुखोच्चयैरविरतं स्फूर्ज्जत्प्रमोदाऽद्वयो,
मोहद्वेषिजयश्रिया स लभते श्रेयोऽचिराच्छाश्वतम् ॥ १२

इति चतुर्थतरङ्गसमर्थनापङ्क्तिः ॥

जन्मस्नात्रे तु यस्माद्धुतमहिमभराऽद्वैतरूपस्य देह–
स्पृष्टैः पाथःप्रवाहैः सुरगिरिशिखरे प्रस्फुरद्भिः समन्तात् ।
जज्ञः सेकप्रभावादभिमतफलदाः कल्पवृक्षा अपीमे,
स श्रीदेवो (जगत्यां) जयति तनुभृतां चिन्तनाऽतीतदेयः ॥ १

पाथोर्थैर्वारिवाहैः किल सहगतया विद्युता वारिराशौ,
प्राप्तैः संयोगमाप्याम्बुनिधिहुतभुजाऽजानि पद्यानि वह्निः ।
लेभेऽसौ यत्प्रवृद्धिं कमठहठभरप्रेरिताऽकालकालः,
स्फूर्ज्जज्जीमूतमालोद्भवदऽतुलजलासारसिक्तोऽपि युक्तम् ॥२

चक्रे यस्योपरिष्टाद्भुजगकुलपतिः साक्षिणि ध्यानवह्नौ,
कैवल्यश्रीविवाहः फणमणिकिरणैर्मण्डपं मण्डिताशम् ।
दैत्येन्द्रश्चैष तेने जलधरपटलातोद्यनादान् विचित्रान्,
स श्रीपार्श्वप्रभुर्मे भुवनभयहरो रातु निःश्रेयसाप्तिम् ॥(यु.) ३

यस्य स्फारान्तरङ्गप्रसृमरतिमिरग्रासविज्ञानलीलां,
सप्तद्वीपद्युनाथाः फणिफणमणिभामण्डलव्याजभाजः ।
याचन्ते सेवमानाः सममिव मिलिता विष्टपप्रेष्ठदेष्टा,
पिष्टारिष्टारिकष्टः स भवतु भवतामिष्टसंसृष्टिपुष्ट्यै ॥ ४

यस्यापारप्रभावप्रवरजलनिधौ शर्करीभूय चक्रु-
श्चिन्तारत्नानि वासं त्रिदशघटगणाः कम्वुकीभूय चापि ।
नानारूपैश्च भेजे जलचरपदवीं देवधेनुः सुरद्रु-
श्रेणीतीरद्रुमत्वं प्रतिदिनममराः स्नातकत्वं च बभ्रुः ॥ ५

मन्त्रास्तद्घोषरूपास्ततिरपि ववृधे शीकरैरौषधानां,
वीचीनां चानुकारो बहुविधमभितो नर्तितानां मरुद्भिः ।
लिप्तैर्यन्त्रैश्च जज्ञुर्महिमगुणपदं तत्तदा द्योतिकानि,
स्यात् सेवा निर्मिता यन्नहि हि
सुमहतां निष्फला लेशतोऽपि ॥ (यु.) ६

नूनं यन्नाममन्त्रे सकलसुखरसाः संवसन्ति प्रकामं,
शब्दार्थानां च योगो लसति मम मनस्यत्र तादात्म्यमेव ।
एताः सद्यः स्फुरन्ति प्रकटमसुमतां यत्तदुच्चारमात्रात्,
पार्श्वो विश्वार्चनीयः स भवतु सुलभासेवनो मे सदाऽपि ॥ ७

विश्वत्राणप्रणालीप्रकटितकरुणाऽपारपाथोऽधिसारः,
सर्वाभीष्टार्थदानावगमितमहिमाम्भोधिरद्वैतधैर्यः ।
श्रीमान् विश्वावभासी फणमणिकिरणोल्लासिताशाप्रकाशः,
कुर्यात् पार्श्वप्रभुर्मे त्रिभुवनमहितोऽनन्तसम्पद्विलासम् ॥ ८

इति श्रीयुगपधाना० नमस्कारमङ्गलस्त्रोत्तसि
श्रीपार्श्वजिनस्तवनाष्टकनामा पञ्चमस्तरङ्गः ॥

धत्ते कल्पलता स्वमूर्तिसरसि प्रोद्यन्मणीपल्लवान्,
सप्ताहीन्द्रफणच्छलात्रिजगतीरक्षैकदीक्षागुरुः ।
सप्तद्वीपसमुद्रगाङ्गिनिकराभीष्टार्थदानाय यः,
स श्रीपार्श्वविभुस्तनोत्वविरतं श्रेयस्तर्तिं भाविनाम् ॥ १

इति पञ्चमतरङ्गचूला श्रीपार्श्वजिनाशीर्वादरूपा ॥

दशावतारो विमलाञ्जनद्युति-महाप्रकाशः सकलार्थदर्शनः ।
स्नेहक्षयान्निर्वृतिभाक् सुपावकः,
श्रीपार्श्वदीपोऽस्तु शिवश्रिये सताम् ।

इति पञ्चमतरङ्गस्य प्रतिचूला

एवं नित्यनिरञ्जनाऽव्ययपदं श्रीपार्श्वनाथं मुदा,
शक्रालीमुनिसुन्दरस्तवगणैर्नूतक्रमं यः स्तुते
सर्वाभीष्टसुखोच्चयैरविरतं स्फूर्ज्जत्प्रमोदाऽद्वयो,
मोहद्वेषिजयश्रिया स लभते श्रेयोऽचिराच्छाश्वतम् ॥ २

इति पञ्चमतरङ्गस्य समर्थनापङ्क्तिः ॥

अथ श्रीत्रिदशतरङ्गिण्यां प्रथमे मङ्गलस्रोतसि षष्ठः तरङ्गः ।

जयश्रीसदनं योऽभूद्, विजित्य मदनद्विषम् ।
महानन्दपदं वीरं, पञ्चभिस्तं स्तुवेऽक्षरैः ॥ १

रैरिरीरोरुरारोरे-रेराऽऽरारीराराुरा ।
राऽररं रारेऽरुरुरु-रररोरा ररीररा (रराररिः) ॥ २

सुराऽसुररसासारि-सारसाराऽरिराऽरसः ।
संसाररसरसीसूरु-सूरः संसारिसाररः ॥ ३

(यद्वा)-सुरासुररसासार-सारैररससंसरः ।
संसाररसरसीसारि-संसारिरसुरारिसः ॥ ४

वीरो वर्वरवीरारि-रवैरोर्वीवरो विराः ।
वारिरोरुवरारावो-रारवाराऽरिरीरवाः ॥ (मूलश्लोकः ४) ५

रायं रायं रिरीरायो, यां ययाऽऽर्याऽर्ययाऽऽययौ ।
रेराऽरियाऽरराऽऽरार्या-रेरोरोरूय रोरराः ॥(मूलश्लोकः ५) ६

माराऽऽरामामरोमोर्मि-रामामारममाररम् ।
मारीरामारमामार ! ररमारां ममामम ! ॥ (मूलश्लोकः ६) ७

ययीममायामयमाययौ य याऽऽयाय्यामयामयमाऽययेयः ।
योयूययायायममेयमाय-यामोमयायाऽमम मामयामः ॥ ८

संसारसंसारिसुरासुरेरा-सरेरसारैररसं ससार ।
सारैरसारैरुरुसारसारः, सुरारसासस्त्रिरुरेऽरिरंसः ॥ १०

इति विशेषसङ्गतः पाठः ।

अपरस्त्वेवम्-
संसारसंसारिरसारसारि-सारैरसारैररसं ससार ।
सुरासुरेरः सुरसासरोरु-रारासमासस्त्रि रसारिरंसः ॥ ११

वीरो रविर्वो वररो वरोरु, रुवीवरावारविवारिवारी ।
रैरोरवो वर्वरवीरवीरोऽ-वैरैरिरीरोरुवरोरवारः ॥ १२

एवं मया भासुरपञ्चवर्ण-सुवृत्तपुष्पैर्ग्रथितां सदर्थाम् ।
श्रीवीरनेतुः स्तुतिरूपमालां, बुधाः ! समादाय तमर्चयन्ताम्॥१३

अर्चन्ते चन्द्रचूडं यो, गुरुमग्रे तथाऽर्चति ।
अर्चयत्यनिशं विप्रान्, कर्णधारान् भवार्णवे ॥ १४

इति युगप्रधानावतार० श्रीपर्युषणापर्वमहाविज्ञप्तित्रिदशतरङ्गिण्यां द्व्यक्षरवृत्तैः पञ्चाक्षरश्रीवर्धमानस्तवनामा षष्ठः पुटभेदरूपस्तरङ्गः।

क्षिप्तैः सन्देहबाणैः सपदि तनुगतैः पीडयित्वा निबद्धान् ।
स्नेहोद्यत्पाशकैश्च स्ववशमधिगतीकृत्य मोहप्रदु(ह)ष्टैः ।
निश्शल्यान् यो विधाय स्ववचनसदयस्कान्तयोगाद् गणेशान् ।
हत्वा मोहं विमोच्य व्यधित निजभटान् वीरनेता स पातु ॥१५

इति षष्ठतरङ्गचूला ।

यस्यागमोत्थां पदपङ्क्तिमुज्ज्वलां,
दृष्ट्वा बुधा मुक्तिपुरीमुपेयुषः ।
श्रयेयुरद्यापि तदध्वनीनतां
वीरोऽवतात् सार्थपतिः स वो भवात् ॥ १६

इति षष्ठतरङ्गस्य प्रतिचूला ।

एवं नित्यनिरञ्जनाऽव्ययपदं श्रीवर्द्धमानं मुदा,
शक्रालीमुनिसुन्दरस्तवगणैर्नूतक्रमं यः स्तुते ।

सर्वाभीष्टसुखोच्चयैरविरतं स्फूर्जत्प्रमोदाद्वयो,
मोहद्वेषिजयश्रिया स लभते श्रेयोऽचिराच्छाश्वतम् ॥ १७
इति षष्ठतरङ्गसमर्थनापङ्क्तिः ।
अथचतुर्विंशतिजिनस्तवाऽऽशीर्वादनामा ह्रदः प्रस्तूयते-

जयश्रियं ज्ञानतपस्क्रियायुधै-रवाप्य दुर्वारतरान्तरद्विषाम् ।
पदं यदाऽऽपुः किल ये तदाप्तये,
जिनांश्चतुर्विंशतिमानवीमि तान् ॥ १

श्रीमानादिविभुः क्षमाधरकुले जातः सुवंशावली-
ष्वाद्यो मौक्तिकसम्पदेऽस्तु स सतां शाखाशतभ्राजितः ।
धर्मादिस्थितियष्टयो यदुदिताः स्फूर्जन्महिम्नोत्तरा,
जज्ञुर्मोहजरार्दितस्य जगतोऽप्याधारभूताः पराः ॥ २

ईशानः पुरुषोत्तमो जिनपतिर्ब्रह्मेति मुक्त्यर्थिभिः,
कल्पद्रुर्मरुतां घटः सुरमणिश्चैवं धनाद्यर्थिभिः ।
बन्धुस्त्राणमयं पिताऽथ जननी चैवं हिताद्यर्थिभि-
र्यो ध्यातस्तनुतात् सुखाकृतजगज्जन्तुः श्रियं सोऽजितः ॥ ३

श्रीशम्भवः स जीयात् प्रापयितुं शिवपुरं जवाद्भव्यान् ।
बिभ्रत् सार्थाधिपतां धत्ते योऽङ्कच्छलादश्वम् ॥ ४

बध्नाति चेतांसि गुणैस्त्रिलोक्या, मत्तोऽप्ययं जित्वरचापलानि ।
इतीव भीत्याऽङ्कनिभादुपास्ते,
यं वानरः पात्वभिनन्दनोऽयम् ॥ ५

कल्याणावलिमातनोतु भवतां निस्सीममाहात्म्यभृद्,
देवानामपि देवता स सुमतिः श्रीतीर्थलक्ष्मीपतिः ।

रूपं यस्य हरिः क्षमो न दशभिश्चक्षुःशतैर्वीक्षितुं,
विंशत्या रसनाशतैरपि धृतैर्वक्तुं गुणांश्चाऽहिराट् ॥ ६

त्यक्त्वा वारिरुहं जलाशयरतिः सेवां यदंह्रिस्फुर-
ल्लावण्यामृतपल्वलस्य कुरुते नित्यं यदङ्कच्छलात् ।
तत्पुण्येन लभेत तत्सुरनराधीशोत्तमाङ्गेष्वव-
स्थानं मुक्तिपदप्रदोऽस्तु भवतां श्रीमान् स पद्मप्रभः ॥ ७

स्फुरत्तरस्फारफणालिरूपिणी रत्नांशुजालैर्दधदिद्धपल्लवान् ।
यः पञ्चशाखः समभूत् सुरद्रुमः, स चिन्तितं रातु सुपार्श्वतीर्थकृत् ।

मन्ये भवाधःकृतिशक्तिमाप्तुं, प्राज्यं सिषिवे विधुरंह्रिलग्नः ।
तथैव यस्याऽऽकृतयोऽप्यभूवंश्चन्द्रप्रभः पातु जगन्ति सोऽर्हन् ॥

नैवामृतं प्रदददप्यजरामरत्व-
दाने क्षमोऽस्मि विभुरेष जिनस्त्विहापि ।
ध्यात्वेति याचत इवांह्रिगतोऽयमिन्दु-
स्तच्छक्तिमस्तु विधुलक्ष्मजिनः स भूत्यै ॥ १०

॥ इति तरङ्गचूला ॥

इतियुगप्रधाना० स्रोतसि चतुर्विंशतिजिनस्तवाशीर्वादहृदे
आद्यजिनाष्टकस्तवाशीर्वादनामा सचूलः सप्तमस्तरङ्गः ॥

अष्टमस्तरङ्गः ॥

देवानामवधिः स्फुरद्गुणनिधिः शुष्यद्भवाम्भोनिधि-
र्दुष्कर्मारिप्रधिर्जने हितविधिर्द्वेधा विमुक्तोपधिः ।
पातु श्रीसुविधिः सुरैर्वरविधिस्तुत्यः प्रभावोदधि-
र्येनोद्यत्सुखधिक्रियाकृदवधि क्रोधः सयोधो युधि ॥ ११

नरामरा बिभ्रति भृङ्गभूयं, यस्मिन् सदा योगिमनस्सरःस्थे ।
तनोत्वयं शीतलपादपद्मः, संसारतापप्रचयप्रणाशम् ॥ १२

श्रेयःश्रेणिमयं तनोतु भगवान्निःश्रेयसश्रीप्रभु-
र्निर्विश्रामसुरेशसंस्तुतपदः श्रेयांसनामा जिनः ।
सम्पत् कम्पपराङ्मुखा त्रिजगतो विश्रामभूश्चेतसां,
यन्नामस्मृतिमात्रतोऽपि भविनां पाणौ स्फुरत्यञ्जसा ॥ १३

सेवागतामरनरावलिपापवैरि-
प्रध्वंसनप्रगुणिता इव यस्य भान्ति ।
आग्नेयशस्त्रनिवहास्तनुकान्तिरूपाः,
पायाद् भवात् स भवतः प्रभुवासुपूज्यः ॥ १४

को नार्या जनितो विनाऽपि हि पतिं ? कस्मिन् भवेच्चन्दनं ?
का मान्या गृहिणां स्फुटा यदभिधा प्रश्नादिवर्णैर्भवेत् ।
कीदृग् ध्यानतपःश्रुतैर्जिनमतैः प्राणी भवत्यञ्जसे-
त्येवं च प्रतनोतु वः स भगवान्नामानुरूपां धियम् ॥
(वि+म+लः विमलः) १५

नेत्रश्रीर्जलराशिगूढविलसत्काम्यार्थरत्नोच्चयान्,
योऽभूद्दर्शयितुं पुराऽत्र विबुधव्रातस्य धत्ते च यः ।
पृथ्वीं कीर्तिततिं तथा सदमृतप्राप्तिर्यदाज्ञावशा,
पायाद् भोगिकुलोद्भवः शिवसदः श्रीमाननन्तप्रभुः ॥ १६

मङ्गलं प्रवितनोतु भाविनां, धर्मतीर्थपतिरामरद्रुमः ।
यत्प्रसादमहिमाणुजृम्भितं, चक्रिशक्रशिवशर्मसम्पदः ॥ १७

चिरस्य पीतेन्दुसुधाऽनुवादं, संवीक्षितुं यद्वचनामृतेन ।
सुधारुचेर्लक्ष्ममृगोऽङ्कदम्भाद्यं सेवते शान्तिरयं शिवाय ॥ १८

इतियुगप्रधा० हृदे
मध्यमजिनाष्टकस्तवाशीर्वादनामाऽष्टमस्तरङ्गः ।

नवमस्तरङ्गः ।

यः सूरजातोऽपि हि जीवमैत्र्यभाग्,
मेषाश्रितोऽप्याश्रयते महोच्चताम् ।
श्रीनन्दनश्चाप्यकरोद् भवक्षयं,
स कुन्थुनाथः पृथुसम्पदे सताम् ॥ १९

ध्वस्ताज्ञानभरः स्मरज्वरहरः सर्वेष्टसौख्याकरः,
क्षीणाशेषदरः क्रमानतनरप्रेयःशिवश्रीकरः ।
ब्रह्माद्वैतधरः समाश्रितपरत्रैलोक्यरक्षादरः,
कुर्यात् श्रीमदरः सतां गुरुतरश्रेयांसि तीर्थङ्करः ॥ २०

मल्लिर्जिनोऽसौ श्रियमातनोतु, श्रितः पदौ यस्य घटः सुराणाम्।
अङ्कं मिषन् सर्वमनोव्यतीत–प्रदानशक्तिं किल याचमानः ॥२१

पूर्वं कूर्मपतिश्चकार चलनोपास्तिं क्षमाभृद्गुरो–
र्यस्योद्धर्त्तुमिमां क्षमामभिलषंस्तच्छक्तिपाठाय नु ।
दृष्टश्चैष तथाकृतिष्वपि जनैश्चक्रेऽधुनाऽपीक्ष्यते,
श्रेयः श्रीमुनिसुव्रतः स तनुताद्वः कूर्मलक्ष्मा प्रभुः ॥ २२

स्थेयःश्रीभरदानशक्तिमतुलाँ यस्येक्षमाणः सदा
स्वस्मिंश्चापलपङ्कगर्हिततमां निन्दद्वसन्तीं रमाम् ।
स्थेष्ठां तां किल याचते पदयुगासेवाकृदङ्कच्छला–
न्नीलाम्भोजमयं तनोतु भविनां मुक्तिश्रियं श्रीनमिः ॥ २३

विश्वाहङ्कारभारज्वरहरणमहाभेषजैः काममुख्यै-
र्योधै रुद्धोपकण्ठ सबलमपि चिरं मोहभूपं वसन्तम् ।
निर्धाट्याऽप्येक एवोत्कटभटमुकुटो यः प्रविश्यौग्रसेनी-
चित्तोर्वीराजधान्यां स्वयमुषित इह श्रेयसे सोऽस्तु नेमिः ॥२४

वितरतु भवतां श्रीपार्श्वनाथः स मुक्तिं,
फणिपतिफणमालाश्लिष्टपादारविन्दः ।
कमठहठविमुक्तावारवारिप्रवाहै-
रपि सपदि यदीयो दिद्युते ध्यानवह्निः ॥ २५

यो वेदार्थविचारणायुधगणैर्हत्वा गणेशोल्लस-
न्मानप्रोन्नतचित्तदुर्गनिवहे सन्देहशत्रून् स्थितान् ।
प्रागेव प्रहतस्य मोहनृपतेर्मल्लानिव प्रोन्मदान्,
स्वान् सद्बोधनृपान् न्यवीविशदयं वः पातु वीरप्रभुः ॥ २६

एवं निर्णिक्तभक्त्या भरतभुवि चतुर्विंशतिर्वर्त्तमानाः,
संसारक्लेशभीतत्रिभुवनजनतात्राणदुर्गोपमानाः ।
नूता मुग्धस्तवेन त्रिदशपतिनुतास्तीर्थराजा ददन्तां,
तां शुद्धां बोधिलक्ष्मीं लसति मयि यतः केवलानन्दलीला ॥२७

एवं यो मतिमान् स्तुते जिनवरान् भक्त्या-चतुर्विंशतिं,
शक्रालीमुनिसुन्दरस्तवगणैर्नूतक्रमाम्भोरुहान् ।
सर्वाभीष्टसुखोच्चयैरविरतं स्फूर्जत्प्रमोदाद्वयो,
मोहद्वेषिजयश्रिया स लभते श्रेयोऽचिराच्छाश्वतम् ॥ २८

इतियुगप्रधाना० चरमजिनाष्टकस्तवाशीर्वादनामा नवमस्तरङ्गः॥
सम्पूर्णश्चायं चतुर्विंशतिजिनस्तवाशीर्वादनामा ह्रदः प्रथमः ॥

वक्ष्यमाणत्रयोविंशतिस्तोत्ररत्नेषु प्रथमं
रत्नमपीदमेवाष्टकत्रिकमयम् ।

सुखावहं वीक्ष्यसिताङ्गतामा-दरं विरक्तः शिवशर्म लात्वा ।
भव्यां गिरोरीकृतिमाप्य साधुयायीलये रङ्गभराद्रिपोऽते ॥ १

कारकषट्क-सम्बन्धक्रियारूपाऽष्टगुप्तकम् ।
'सुखावह' मित्यादि। अते-रिपो असिताङ्ग सहं वीक्षी शिवशर्म लात्वा भव्यां गिरा ऊरीकृतिमाप्य साधुयायीलये रङ्गभरात् अरं विरक्तः सुखौ अमात् ॥ १

विश्वत्रयीवन्द्यपदान्ति केन, न ते श्रितेन स्तवनं स्ववाण्या ।
न योगिनां हृत् सुजगत्प्रसिद्धैरमानिधे शुद्धगुणैश्च केषाम् ॥ २

क्रियाद्वयगुप्तकम् ।
'विश्वत्रयी'त्यादि । विश्वत्रयीवन्द्यपद !
स्ववाण्या तव स्तवनं श्रितेन केन योगिनां ।
हृत् न आन्ति हे अनिधे ! सुजगत्प्रसिद्धैः
शुद्धगुणैश्च केषां हृद् न अम ॥ २

जडैर्जिनाकाम(मि) कियन्निषेवितुं,
परो विना त्वां ग्रहिला ह्यमी ततः ।
व्यामोहभाक्त्वाददते शिवं न तत्,
तवैव विज्ञालिरयात् स्तुतौ बुधैः ॥ ३

क्रिया १ कर्तु २ क्रिया ३ रूपत्रिगुप्तकम् ।
'जडै' रित्यादि। त्वां विना परः जडैर्निषेवितुं कियत् अकामि, ततः ग्रहिला अमी, व्यामोहभाक् न शिवं न आददते तत् विज्ञालिः तवैव स्तुतौ बुधैरयात् ॥ ३

सेवां सदाज्ञाहित एव विस्फुरद्,
भयं त्यजद्विश्वमिहार्च्यते न यत् ।
इदं विभो ! वैरिहर ! त्वमेव तत्,
कथं विलम्बौ वनवीतकीलकः ॥ ४

क्रियात्रयकर्तृकर्मत्रयत्रयरूपनवगुप्तकम् ।
'सेवा'मित्यादि । हे अज्ञ ! अहित एव विस्फुरद् भयं त्यजत् सेवां सद (हे) अर्च्य ! ते विश्वमिदमनयत्, हे वैरिहर ! विभो ! त्वमेव वीतकीलकः विलम्बो कथं च न (?) ॥ ४

अर्हन्नस्ततमः पाप(पा)हित्वा मे भजतो मनः ।
देव त्वं नृपतारामा-लक्ष्मीभोगरसान् पुनः ॥ ५

कर्तु १ कर्म २ क्रियाद्वय ४ रूपचतुर्गुप्तकम् ।
'अर्हन्नस्ते' त्यादि । त्वां भजतो मे मनः हे अर्हन् । अस्ततमः पापाहि, देव नृपतार ! त्वं अलक्ष्मीभोगरसान् पुनः आरम (अम) ॥ ५

योऽध्वा शिवपथे तात ! प्रभ ! विष्टपपावनः ।
महिमानं नते सोऽपि, सुभक्त्याममम योचितः ॥ ६

क्रियाद्वयगुप्तकम् ।

'योऽध्वे'त्यादि तात प्रभ ! विष्टपप अव नो योऽध्वा शिवपथे, महिमानं नते सुभक्त्यां सोऽपि याः (य उचितः अम)
भवे सदाघे विशरारुरङ्ग-भाजः शिवायानतिमादरात्ते ।
साररमापाणिपयोरुहेषु, स्थेमानमेषां हि नयानि रम्याम् ॥ ७

क्रियाद्वयगुप्तकम् ।

'भवे'त्यादि । विशर ! सदाघे भवे येऽङ्गभाजः ते नतिं शिवाय आदरात् आरुः एषां हि पाणिपयोरुहेषु सारा रमाः रम्यां स्थेमानं नयानि ॥ ७

न याचे शक्रतां देव !, चक्रितां विभवं न च ।
विभो ! बेडावदानम्रं, भवाम्भोधेर्महाभयात् ॥ ८

क्रियागुप्तकम् ।

'न याचे'त्यादि । हे शक्रतांदेव । चक्रितां विभवं च न याचे महाभयात् भवाम्भोधेर्बेडावद् आनम्रं अव ॥ ८

गुप्तक्रियाद्यैरिति यं भवद्विषज्जयश्रिया वृत्तवरैः स्तुवे जिनम् ।
चित्तेऽस्तु मे नाम सदादिभेदतः,
स विश्वकालत्रितयं पवित्रयन् ॥ ९

एवं नित्यनिरञ्जनाऽव्ययपदं श्रीतीर्थनाथं मुदा,
शक्रालीमुनिसुन्दरस्तवगणैर्नूतक्रमं यः स्तुते ।
सर्वाभीष्टसुखोच्चयैरविरतं स्फूर्जत्प्रमोदाद्वयो,
मोहद्वेषिजयश्रिया स लभते श्रेयोऽचिराच्छाश्वतम् ॥ १०

इति-युगप्रधाना० स्त्रोतसि क्रियादिगुप्तकरूपविश्वकालत्रय-व्यापिजिनस्तवाष्टकनामा दशमस्तरङ्गो द्वितीयपुटभेदरूपः ॥

## एकादशस्तरङ्गः ।

जय श्रीमन् ! पार्श्व ! त्रिभुवनविभो ! विश्वजनता
स्फुरद्विघ्नध्वान्तप्रहणनतवोष्णांशुरमला ।
शरण्या भीतानां सकलजगतां वज्रनिलयः
स जीरापल्लीस्थः प्रकटमहिमाम्भोधिरतुलः ॥ १

काले ह्यस्मिन् कराले कवलितसकलोद्दामदेवप्रभाव-
प्रोत्तुभ्यत्सर्वदेशे प्रबलखलजने दुःखिताशेषसाधौ ।
व्यावल्गन् म्लेच्छमालाबहुलकलकलोच्छालिताकालकाले,
दीनानां नीतिभाजां जयसि भवभृतां रक्षितैकस्त्वमेव ॥ २

मन्त्राणां न प्रभावः प्रभवति न विभो ! संस्तुतिः काऽपि दैवी,
नौषध्यो विध्यापात्रा (द्ययाढ्या) अपि महिमभृतः
कालरूपाश्च भूपाः ।
उद्यद्रोहप्ररोहप्रवणमतिजुषः शम्पुषः स्वाजनानां,
हा ! हा ! भूतस्तदेवं जगति मतिमतां त्राणमेकोऽसि पार्श्व ! ॥३

भ्रश्यद्भ्रूभङ्गभीतभ्रमदसुरगणैः क्षुब्धबिभ्यत्त्रिलोके,
त्रस्यद्दिग्मत्तनागे व्यथितफणिपतौ सैन्यघोषोग्रभारात् ।
शस्त्रज्वालावलीढप्रतिभटविकटं कम्प्रभूध्रोच्चलाब्धौ,
विश्वाश्चर्यं भट त्वं प्रकटमकृत यः शाखिसंस्फोटकाले ॥ ४

माद्यन्मातङ्गमालागिरिकलकुलितं तुङ्गरङ्गत्तरङ्ग-
श्रेणीकल्लोललोलद्विपुलबलचलत्पत्तियादःकलापम् ।
योऽमथ्नान् म्लेच्छजालान् कपटजलनिधिं सोऽर्च्यतां पार्श्वनाथः,
सर्प्पच्छीखीन्द्रदर्प्पज्वरभरसदपस्मारधन्वन्तरिश्रीः । ५

अर्थतो युग्मम् ॥
वाला वेतालमाला बहुलबलकला भूमिपालाः शृगाला,
व्यालाश्चाम्भोजनालान्यनधिकृतितयाऽम्भोधयो व्याधयो वा ।
पञ्चास्याश्चाप्तदास्या ह्यनुकृतपशवः प्राणिनां दस्यवः स्यु-
र्जेत्रा यन्नाममन्त्रान् स जयति भगवान् जीरिकापल्लिपार्श्वः ॥६

स्वल्पः कल्पद्रुगणविभवः सम्भवः स्वर्गवीनां,
मिथ्या तथ्या न सुरमणयश्चालयः सन्महिम्नाम् ।
मन्त्रैः स्तोत्रैः किमिह भविनां भाविनां पार्श्वनाथो,
वासं त्रासं गमितदुरितः संश्रितश्चेन्मनस्सु ॥ ७

रत्तत्धत्तप्या (रत्नत्रय्याप्य) सौख्यं प्रददद‌भयदः सादरं भोगिभर्ता,
पुत्री० ती विधत्ते सततमीव सुखं चापि पद्मावतीह ।
स्तोतारं यस्य विश्वत्रिदशपरिवृढप्रौढपूजास्पदस्य,
श्रीमान् पाश्र्वो मम स्तादभिमतफलकृज्जीरिकापल्लिमौलिः ॥८

एवं नित्यनिरञ्जनाऽव्ययपदं श्रीपार्श्वनाथं मुदा,
शक्रालीमुनिसुन्दरस्तवगणैर्नूतक्रमं यः स्तुते ।
सर्वाभीष्टसुखोच्चयैरविरतं स्फूर्ज्जत्प्रमोदाऽद्वयो,
मोहद्वेषिजयश्रिया स लभते श्रेयोऽचिराच्छाश्वतम् ॥ ९

इतियुगप्रधाना० स्रोतसि जीरापल्लीपार्श्वस्तवनाष्टकनामा
एकादशस्तरङ्गः ॥

द्वादशस्तरङ्गः ।

कलाक्रान्ता कान्ता न विषयमिता वाङ्मनसयोः
समुन्मीलत्सान्द्राऽनुपरमदया(चिदा)नन्दविन(भ)वा ।
निरूपा योगीन्द्रैः सुविशदधिया यात्यवहितै-
रियं रूपं यस्याः श्रुतजलधिदेवी जयति सा ॥ १

चञ्चत्कुण्डलिनीनिरुद्धपवनप्रोद्दीपितप्रस्फुरत्-
प्रत्यग्ज्योतिरिनांशुभासितमहा हृत्पद्मकोशोदरे ।
शुद्धध्यानपरम्परापरिचिता रंरम्यते द्योमिन्मं (द्योऽमितं),
या हंसीव मयि प्रसत्तिमधुरा भूयादियं भारती ॥ २

या पूज्या जगतां गुरोरपि गुरुः सर्वार्थपावित्र्यसूः,
शास्त्रादौ कविभिः समीहितकरी संस्मृत्य या लिख्यते ।
सत्तां वाङ्मयवारिधेश्च कुरुतेऽनन्तस्य या व्यापिनी,
वाग्देवी विदधातु सा मम गिरां प्रागल्भ्यमत्यद्भुतम् ॥ ३

नाभिकन्दसमुद्गता लघवती या ब्रह्मरन्ध्रान्तरे,
शक्तिः कुण्डलिनीतिनामविदिता क्वापि स्तुता योगिभिः ।
प्रोन्मीलन्निरुपाधिबन्धुरपरानन्दाऽमृतस्राविणी,
सूते काव्यफलोत्करान् कविवरैर्नीता स्मृतेर्गोचरम् ॥ ४

या नम्या त्रिदशेश्वरैरपि नुता ब्रह्मेशनारायणै-
र्भक्तेर्गोचरचारिणी सुरगुरोः सर्वार्थसाक्षात्करी ।
बीजं सृष्टिसमुद्भवस्य जगतां शक्तिः परा गीयते,
सा माता भुवनत्रयस्य हृदि मे भूयात् स्थिरा शारदा ॥(यु.) ५

तादात्म्येन समस्तवस्तुनिकरान् स्याद्व्याप्य या संस्थिता,
निर्व्यापारतया भवेदसदिवाशेषं जगद्यां विना ।
वीणापुस्तकभृन्मराललुलितं धत्ते च रूपं बहिः,
पूजार्हं भुवनत्रयस्य विशदज्ञानस्वरूपा धिया ॥ ६

साक्षेपं प्रतिपन्थिनोऽपि हि मिथः सस्पर्द्धसङ्गोद्धुराः,
सर्वे वादिगणाः सतत्त्वममलं यं निर्विवादं श्रिताः ।
विश्वव्यापितया नया अपि समालीनाः पदन्तर्यतः,
साऽर्हद्वक्त्रसुधातटाकवरला वाग्देवता पातु माम् ॥ (यु.) ७

विश्वव्यापि सहत्वभागपि कवीन् हृत्पद्मकोशस्थिता,
प्रादुष्यारसमग्रवाङ्मयसुधाम्भोधिं समुत्तारयेत् ।

भित्त्वा मोहकपाटसम्पुटतटं धृत्वा प्रसत्तिं परां,
दद्याद् बोधिमनुत्तरां (रं) भगवती श्रीभारती सा मम ॥ ८

इत्यानन्दवि(चि)दात्मिकां भगवतीं श्रीभारतीं देवतां,
शक्रालीमुनिसुन्दरस्तवगणैर्नूतक्रमां यः स्तुते ।
सर्वाभीष्टसुखोच्चयैरविरतं स्फूर्जत्प्रमोदाऽद्वयो,
मोहद्वेषिजयश्रिया स लभते श्रेयोऽचिराच्छाश्वतम् ॥ ९

इतियुगप्रधाना० स्त्रोतसि श्रीशारदास्तवाष्टकनामा
द्वादशस्तरङ्गः ।

पू.आ.श्री मुनिसुन्दरसूरिविरचिता
'त्रिदशतरङ्गिणी'- अन्तर्गता

## १०. ॥ चैत्यषट्कबन्धचित्ररूप-जिनस्तवावलिः ॥

अथ चैत्यषट्कबन्धचित्ररूप-श्रीजिनस्तवावलिनामा [म]हाहृदः स्वस्वदेवस्तुतिरूपः सालेखो लिख्यते। तत्र पूर्वं श्रीपत्तनमण्डन-पंचासरश्रीपार्श्वचैत्यालेखः तत्कारयितुः श्रीवनराजस्य तत्प्रतिबोधकस्य श्रीशीलगुणसूरेश्च, प्रतिमया युत आलिख्यते। तच्चैत्यचित्रबन्धने श्रीपार्श्वस्तवश्च लिख्यते ॥ यथा-

जयश्रियं सर्वपुरेष्ववाप्य पुण्यर्द्धिभिः पत्तनमादधाति ।
चैत्यं जयस्तम्भमिवाऽत्र यस्य स्तवीमि पंचासरपार्श्वमेनम् ॥१
स्तुतिं त्वदीयां जगताऽप्यशक्यां कथं विधाताऽस्मि जडावतंसः।
श्रीपार्श्वनाथेति न चिन्तयामि
विचारबन्ध्यौ(वन्ध्यो) ह्यतिभक्तिरागः ॥ २

तलपट्ट[भारपट्ट?] बन्धौ ॥

अमेयमाहात्म्यमयस्वरूप ! पराभिभूतान्तरशत्रुचक्र ! ।
भवाम्बुराशौ निपतन्तमेनं नतं [वि] भो ! मामव पार्श्वदेव ! ॥३

निश्रेण्याकारसोपानपङ्क्तौ उभयतो दण्डकौ ॥

मेधाविनस्ते स्युरमर्त्यपूज्या ज्यायःशुभश्रीभरसङ्गभाजः ।
जना विभो ! येऽनुदिनं भवन्तं तमोपहं नंनमतीद्धभावाः ॥ ४

मारारिवारोत्थपराभवेन न दग्ध[भा]वेषु रतिं भजेत ।
तव स्वरूपस्य विभावनेन नरो दधानो धियमत्र साराम् ॥ ५

द्वाभ्यां प्रथमं सोपानम् ॥

स्वभावतस्त्वं जगतां हिताय यमिन् ! प्रवृत्तिं दधसे सदापि ।
पितेव वात्सल्यरमानिधानं रम्योऽसि तद् बुद्धिमतां नितान्तम्॥६

परा[:] समृद्धीस्तनुतेऽप्यधीतं तवाऽभिधानं सकलार्त्तिनाशम्।
शमीश ! कुर्वद् भविकव्रजानां नाथाऽस्ति मन्त्रस्तदतः परो न ॥७

द्वितीयसोपानम् ॥

तनोति यस्यांऽशुपतिर्न नाशं शतं मणीनां न न दीपकानाम् ।
नापीन्दुरन्तस्मिरं(स्तिमिरं?)
क्षणेन नयेत् तदन्तं तव वाक् प्रकामम् ॥ ८

शमाय रागादिगदोच्चयानां नाथ ! त्वदुक्तानि महोषधन्ति ।
तिरोहितज्ञानदृशोऽपि तानि निन्दन्ति ही ! मोहपटेन पापाः ॥९

तृतीयसोपानम् ॥

इति विनेयलवश्रीमुनिसुन्दरसूरि-हृदयहिमालयावतीर्ण-श्रीगुरु-महिमपद्महृद-प्रभवायां युगप्रधानावतार-श्रीमत्तपाबृहद्गच्छ-मण्डनगुरुश्रीदेवसुन्दरसूरिपदपद्म-सौभाग्यार्णवानुगामिन्यां श्रीमहापर्वविज्ञप्तित्रिदशतरङ्गिण्यां जयश्र्यङ्कायां द्वितीये गूर्जरावती-तन्नरेश्वर-श्रीपत्तननगरादिश्रोतसि चैत्यषट्क-चित्रमहाहृदे श्रीपञ्चासरपार्श्व-चैत्यबन्धचित्रान्तर्हृदे स्वदेव-स्तुतिरूपे तलपट्ट-भारपट्ट-सोपानत्रिकरूपपीठबन्धनामा प्रथमस्तरङ्गः ॥

विनयं नयनप्रीतिप्रदये त्वयि बिभ्रति ।
कुर्वते ससुरास्तेभ्यः सर्वेऽनघनरा नतिम् ॥ १० ॥स्तम्भः ॥

आमं वामतमं पार्श्व भवरूपं हरन्नवक (?) ।
त्वमेव द्वौ पथौ मुक्तिप्राप्त्यै विश्वविभो ! विशः ॥ ११ ॥ स्तम्भः

सारं पुरवरं विश्वे मान्ये पत्तनमेव तत् ।
यत्र त्वं पूज्यसे प्रातर्भव्यैरतरतारकः ॥ १२ ॥ स्तम्भः ॥

श्रितस्य तव तन्त्रोक्तं मार्गं सत्पुण्यवैभवम् ।
लोभवह्निर्नयत्येष न विशः कृशतां शमिन् ! ॥ १३ ॥ स्तम्भः ॥

नतं वीतक्षितं यस्य त्वां शिरः परमेश्वरम् ।
लभतेऽसौ न संयोगं प्राप्तशुद्धशुभः शुचा ॥ १४ ॥ स्तम्भः ॥

मुधा मेधा बुधाभ्यर्च्य ! तेषां मेधाविनां विभो ! ।
त्वयि ये मत्सरं यान्ति परे धर्मेऽन्धताधराः ॥ १५ ॥ स्तम्भः ॥

न स ह्यभिनतिं विज्ञो विश्वेऽप्यन्यस्य कस्यचित् ।
वितनोति गुणानात (?) ज्ञोचितां यः स्तुतिं सृजेत् ॥ १६ ॥
थटा (घण्टा?) बन्धः ॥

स्तोत्राद् भवन्ति भवतो भविनः क्षणेन
तातक्रमाम्बुजविनम्रविचक्षणेन ।
वन्द्या मुदा दिविषदामपि नायकेन
गर्जन्महादितिजभीभरदारकेन ॥ १७ ॥ उभयतो मण्डपौ ॥

परात्मश्रीदपञ्चास्य-स्वर्द्विपा (पा)लिपराभवे ।
श्रीपार्श्व ! कृपया पाहि मां नाथ ! परमन्थनात् ॥ १८ ॥

श्री पार्श्वनामगर्भं कमलं शिखरमूलमध्ये ॥

इति विनेयलवश्रीमुनिसुन्दरसूरि० स्तम्भषट्क थण्टा (घण्टा?) मण्डपकमलबन्धनामा द्वितीयस्तरङ्गः ॥

मयि प्रसन्नो भव विश्वबन्धो ! त्वदेकसेव्ये महिमैकसिन्धो ! ।
विधेहि पञ्चासरपार्श्वनाथ ! संसारदुःखाम्बुनिधेः प्रमाथम् ॥१९

त्वयि प्रसन्ने जगतामधीश ! जन्मादिदुःखान्युपयान्ति नाशम् ।
तैरर्द्दितस्तत्तव पादपीठं भजन् विदध्यां स्तवनादिपाठम् ॥२०
लघुदेवकुलिकाचतुष्कम् ॥

विश्वेश्वरं पार्श्वजिनावतंसं समीहितानन्दकरं नतानाम् ।
श्रीपत्तनस्थं खलु वन्दमाना नायान्ति सांसारिकदुःखतापम् ॥२१
देवस्य दक्षिणतो बृहती देवकुलिका ॥

अपूर्वमेतत्तव पादपङ्कजं जगत्पते ! निस्समशीतिमोदयम् ।
स्मृतेऽपि यस्मिन् भवभीतितापजं
जहाति कष्टं भविकः प्रमोदभाक् ॥ २२
मध्या देवकुलिका बृहती ॥

राजाधिराजो वनराजनामा मान्यो न केषां स जगत्प्रधानम् ।
अतास्थपद्योल्ल(द्योऽत्र) भवन्तमीशं शमाय संसारभियां बुधानाम्॥२३
वामतो बृहद्देवकुलिका ॥

त्वं देव ! पञ्चासरपार्श्वनाथ ! करोषि येषां हृदये निवासम् ।
तेषां सरोगा दुरितोपसर्ग्गा भजन्ति सद्योऽपि जिन ! प्रवासम्॥२४
शिखरमध्ये मु(ख?)ण्डदेवकुलिकाकारः ॥

तपोभिरुग्रैर्नहि मुक्तिसम्पदं दमैर्न चित्रैर्न मरुत्प्रसाधनैः ।
जडा लभन्ते विभुना त्वया विना,
नानाप्रयुक्तैरपि कायदण्डनैः ॥ २५
शिखरे उपरितने शीर्षभागे मध्यपङ्क्ती ॥

तपोजपाद्यौपयिकैरनेकशः शमादियुक्तैरपि याऽन्यदर्शनैः ।
न साध्यते मुक्तिरसावपि ध्रुवं वशीभवेन्नाथ ! तवांह्रिसेवनैः॥२६

शिखरे उपरितने बहिः पङ्क्ती ॥
एवं त्रिभिः शिखरे सामलसारकोपरितनभागबन्धः ॥
जिन ! तानवकर्ता त्वमघस्तोमस्य सर्वतः ।
तरसारतत्त्वार्सि (?) वितरे हितदायक ! ॥ २७ ॥ कलशः ॥

यो वक्ति पञ्चासरपार्श्वनाथ ! स्तुतिं त्वदीयामिति भावसार(रा)म्।
अनन्तसातं मतमातनोथि(ति?)
महोदयस्याऽस्य जिन(ः) प्रसन्नः ॥ २८

वदामि तन्नाथ ! तदर्थिताय वशादहं ते स्तुतिमप्यविद्वान् ।
तन्मे तदारोग्यसुतत्त्वबोधी दत्त्वाऽपि सातं शिवसीम देयाः ॥२९
द्वाभ्यां ध्वजबन्धः ॥

श्रीपञ्चासरपार्श्वनाथमिति यः सर्वेन्द्रपद्मावती-
वैरोट्यामुनिसुन्दरस्तुतिपदं संस्तौति चित्रैर्मुदा ।
आसंसारमभीप्सिताखिलसुखैः स्फूर्जत्प्रमोदाद्वयो
मोहद्वेषिजयश्रिया स लभते श्रेयोऽचिराच्छाश्वतम् ॥ ३०

इति श्रीपञ्चासरश्रीपार्श्वजिनस्य तच्चैत्यचित्रबन्धेन स्तवनं श्रीमुनिसुन्दरसूरिकृतम् ॥ इति विनेयलवश्रीमुनिसुन्दरसूरि० विज्ञप्तित्रिदशतरङ्गिण्यां जयश्र्यङ्कायां द्वितीये गूर्जरावती-तन्नरेश्वर-श्रीपत्तननगरवर्णनादिश्रोतसि चैत्यषट्क-बन्धचित्र-महाहृदे श्रीपञ्चासरपार्श्वनाथस्तु० तच्चैत्यचित्रान्तर्हृदे युगपत्तृतीय-चतुर्थौ तरङ्गौ ॥
सम्पूर्णश्चाऽयं श्रीपत्तनमण्डनश्रीपञ्चासरपार्श्वचैत्यबन्धचित्रान्तर्हृदः॥
श्रीपञ्चासरपार्श्वेशं द्वैधद्वेषिजयश्रिये ।
स्तुवे गोमयमण्डल्यान्विततोरणचित्रतः ॥ ३१

सारामममन्ददममत्सरसारहीन-
पापेति यस्तवगुणालिसुधां मनस्वी।
देवान्तरेषु स रतिं लभते न काचे
लब्ध्वा मणीमिव महेन्द्रनमस्यपाद ! ॥ ३२

ता (तो) रणस्तम्भः ॥

निष्कामसन्ततसमग्रसुरासुरार्च्य !
श्रीपार्श्व ! विश्वजनवत्सल ! दुःखिपातः ! ।
रागादिरौद्रतमभावरिपुव्रजेभ्यो
मां तात ! पाहि कृतसर्वहितप्रतानः(न) ! ॥ ३३

स्तम्भः ॥

दरकरदम्भशमक्षम ! दमसंयममय ! समदभवमथन ! ।
नवशिवनयनत ! हितमत !
शिव ! मां मां वशितं (नं?) नयविभव ! ॥ ३४

अर्द्धाभ्यामुभयतस्तोरणशाखाद्वयोपरिबन्धौ ॥

स शिवं वशिराजो मे देयाद् भुवनभासनः ।
पार्श्वः श्रेयोलतासारो रोगादिहरसंस्तवः ॥ ३५

वदन्ति मदनाद्यैस्ते जितानामपि संस्तवम् ।
न जानन्ति गताऽज्ञान-नरा ये सद्गुणांस्तव ॥ ३६

द्वाभ्यां तोरणम् ॥

शस्तप्रासभवातङ्क ! जिन ! राजितकान्तिभिः ।
भियां [सं]सर्ग्गभित् ! पार्श्व ! वितर स्तुत ! मे शुभम् ॥ ३७

कलशः ॥

भवन्ति विश्वेऽतिशयाः प्रसिद्धा-स्तवाऽप्रमाणा विहितप्रमादे ।
देवाधिदेवत्वगुणप्रतीत्यै श्रीपार्श्व ! देवान्तरनिस्समान ! ॥ ३८

नतोऽस्मि पञ्चासरपार्श्व ! नेतस्तव क्रमौ तेन भवार्त्तिभीतः ।
तन्मां कृतार्थीकुरु शक्रवन्द्य ! मुक्तिप्रदानेन जिनाऽस्तलोभ !॥ ३९

द्वाभ्यां गोमयमण्डलीबन्धः ॥

एवं स्तुतो भक्तिभरेण नाथ ! मयाऽपि पञ्चासरपार्श्वदेव ! ।
देया ममाऽऽरोग्य-सुबोधिलाभौ प्रसादमाधाय जगच्छरण्य !॥४०

स्तुतिमिति तनुते जिनेन्द्र ! यस्ते मघवमहामुनिसुन्दरस्तुतांह्रे ! ।
स भवति गुणसम्पदा समस्ते
फलमिति तद् वितराऽचिरान्ममाऽपि ॥ ४१

इति विनेयलवश्रीमुनिसुन्दरसूरि हृ० श्री... महाविज्ञप्तित्रिदशतरङ्गिण्यां जयश्र्यङ्कायां द्वितीये श्रीगूर्जरावती-तन्त्रेश्वर श्रीपत्तननगरवर्णनादिश्रोतासि श्रीचैत्य-षट्कमहाह्रदे श्रीपञ्चासर-चैत्यान्तर्ह्रदे सम्पूर्णीभूतेऽग्रतो गोमयमण्डलीयुततोरण-बन्धनामा तरङ्गः पञ्चमः ॥ मूलतश्च सतोरणोऽपि सम्पूर्णश्चायं पञ्चासर-पार्श्वचैत्यान्तर्ह्रदः ॥

अथ श्रीशत्रुञ्जयमहातीर्थालङ्कारश्रीयुगादिदेवप्रासादबन्धचित्रनामा गिरिबन्ध-स्वस्तिकतोरणबन्धपूर्वकः श्रीपुण्डरीकशिखरशेखर-श्रीऋषभप्रभुस्तवमयो महाह्रदः (अन्तर्ह्रदः ?) प्रस्तूयते । तत्र पूर्वं तद्गिरितोरणचित्रतरङ्गौ तद्युगादिस्तवस्वरूपावत्र ज्ञेयौ । तदनु तच्चैत्यचित्रस्तवश्च ॥ तथाहि-

जयश्रीणां प्रदातारं स्थितं शत्रुञ्जयाचले ।
स्तुवे श्रीमद्युगादीशं तद्गिरीन्द्रादिचित्रतः ॥ १ ॥

उपत्यकाबन्धः ४२

श्रीतीर्थनायक ! यशोभृतविष्टपाऽष्ट-
कर्मद्विपद्विपरियो(पो) ! जगदेकतात ! ।
रत्यै त्वदागमतार्थविदां न दानिन् !
देवान्तरं वितर तन्निजदर्शनं मे ॥ २ ॥ ४३

अर्द्धाभ्यां पूर्वत उपत्यकात आरभ्याऽधित्यकालग्न-
शिरस्कदण्डकाका-रगिरिशिखरपद्याद्वयबन्धः ॥

चित्तं न मे जिन ! जिती (ता?) रितते मते ते ।
सद्धस(?स्त?) लीनमिन ! तिष्ठति भीतिभेदिन् ! ।
तत्तत्तथा कु[मत?] बोधमहामदारे-
र्न स्याद् भयं मम यथाऽखिलधाम(?) ॥ ३ ॥ ४४

तथैव पश्चिमातः शिखरपद्याद्वयबन्धः ॥

जगत्पतिं योऽतिमुदा भवेभ - हरिं भवन्तं भगवन् ! स्तवीति ।
महोदयस्याऽयमनन्तसातं करस्थितं सुस्थितधीः करोति ॥ ४॥४५

तथैव मध्यशिखरद्वयबन्धः ॥

भावारिव्रजभीतर्सिं हर त्वं मे निजागमात् ।
तिरस्करोति मत्तान् स मोहादिद्विता हि ... (?) ॥ ५ ॥ ४६

अधित्यकाबन्धः ॥

सुरनरमुनि... श्रीशत्रुञ्जयगिरिबन्धचित्रम् ॥

दधाति दर्पं त्रिजगज्जयश्रियं य एव संप्राप्य युगादिनायक ! ।
दत्से त्वमेवामुमपि ... यदर्थितं श्रीविमलाद्रिमण्डन ! ॥ ६॥४७

दमीश ! तेनाऽस्मि तवैव संस्तवं
वदंस्त्रिलोकीप्रभुतां विदन् ध्रुवाम् ।
ददस्व तन्मे शिवमीहितं फलं
लभेत सेव्यस्य बलाद्धि सेवकः ॥ ७ ॥ ४८

युग्मम् ॥ – द्वाभ्यां महास्वस्तिकः ॥

जयाऽस्तजन्माधिजराऽजराजताऽ-
चलाऽमलैः स्फारयशोभिरुज्ज्वलाम् ।
सृजंस्त्रिलोकीं सकलारिनिर्जयात्
शमिप्रशस्यास्पदमक्षयश्रियः ॥ ८ ॥ ४९

त्रिलक्षकतोरणे प्रथमस्तम्भः ॥

क्षमस्तमःस्तोमकमक्षमंदता-
प्रदं निहन्तुं सकलं[कल]ङ्कमुग् ।
अनन्तसंविद्धिभवोभयं भवाद्
ममाऽज ! दत्वेश ! दयादमोदयम् ॥९॥ ५०

प्रथमतस्त्रिलक्षकतोरणार्द्धम् ॥

विशिष्टविद्यासु विशां विभो ! विना
त्वदागमं कः सृजतीह नैपुणम् ।
भवेच्च तत्त्वे तत एव वेत्तृ
तदाशु त(तं) मे वितराचलद्बलम् ॥ १० ॥ ५१

त्रिलक्षणकतोरणे परतस्तोरणस्तम्भः ॥

चरद्वरं मारभरं चरान्तरे हरन् प्रदेयाः शिवमेव देव ! मे ।
त्वमेव दत्सेऽर्थितमन्तकान्तकृ-
ज्जगत्त्रयोन्मीलदमन्दमोद ! यत् ॥ ११ ॥ ५२

त्रिलक्षकतोरणेऽपरतस्तोरणार्द्धम् ॥

एवं सम्पूर्णं त्रिलक्षकतोरणबन्धचित्रं सस्वस्तिकम् ॥

सुरनरमुनिसुन्दरस्तवौघा दधति जिनाद्यकुशाग्रतां यदन्तः ।
तव तमपि गुणब्धिचित्रे(त्र)मीश !
चित्रैर्मम नुवतो वितरेष्ट सौख्यमाशु ॥१२॥ ५३

इति श्रीशत्रुञ्जयगिरिस्वस्तिकत्रिलक्षकतोरणबन्धचित्रैः श्रीशत्रुञ्जय-श्रीयुगादिजिनस्तवनं श्रीमुनिसुन्दरसूरिकृतम् ॥ इति युगपतद्विनेयलव(?) श्रीमुनिसुन्दरसूरिहृत्तरङ्गिण्यां जयश्र्यङ्कायां द्वितीयगूर्जरावती-तन्नरेश्वर-श्रीपत्तननगर-वर्णनश्रोतसि चैत्यषट्कचित्रमहाहृदे श्रीशत्रुञ्जयगिरिचैत्यबन्धचित्रान्तर्हृदे द्वितीये तद्गिरिवरालङ्कार-श्रीयुगादिस्तवरूपे गिरिस्वस्तिक-त्रिलक्षकतोरणबन्धनामा महातरङ्गः प्रथमः ॥ मूलतश्च(६-७)॥
अथ चैत्यचित्रम् -

जयश्रियाऽन्तर्द्विषतां महोदयप्रदस्तवं श्रीऋषभप्रभुं स्तुमः ।
गरीयसि श्रीविमलाचले स्थितं
तच्चैत्यचित्रैर्भवभीतिशान्तये ॥ १ ॥ ५४

गर्भागारे देवस्य दक्षिणतः पङ्क्तिद्वयेन प्रथमा भित्तिः ॥

समग्रविद्यापुरुषार्थसाधनो-पदेशदानाज्जगतोऽप्यनादिनः ।
य या(आ)दिकर्ता समभूज्जिनागमं
युगादिदेवं तमुपास्महे मतम् ॥ २ ॥ ५५

तादृश्येव वामतो द्वितीयभित्तिः ॥

यं रीणदोषं प्रवदन्ति सूरय-स्तत्त्वप्रबोधाऽस्ततमोमयाः... (?)।
जगद्धितार्थं च सदोद्यतः प्रभुः
कर्माणि धर्मांश्च जनान् शशास यः ॥३॥ ५६

पङ्क्तिद्वयेन तलबन्धः ॥

मयेति निर्द्धूतभवोऽर्थ्यसे प्रभुः सभक्तियोगादधता शिरोनतम् ।
स्तुतक्रमेन्द्रैर्मम मानसालये
विधेहि नित्यं जिन ! वासमादिम ! ॥ ४ ॥ ५७

अर्थतो युग्मम् ॥

मयाऽर्च्यतां विश्वपतिर्जिनेन्द्रः स यः पुराणः पुरुषो युगादौ ।
चचार कारुण्यनिधिर्व्यवस्थां
स्फुटां समग्रां जगतां हितार्थी ॥ ५ ॥ ५८

सतलमण्डपस्तम्भबन्धः ॥

अनन्तविज्ञानरमानिवास ! सदोदितानन्दविलाससार ! ।
रतीशजेतर्भगवन् ! भयानां
नामापि निर्मोशय नाभिजात ! ॥ ६ ॥ ५९

पीठे उपरितनदण्डकाकारबन्धः ॥

यस्तातकल्पो जगतां हितैककर्ता स्मृतोऽप्यातनुते सुखानि ।
नित्योदितज्ञाननिधिर्जिनेशः
शमः स देयाद् भवदुःखभीतेः ॥ ७ ॥ ६०

अधस्तनबन्धः ॥

अपारसंसारदरक्षयाय रतीशहन्ता भविनां य एव ।
अशेषजीवाभयहेतुरेकः
स एव सेव्यो भगवान् शिवाय ॥ ८ ॥ ६१

प्रथमचतुष्किका[का]रबन्धः ॥

समीहिताभावभृतो विशोकचर्या श्रियस्ते मनुजा भजन्ति ।
सदापि येषाममलाननानि
रसात् स्तवं ते समकुर्युरेकम् ॥ ९ ॥ ६२

द्वितीयचतुष्किकाकारबन्धः ॥

रङ्गच्छिवश्रीतिलकोपमानि तिरस्कृताघानि भवन्ति नूनम् ।
रसान्तरज्यानि कृता मुदेश !
नानाङ्गवृन्दानि भवन्नतानि ॥ १० ॥ ६३

तृतीयचतुष्किकाकारबन्धः ॥

नाथ ! प्रमाथं नतनिर्जरेश ! नयस्फुरद्भावरिपून् ममारं(र?) ।
नार्हन्त्यु[पे]क्षां वधका यदेते
तत्त्वश्रियां देव ! कृताघनाश ! ॥ ११ ॥ ६४

चतुर्थचतुष्किकाकारबन्धः ॥

तव भवदरहतिनिरते तेजोजितदिनकरस्य चरणयुगे ।
नितरां विनतिकरोम्यह - मस-
मर ! शिवसदन ! भवविभव ! ॥ १२ ॥ ६५

[सो] पानसप्तकबन्धः ॥

इति विनेयलवश्रीमुनिसुन्दरसूरि० महापर्व० द्वितीये गूर्जरावतीदेश० श्रोतसि चैत्यषट्कबन्धचित्रमहाह्रदे

स्वस्वदेवस्तुतिरूपे श्रीशत्रुञ्जयालङ्कार-श्रीयुगादिचैत्यचित्रान्तर्हृदे श्रीयुगादिस्तुतिमये गर्ब्भागारस्तम्भपीठसोपानबन्धनामा महातरङ्ग महाह्रदेऽयं मूलतश्च तरङ्गः (८) ॥

तत्त्वज्ञानयुत ! क्षीणकर्माऽसङ्गाऽतनुप्रभु ! ।
प्रभोऽनादितमोध्वंसाज्जगदेतन्नतं तव ॥ १३ ॥ ६६

शिखरे युगादिदेवनामाङ्कितकमलबन्धः ॥

जिन ! पापारिविध्वंससज्जोद्धुततमोहर ! ।
विधेहि हितकृत् ! काममहशमममोह ! मे ॥ १४ ॥ ६७

शिखरे गर्ब्भाङ्गा[गा]रिकाबन्धः ॥

जितमोहमहासेन ! नमद्दानवमानव ! ।
भगवन् ! भवभीतानां नाथ तानव सा तव (?) ॥ १५ ॥ ६८

शिखरे देवाद्दक्षिणतः प्रथमबहिर्देवकुलिकाबन्धः ॥

भवभ्रान्तिभयध्वान्त-तमोरिस्वमहाव्रत ! ।
निर्वृति(तिं) तपसा प्राप परां कामामहानितः ॥ १६ ॥ ६९

तादृश्येव वामतो देवकुलिका ॥

बुधसंमतसर्वार्थ ! तत्त्वदेशनकोविद ! ।
तवाऽऽगमलगच्चित्तो धत्ते प्राणी न को मुदम् ॥ १७ ॥

मण्डपबन्धः ७०

तवाऽर्हन् ! गोभरैस्तात ! तरसा याति संक्षयम् ।
रवेरिव जगत्स्वामिन् ! मिथ्यात्वतमसश्चयः ॥ १८ ॥ ७१

शिखरे मध्यदेवकुलिका ॥

जिन ! त्रिभुवनाधार ! रमानन्दनवारक ! ।
करुणाकर ! मां नेतं(तः?) पाहि त्वं परमार्थ[तः] ॥ १९ ॥ ७२

शरणं भवभीतानां नाऽपरोऽस्ति त्वया विना ।
नाथं त्वामेव तत् सः (?सन्तः?) श्रयन्त्यभव ! तत्त्वतः ॥२०॥७३

द्वाभ्यां शिखरे उभयतो द्वितीये खण्डदेवकुलिके ।

त्वामेव जगतामीशं शरणं भीतभाविनाम् ।
नाथ ! ज्ञाः प्रतिपद्यन्ते तेजसामेकमन्दिरम् ॥ २१ ॥ ७४

त्वद्दर्शनरसप्रीतं तत्त्वज्ञानवतां मनः ।
न रतिं लभतेऽन्यत्र त्रस्तमायामदस्मर ! ॥ २२ ॥ ७५

द्वाभ्यां शिखरे सर्वोपरितनभागे तथैव मध्यपङ्क्ती ॥

सर्वाभीष्टश्रियां मूलं ललनासङ्गवर्जितः ।
तपनीयरुचिः श्रेयो योगीन्द्रो ददतां परम् ॥ २३ ॥ ७६

स्मरामि जगतां तात ! तव पादयुगाम्बुजम् ।
जयं येन लभे भावबलाद् विद्वेषिणां पुरः ॥ २४ ॥ ७७

तथैव बहिःपङ्क्ती ॥

एवं चतुर्भ्यां सामलसारकशिखरोपरितनभागबन्धः ॥

भगवन् ! गरिमाम्भोधे ! विधेय(हि?) विधिसङ्गमम् ।
मतं ततशमं देहि यतः स्यां गतदुस्तमाः ॥ २५ ॥ कलशः ॥ ७८

यस्याऽऽज्ञया नैव विना शिवश्री-
र्लभ्याऽप्यलभ्यैव तया बुधैः स्यात् ।
स कान्तसातं विततं तनोतु,
युगादिदेवो भविभद्रकर्ता ॥ २६ ॥ ७९

आनन्दसम्पदं पुंसां दत्ते दृष्टोऽपि यो जिनः ।
स विश्वानतपादो नः करोतु शमशं वशम् ॥ २७ ॥ ८० ध्वजबन्धः॥
एवं स्तुतः प्रथमतीर्थपतिस्त्रिलोकी-
नेत्रोत्सवः सकलमङ्गलकेलिसद्म ।
विश्वार्चनीयविमलाचलमौलि[मौलि]-
र्देयान् ममाप्यमलकेवलबोधिलक्ष्मीम् ॥ २८ ॥ ८१

श्री शत्रुञ्जयमौलिमण्डनमिति श्रीमद्युगादिप्रभुं
शक्रालीमुनिसुन्दरस्तुतिपदं यः स्तौति चित्रैर्मुदा ।
आसंसारमभीप्सिताखिलसुखैः स्फूर्जत्प्रमोदाद्वयो
मोहद्वेषिजयश्रिया स लभते श्रेयोऽचिराच्छाश्वतम् ॥ २९ ॥ ८२

इति श्रीशत्रुञ्जययुगादिदेवस्तवनं तच्चैत्यबन्धेन ॥

इति विनेयलवश्रीमुनिसुन्दरसूरि० श्रीदेवसुन्दरसूरिपद-पद्म-सौभाग्यार्णवानुगामिन्यां श्रीमहा० द्वितीये श्रीगूर्जरावतीदेश-तन्नरेश्वर-श्रीपत्तननगरवर्णनादिश्रोतसि चैत्यषट्कचित्रमहाह्रदे स्वस्वदेव० श्रीशत्रुञ्जयालङ्कारश्रीयुगादिजिनचैत्य-चित्रान्तर्ह्रदे श्रीयुगादिजिनस्तुतिमये तृतीयचुतर्थे(थौं) या (ला?) घवमागप(?) (युगप?) त्तरङ्गौ । पूर्वतरङ्गद्वयस्य प्रौढत्वादेते त्रयो लघवः । एवमन्यत्रापि ज्ञेयम् । महाह्रदे च नवमदशमौ मूलतश्च तरङ्गः (ङ्गौ) ॥ सम्पूर्णश्चाऽयं श्रीशत्रुञ्जयालङ्कार-श्रीयुगादिजिनस्तवरूप-स्तच्चैत्यचित्रान्तर्ह्रदो द्वितीयः । मूलतश्च (९-१०) ॥

अथ श्रीशान्तिनाथचैत्यनामान्तर्ह्रदः
श्रीशान्तिजिनस्तुतिमयः प्रस्तूयते ॥ तथाहि-

जयश्रीजिनानन्तसद्भूतरङ्गद्गुणश्रीनिधे ! मुक्तिलक्ष्मीद्धरङ्ग ! ।
गतक्रोधलोभादिसंरम्भशान्ते !
जगद्वन्द्यपादारविन्दाऽप्रमाद ! ॥ १ ॥ ८३

गर्भागारे देवाद्दक्षिणतो द्वाभ्यां पङ्क्तिद्वयस्थिताभ्यां
प्रथमा भित्तिः ॥

सतां तेऽभितो नाममन्त्रः प्रदत्ते स्मृतेर्गोचरं प्रापितः शर्मसारम् ।
ततस्त्वं जिन ! ध्येयवर्गेष्वशेषे-
ष्वसि ख्यातिमानादिमो विश्वनेतः ! ॥ २२ ॥

तादृश्येव द्वितीया भित्तिः ॥

जगन्नायकैकान्तिकात्यन्तिकं ते
हितं शास्ति सिद्धान्तवाक् तेन सन्तः ।
यतन्ते तदुक्तार्थतत्त्वानि बुद्ध्वा
यथावत् स्वनुष्ठानकृत्यैर्नितान्तम् ॥ ३ ॥ ८५

तलबन्धः ॥

रमाकृष्टिकृन्नामधेयं नतास्त्वां व्रजन्त्याशु संसारदुःखावसाने ।
गदस्तोमजातीकारतुल्ये-
ष्वनल्पेषु सद्भोगसौख्येष्वतः (?) ॥ ४॥ ८६

उपरितनपद्मशिलारूपभारपट्टबन्धः ॥

तनुश्रीजितोद्दीप्तकल्याणकान्ते !
तपस्तेजसा प्रास्तभा ! नाथ ! भानो ! ।
कृतिप्रीतिकृद्भाग्यलभ्यप्रणाम !
प्रभो ! पाहि मां विश्वतातः सुतन्त्र ! ॥ ५ ॥ ८७

सतलमण्ड [प] स्तम्भबन्धः ॥

श्रियं त्वं महानन्दसौख्य(ख्यानि) दत्से
जिनाधीश ! भव्याङ्गिनां भक्तिभाजाम् ।
निबुध्येति तत्त्वं भवं(वन्तं) भजन्ते
न के नाथ ! विघ्नावलीघातनिघ्नम् ॥ ६ ॥ ८८

पीठे उपरितनदण्डकाकारबन्धः ॥

रसायां स्वजन्म प्रबुद्धाः स्तुवन्ति
प्रभो ! त्वां नमन्तोऽधिकं स्वर्गलोकात् ।
महानन्दसौख्ये समीः हो (समीहा?) वतां यत्,
परो नास्त्युपायोऽर्थिताप्त्यै प्रधानम् ॥ ७ ॥ ८९

पीठेऽधस्तनदण्डकः ॥

परानन्दमयः शान्तिः कर्माम्भोदसमीरणः ।
परमात्मा जयत्यर्हन् प्रशान्तारिजभीभरः ॥ ८ ॥ ९०
शुभभावनतामर्त्य ! संत्यक्तधनबान्धव ! ।
वधवर्जितसिद्धान्त ! मम भिन्द्धि तमो जिन ! ॥ ९ ॥ ९१

द्वाभ्यां जालिकाकार एकादशस्पर्द्धकबन्धः ॥

वृजिनान्मा(न्मो?) चकाऽधीश ! सिद्धानन्तचतुष्टय ! ।
श्रितः कस्त्वां विपद्धारं घ्नन्तं शंमय ! नो जनः ॥ १० ॥ ९२

पीठे जालि[का]काशे स्वस्पर्द्धक
ऊर्ध्वदक्षिणेतरदण्डकद्वयबन्धः ॥

इति विनेयलवश्रीमुनिसुन्दरसूरि० विज्ञप्तित्रिदशतरङ्गिण्यां० श्रीशान्ति-जिनस्तवरूपचैत्यचित्रान्तर्हृदे सपीठस्तम्भगर्भागार-बन्धनामा महातरङ्गः प्रथमः । महाहृदे च एकादशः ११ मूलतश्च॥

सर्वज्ञ ! श्रीन ! संप्राप्तभीतिशान्ति समन्ततः । (?)
नमन्ति त्वां सदा के केऽनानाज्ञाः सद्भनाथ ! न(?) ॥११॥ ९३

शिखरस्य मूले श्रीशान्तिनाथेति नामगर्भं कमलम् ॥

जगन्मोददं दर्शनं नो जिनेदं
द(?)मी (मा)प्यते ते महापुण्यहीनैः ।
सदा तेन न प्रार्थयेऽन्यत्ततोऽहं
हताज्ञानपापांर्च्य ! नैपुण्यपीनैः(?) ॥१२॥ ९४

शिखरगर्भेऽन्धारिकाबन्धः ॥

जना ये स्मरन्ति प्रभो ! भावसारं
जगत्तात ! ते नाममन्त्रं क्षितारम् ।
महानन्दशर्मश्रियां ते विलासं
लभन्ते विधायाऽऽशु कर्मप्रवासम् ॥ १३ ॥ ९५

शिखरमूले देवाद्दक्षिणतोऽर्द्धाभ्यां देवकुलिकाद्वयबन्धः ॥

श्रये त्वां जगन्नायकाऽमन्दमोदं
समग्रेहितश्रीलताकन्दक[न्दम्?] ।
भवन्तं श्रिता यद्भवापायभीता
भवन्त्येव कैवल्यलक्ष्मीपरीताः ॥१४॥ ९६

तथैव वामतो देवकुलिके ॥

प्राणदाने तदा पारापते त्वयेतिषे (?) यथा ।
मयि पाल्ये कृपापात्रे यतस्वाऽद्य ऋषे ! तथा ॥ १५ ॥ ९७

मण्डपः ॥

अनन्तदर्शनज्ञाननताखण्डलमण्डल ! ।
जगद्ध्येयपदाम्भोज ! जय मञ्जुलमङ्गल ! ॥ १६ ॥ ९८

तापोत्तीर्णसुवर्णाभ ! भग्नभावारिविक्रम ! ।
जय कर्ममयस्फीततमोभाररविक्रम ! ॥ १७ ॥ ९९

तत्त्वविद्यामहाम्नायं यस्मिंस्ते वचनं विना ।
मोहधूर्तस्य कुर्वीततमां को वञ्चनं हि न ॥ १८ ॥ १००

द्वितीयस्थ(स्त) रे देवाद्दक्षिणत आरभ्य त्रिभिर्मध्यमदेव-कुलिकात्रयं क्रमात् ॥

त्वया यो विजिग्ये भवभ्रान्तिभीर्तिं
तिरस्कुर्वता लीलयाऽपीश ! मोहः ।
परेऽस्याऽपि देवा गताः प्रेष्यभावं
बभा (प्रभो) ऽतस्त्वमेवाऽर्च्य ! एवं ममोहः ॥ १९ ॥ १०१

शिखरे सर्वोपरितनभागे मध्यपङ्क्ती ॥

त्वमेवाऽऽश्रितानां प्रभुर्मुक्त ! नूनं
नताऽमर्त्य ! कर्तुं भवभ्रान्त्यपोहम् ।
निबुध्येति वाञ्छन् महानन्दसातं
तवैवांऽह्रियुग्मं शरण्य ! श्रयेऽहम् ॥ २० ॥ १०२

तथैव बहिः पङ्क्ती ॥

एवं द्वाभ्यां सामलसारकशिखरोपरितनभागबन्धः ॥

अमानमानसं स्तोत्रे तव वीततमोभर ! ।
रतिं मम परध्ये (?) लभतां वै भवारसम् ॥२१॥ कलशः ॥ ३

अनन्तैर्भवैर्भ्राम्यतो गोचरत्वं
त्वमागाद् दृशोर्मेऽद्य भाग्येन तात ! ।
ततो रक्ष मां दीनमेनं सुनम्रं
नतानन्दन ! ध्यानलीनं घनं ते ॥२२ ॥ ध्वजः १०४

एवमानुतगुणो मयका श्रीदेवसुन्दरगुरूदितभक्त्या ।
ज्ञानदर्शनसुसंयमशुद्धिं त्वं विधेहि मम शान्तिजिनेन्द्र ! ॥ २३॥५

श्रीशान्तिं जिनराजमित्यमलधीर्यः स्तौति भूपावली-
शक्रालीमुनिसुन्दरस्तुतिपदं चित्रैर्विचित्रक्रमैः ।
आसंसारमभीप्सिताखिलसुखैः स्फूर्जत्प्रमोदाद्वयो
मोहद्वेषिजयश्रिया स लभते श्रेयोऽचिराच्छाश्वतम् ॥ २४ ॥१०६

इति श्रीशान्तिनाथजिनस्तवनं तच्चैत्यबन्धेन भट्टारकश्री-मुनिसुन्दरसूरि-कृतम् ॥

इति विनेयलवश्रीमुनिसुन्दरसूरि० श्रीमहापर्वविज्ञप्ति-त्रिदशतरङ्गिण्यां जयश्र्यङ्कायां द्वितीये श्रीगूर्जरावतीदेशतन्नरेश्वर-श्रीपत्तनादिनगरवर्णनश्रोतसि चैत्यषट्कचित्रमहाहृदे स्वस्वदेव० श्री शान्तिजिनचैत्यचित्रान्तर्हृदे श्रीशान्तिजिनस्तुतिमये द्वितीयतृतीयौ युगपत्तरङ्गौ । महाहृदे च द्वादशत्रयोदशौ मूलतश्च ॥ सम्पूर्णश्चाऽयं श्रीशान्तिस्तवमयः श्रीशान्तिचैत्यचित्रान्तर्हृदः॥

अथ श्रीरैवतचैत्यबन्धचित्रनामाऽन्तर्हृदः

श्रीरैवतालङ्कारश्रीनेमिस्तवमयः प्रस्तूयते । तथाहि-

श्रीनेमिं प्राप्तमोहारिजयश्रीकं जिनं स्तुवे ।
नेतारं जगतां स्फीतमोदाद् रैवतदैवतम् ॥ १ ॥ १०७

रैवतगिरीन्द्रबन्धचित्रे पूर्वार्द्धेनोपत्यकाबन्धः ।
उत्तरार्द्धेन च प्रथमपङ्क्तौ पूर्वस्यां प्रथमशिखरबन्धः ॥

मोक्षाप्तिः सुलभा तेषां श्रीनेमे ! शुद्धधीजुषाम् ।
श्रीनन्दनजितं त्वां ये स्तुवन्त्यर्कं तमश्चये ॥ २ ॥ १०८

अर्द्धाभ्यां तत्रैव मध्यतृतीयशिखरयोर्बन्धः ॥

वत्मि(च्मि?) तानुत्तमान् देव ! तेषां कुर्वे च संस्तवम् ।
जुषन्ते ये जगत्तातं त्वां ददानं समीहितम् ॥ ३ ॥ १०९
रैवतगिरिबन्धचित्रे द्वितीयपङ्क्तावर्द्धाभ्यां शिखरद्वयबन्धः ॥

समस्तजगदानन्द-कन्दवारिदसोदर ! ।
गलत्तापं श्रुतं राहि पाहि मां सदयादर ! ॥ ४ ॥ ११०

रैवतगिरिबन्धचित्रे सर्वोपरितनशिखरस्याऽधित्यकायाश्च बन्धः॥
एवं चतुर्भिः श्रीरैवतगिरिबन्धचित्रम् ॥

अथ रैवताद्रौ नेमिचैत्यबन्धः -

जयश्रीश ! समासेव्य ! नेमे ! रैवतमण्डन ! ।
कन्दर्पाऽनल्पदर्पाग्नि-नवाम्भोधरसोदर ! ॥ ५ ॥ १११
देवाद्दक्षिणतः प्रथमभित्तौ प्रथमा पङ्क्तिः ॥

यशसा स्फुरता विश्वे प्रोर्णोनोर्युक्तमीश्वरम् ।
मुधा कामवधख्यातिं वहन्तं सत्यकामभित् ॥ ६ ॥ ११२
तत्रैव द्वितीया पङ्क्तिः ॥

यतिन् ! जय जगत्तात ! मोहक्लेशभरोज्झित ! ।
भवभीतभवित्रातर् ! नमद्विदुरमुक्तिद ! ॥ ७ ॥ ११३

शर्मिस्त्वां यं स्मरस्यान्तकारिणं... श्रितम् ।
जगदेतद्भीतं .. (?) तं स्तुवे दुष्कृतच्छिदम् ॥ ८ ॥ ११४

हर लोकत्रयीबन्धो ! शिवावास ! विभो ! मम ।
गतातङ्क ! महःसिन्धो ! दुरन्ताः सकलापदः ॥ ९ ॥ ११५

त्रिभिर्भित्त्यन्तरालपूरककदल्याकारबन्धः ॥

भगवन् ! भवभीमारे ! रक्ष मां शरणागतम् ।
यत् त्वं कृतप्रतिज्ञोऽसि रक्षितुं शरणागतान् ॥ १० ॥ ११६

भवन्तं भावतो विज्ञा विनस्य (?म्य?) जगतां हितम् ।
नहि के के शिवं प्राप्ता भङ्क्त्वा कर्ममहावनम् ॥ ११ ॥ ११७

द्वारशाखाद्वयम् ॥

पारगाऽरिहर ! स्फारकान्तसात ! गतक्षत ! ।
शान्त ! दान्त ! हतस्फीतकामरामतमः ...(?) ॥ १२ ॥ ११८

उंबरबन्धः ॥

गता मम हिताऽमर्त्त्यै माभार्णववर्णनम् (?) ।
मताप्त्यममतेप्त्यमर्त्त्यैरशक्यं भावभाजनम् ॥ १३ ॥ ११९

उत्तरङ्गबन्धः ॥

इति विनेयलवश्रीमुनिसुन्दरसूरि.
श्रीरैवतकाऽचलालङ्कारश्रीनेमिस्तवमयः
श्रीरैवतगिरिश्रीनेमिचैत्यचित्रान्तर्हृदे
गर्भागारमूलभित्तिद्वारबन्धनामा प्रथमो महातरङ्गः ।
चैत्यषट्कबन्धचित्रमहाहृदे च मूलतश्च (१४) ॥

जगतां यो जयं चक्रे लीलयाऽपि महाभटः ।
सोऽपि कामरिपुः स्वामिं-स्त्वया भग्नः स्फुरत्प्रभः ॥ १४ ॥ १२०

यत्नात् स्तोत्राणि शक्रोऽपि करोत्यविरतं तव ।
एवमेव यतः श्रेयो नीराग ! महिमार्णव ! ॥ १५ ॥ १२१
द्वाभ्यां पङ्क्तिद्वयस्थिताभ्यां गर्भागारस्य तलबन्धः ॥
एवमेकादशभिः गर्भागारबन्धः सम्पूर्णः ॥

भदन्तमिद्धातिशयाभिरामं महोदयानन्तसुखं विरागम् ।
गताखिलाज्ञानतमःप्रचारं रवाऽस्तमेघं जिनमानमामि ॥ १६ ॥१२२

वचःसुधा यस्य भवार्त्तितापं पराभवं प्रापयतेऽङ्गभाजः ।
जगत्त्रयीवन्द्यपदारविन्दं दमीश्वरं तं जिनमाश्रयामि ॥ १७ ॥१२३
द्वाभ्यां पङ्क्तिद्वयस्थिताभ्यां मण्डपतलबन्धः ॥

महामुने ! वीतसमग्रदोषं निरञ्जनं त्वां शिवपुर्यधीशम् ।
योगीश्वरं ध्येयपदं विनम्य बुधाः कृतार्था न परं नमन्ति ॥१८॥१२४

विश्वोत्तर ! ब्रह्म - - निधेहि, निरञ्जन ! ज्ञानमयाऽनपाय ! ।
सम्यग् ममाऽधीशनिजस्वरूपो-पलम्भमज्ञानतमो निहत्य ॥ १९
समण्डपप्रासादस्य पीठे द्वाभ्यामधस्तनमहापङ्क्तिरूपतलबन्धः॥

महोदयाध्वानमनादिमोह-ध्वान्तप्रचारेऽपि हि दीपिकेव ।
तवैव वाणी प्रकटीकरोति भव्याङ्गिनं तत्त्वरुचीर्वितत्य॥२०॥१२६

शमाय वाणी भवतो भवार्त्तिदवानलानां भवति प्रकामम् ।
भव्याङ्गिनां मोदरसप्रवर्ष
कादम्बिनीवादधती समन्तात् ॥ २१ ॥ १२७
द्वाभ्यां समण्डपप्रासादपीठे उपरितनमहापङ्क्तिरूपतलबन्धः ॥

ममत्वमुक्ताक्षयशर्मधाम ! नामामृतप्रास्तभवार्तिदाव ! ।

योगस्य कोटिं परमां प्रयात !
तिरस्कृताऽनन्यज ! नन्द नित्यम् ॥ २२ ॥ १२८

विनम्रदेवासुरमानवेश ! यशोजितश्वेतरुचेऽस्तकाम ! ।
समग्रवेदिन् ! जय मुक्तलोभ !
त्यक्ताघ ! नेमे ! शिवशर्मदाता(तः?) ॥ २३ ॥ १२९

समण्डपप्रासादपीठे प्रतिपादमेकैकभवनेन द्वाभ्यां मध्यगतोद्ध्र्वदण्डकाकारस्तम्भाष्टकबन्धः ॥

महाज्ञानतपोध्यान ! जगज्जनकृतावन ! ।
नेमे ! विनतनाकीन ! जीया घनरुचे ! जिन ! ॥ २४ ॥ १३०

समण्डपप्रासादपीठे मध्ये प्राकारान्तरेणाऽष्टदलं दलादिकमलं प्रथमम् ॥

भवभीतजगत्रातः ! शमामृतरसाप्लुत ! ।
रतिकान्तप्रभाघात ! क्रियोद्यत ! जगद्धित ! ॥ २५ ॥ १३१

तत्रैव तादृगेव कमलं द्वितीयम् ॥

मोहध्वान्तसमूहान्तरवे ! प्रीतसुरार्चित ! ।
भयोज्झितपदौ तात ! नमामि तव सन्ततम् ॥ २६ ॥ १३२

तत्रैव तादृगेव कमलं तृतीयम् ॥

विश्वाधार ! गुणागार ! निर्विकार ! सुखाकर ! ।
त्वं संसारभियां पारं देहि धीर ! ममाऽचिरम् ॥ २७ ॥ १३३

तत्रैव तादृगेव कमलं चतुर्थम् ॥ एवं कमलचतुष्कबन्धः ॥

एवं रैवतकाद्रिमण्डनमणिं श्रीनेमिविश्वप्रभुं
शक्रालीमुनिसुन्दरस्तुतिपदं यः स्तौति चित्रैर्मुदा ।

आसंसारमभीप्सिताखिलसुखैः स्फूर्जत्प्रमोदाद्वयो
मोहद्वेषिजयश्रिया स लभते श्रेयोऽचिराच्छाश्वतम् ॥ २८ ॥१३४
इति श्रीरैवतकाचलमण्डन-
श्रीनेमिनाथस्तवनं श्रीमुनिसुन्दरसूरिकृतम् ।

इति युगप्रधानावतारतपाबृहद्गच्छाधिराजपरमपूज्य-श्रीदेवसुन्दरसूरिगुरु-गुणमहिमार्णवानुगामिन्यां तद्विनेय-श्रीमुनिसुन्दरसूरिहृदयहिमवदवतीर्णश्रीगुरुप्रभाव-पद्महृदप्रभवायां श्रीपर्युषणामहापर्वविज्ञप्तित्रिदशतरङ्गिण्यां जयश्र्यङ्कायां द्वितीये श्रीगूर्जरावतीदेशतन्नरेश्वरश्रीपत्तननगरादिवर्णनश्रोतसि चैत्यषट्कचित्रबन्धमहाहृदे स्वस्वदेवस्तुतिरूपे श्रीरैवतकाचलालङ्कार-श्रीनेमिस्तवमयश्रीनेमिचैत्यचित्रान्तर्हृदे समण्डपप्रासादतलबन्धसहितपीठबन्धनामानो युगपद् द्वितीयतृतीयचतुर्था[स्त]रङ्गौ-(ङ्गाः) । चैत्यषट् (ट्क) बन्धचित्रमहाहृदे च मूलतश्च १५-१६-१७ ॥

जगज्जैत्रस्य मोहारे-र्यमाश्रित्य जयश्रियम् ।
प्राप नेमिप्रभुस्तत्र रैवते तं [जिनं] स्तुवे ॥ १ ॥ १३५

ददस्व प्रशमं स्वामिन् ! भवतापस्य मे रयात् ।
तवाऽऽर्त्तस्वाश्रितोपेक्षा न सङ्गतिव(म)ती ध्रुवम् ॥ २ ॥१३६

रमायां न ह्यभिप्रायः प्रायस्तेषां भवेन्नृणाम् ।
त्वदर्चनाफलाभिज्ञाः स्युर्ये तात ! शिवार्थिनः ॥ ३ ॥ १३७
गर्भागारे उपरि पद्मशिलाबन्धः ॥

नष्टकर्मामय ! प्रास्ताऽवनम्राङ्गिभवभ्रम ! ।
महाज्ञानाद्युपायेन जय प्राप्त ! शिवं जिन ! ॥ ४ ॥ १३८

अर्द्धाभ्यां मण्डपत्रये द्वितीयद्वारशाखात आरभ्य स्तम्भषट्कोपरितन-भारपट्टद्वयबन्धः ॥

श्रीनेमे ! नेमुरत्यन्तं तव ये भक्तितः पदौ ।
दौःस्थ्यमेषां क्षयं यातं तत्त्वज्ञानवतां वशिन् ! ॥ ५ ॥ १३९
मण्डपे प्रथमस्तम्भः ॥

धामधाम ! गुणग्राममय ! संसारपारग ! ।
गतसर्वविकारेश ! शमयाऽघमकाम ! मे ॥ ६ ॥
तत्रैव द्वितीयः स्तम्भः ॥ १४०

देवाः सेवाकृतो नैव बहुधाऽपि परैः स्तुतां(ताः?) ।
तारयन्ति भवाम्भो[धिं] धिग् मूर्खांस्तान् श्रितान् श्रिये ॥ ७॥१४१
तृतीयः स्तम्भस्तत्रैव ॥

स्स(स्म)रकारस्करे दाव-कर्णनागोचरप्रभ ! ।
भगवन् ! भवभीपारं रयाद्देहि ममाऽमम ! ॥ ८ ॥ १४२
तत्रैव स्तम्भश्चतुर्थः ॥

तव भावभृतो जीवा वारवारं नतिं श्रिताः ।
तारयन्ति परं स्वं च चरणादरणे रताः ॥ ९ ॥ १४३
पञ्चमः स्तम्भस्तत्रैव ॥

कारंकारं गुणानां ते तेजोऽर्णव ! नरः स्तुतिम् ।
तिरस्कृतभवो नूनं न को भवति भीतिमुक् ॥ १० ॥ १४४
तत्रैव स्तम्भः षष्ठः ॥

इति युगप्रधानावतारतपाबृहद्गच्छाधिराजपरमपूज्य-श्रीदेवसुन्दरसूरिगुरु-गुणमहिमार्णवाऽनुगामिन्यां तद्विनेय-

श्रीमुनिसुन्दरसूरिहृदयहिमवदव० त्रिदशतरङ्गिण्यां जयश्र्यङ्कायां द्वितीये श्रीगूर्जरावतीदेश० श्रोतसि चैत्यषट्कबन्धचित्रमहाहृदे स्वस्व०रूपे श्रीरैवतकाचलालङ्कार-श्रीनेमिस्तवमयतच्चै-त्यचित्रान्तर्हृदे मण्डपभारपट्टद्वय-स्तम्भषट्कबन्धनामा पञ्चमस्तरङ्गः । चैत्यचि० महाहृदे च मूलतश्च [१८] ॥

संनम्रश्रीश ! सन्देहनाशने त्वं समर्थवाक् ।
संयमीद्धसहा जीया नश्वराऽसम्मदारत ! (?) ॥ ११ ॥ १४५

शिखरमूलमध्ये श्रीनेमीश्वरेति नामगर्भं कमलम् ॥

सुरेशसेव्य ! व्यपनीतमोह ! हर्यक्ष ! दुर्वाररतीशनागे ।
जयाश्रित ! प्रप्रहतामिताघ !
घनाम्भसार्वेततपोवनागे (?) ॥ १२ ॥ १४६

शिखरे गर्भमध्ये शकु(शुक) नाशनासकाऽन्धारिकाबन्धः ॥

दृष्टे त्वदास्ये घनकायकान्ते ! कान्ते भवेद्यः प्रमदो जनानाम् ।
नानार्त्तिकीर्ण[र्णेषु?] भवेषु तेन
ते न च (भ्र)मन्त्यम्बुद ! मोहदावे ॥ १३ ॥ १४७

शिखरस्य मूले देवाद्दक्षिणतः पङ्क्तित्रयेण प्रथमदेवकुलिकाबन्धः ॥

तावन्मोहविषं नेमे ! मेधां हन्ति मनस्विनः ।
वचनामृतमापीतं तव यावदनेन न ॥ १४ ॥ १४८

तत्रैव पङ्क्तिद्वयेन द्वितीयदेवकुलिकाबन्धः ॥

रणेऽपि चरणेऽमाय ! यत्त्वया वैरिणो जिताः ।
द्विधा क्षमाभृतस्तात ! ततस्त्वां सर्वतो नताः ॥ १५ ॥ १४९

तत्रैव देवदेवाद्वामतः पङ्क्तिद्वयेन तृतीयदेवकुलिकाबन्धः ॥

भवत्पदध्याननतिप्रभावात् पापं विनश्यत्यखिलं जनानाम् ।
विद्धं करौघैर्दिननायकस्य ततं यथा सन्तमसं क्षणेन ॥ १६॥१५०

तत्रैव वामतः पङ्क्तित्रयेण चतुर्थदेवकुलिकाबन्धः ॥

एवं सम्पूर्णः प्रथमः स्थ(स्त)रः ॥

यो लक्षसंख्यं किल संख्यदक्षः क्षणेन वैलक्ष्ययुतं चकार ।
नरेन्द्रवृन्दं समदं ददातु तुष्टिं स सर्वेष्टकृतेरकामः ॥ १७ ॥ १५१

शिखरे मध्यमदेवकुलिकात्रयरूपे द्वितीयस्थ(स्त)रे प्रथमा देवकुलिका ॥

कल्पद्रुमो नेप्सितशर्मदाता ताताऽमराणां मणिरप्यनिष्टः ।
तव प्रभावाम्बुनिधेः पुरोऽत्र
त्रपास्पदं कामघटोऽपि नित्यम् ॥ १८ ॥ १५२

तत्रैव द्वितीया देवकुलिका ॥

सिद्धौषधानीव भवद्वचांसि सितांशुकीर्ते ! भविमण्डलस्य ।
हरन्ति संसारभयामयौघं घनाञ्जनश्यामतनोऽखिलज्ञ ! ॥ १९॥१५३

तत्रैव तृतीयदेवकुलिकाकारबन्धः ॥

कैवल्यानन्दरूपाय यशोजितसितद्युते ! ।
तेजसामेकनाथाय यर्मिस्तुभ्यं नमोनमः ॥ २० ॥ १५४

विवशीकृतविश्वास्तारागोपीचटूक्तयः ।
...तिनो भावतस्तेन नयन्ति स्म मनोभ्रमम् ॥ २१ ॥ १५५

शिखरोपरितनभागे द्वाभ्यां दक्षिणत उद्धर्वं पङ्क्तिद्वयम् ॥

भवतृष्णामहातापपरिहाणेः सदोदितम् ।
तवानन्दमयं शैत्यं त्यक्तौपम्यमिदं स्तुमः ॥ २२ ॥ १५६

तव स्तुतिरतस्याऽऽशु शुद्धिः सुमलिनात्मनः ।
नष्टाऽदृष्टमलत्वेन नतेन्द्र ! भवतान्मम ॥ २३ ॥ १५७

तत्रैव वामतः पङ्क्तिद्वयम् ॥

एवं चतुर्भ्यां सामलसारकशिखरोपरितनभागबन्धः ॥

स्मरज्वरतिरस्कार ! प्रभो ! क्षिप्रं महोदयम् ।
यमिन् ! मम शयप्राप्तं कुरुष्व करुणाकर ! ॥ २४ ॥ १५८

नतेन्द्र ! कुरु रङ्गं मे यशोमय ! तवाऽऽगमे ।
ज्ञात्वेदं विदधे मन्दं येन भावद्विषां मदम् ॥ २५ ॥ १५९

अर्द्धाभ्यां बृहन्मण्डपादुभयतो लघुमण्डपद्वयबन्धः ॥

अथ बृहन्मण्डपः –

प्राप्तानन्तशिवश्रीक ! करुणाक्षीरसागर ! ।
रतीशद्विपसिंहाभ ! भद्रं देहि महोदय ! ॥ २६ ॥ १६०

महद्भिर्यैर्विभो ! पीतं तवाऽऽगमरसायनम् ।
न तान् विबाधते भीमो मोहाह्वो हि महामयः ॥ २७ ॥ १६१

महामण्डपे द्वाभ्यां मध्यपङ्क्ति ॥

यतमानास्त्वदर्चायां यान्ति नैवाऽधमां गतिम् ।
तिरस्कृतभवाः किन्तु तुष्यन्ति शिवसम्पदा ॥ २८ ॥ १६२

ज्ञाता(त)निःशेषविज्ञेय ! यशोभृतजगत्त्रय ! ।
यत्याचारस्य ......देह्या शुद्धिं वशिप ! मे सदा ॥ २९ ॥ १६३

महामण्डपे बहिःपङ्क्ती ॥ एवं चतुर्भ्यां सकलशमहामण्डपः ॥

यत्नः शिवश्रीसुखसङ्गमाय यस्य स्तुतौ स्यात् त्वमयं विधेहि ।
हितं ममाऽनन्तमतन्द्रतत्त्व !
तन्त्रेभवीतक्षतसात नेतः ! ॥ ३० ॥ ध्वजः ॥ १६४

एवं स्तुतो रैवतमौलिमौले ! मयाऽपि मुग्धोचितसंस्तवेन ।
विधेहि नेमे ! मम बोधिशुद्धिं
ततो भवेद् येन वशा शिवश्रीः ॥ ३१ ॥ १६५

द्वाभ्यां सदण्डध्वजबन्धः ॥

एवं रैवतकाद्रिमण्डनमणिं श्रीनेमिविश्वप्रभुं
शक्रालीमुनिसुन्दरस्तुतिपदं यः स्तौति चित्रैर्मुदा ।
आसंसारमभीप्सिताखिलसुखैः स्फूर्जत्प्रमोदाद्वयो
मोहद्वेषिजयश्रिया स लभते श्रेयोऽचिराच्छाश्वतम् ॥ ३२ ॥ १६६

इति श्रीरैवतकालङ्कार-श्रीनेमिनाथस्तवनं श्रीमुनिसुन्दर-सूरिकृतम् ॥

इति युगप्रधानावतार-तपाबृहद्गच्छाधिराज-परमपूज्य-श्रीदेवसुन्दरसूरिगुरुगुणमहिमार्णवानुगामिन्यां तद्विनेयश्रीमुनिसुन्दरसूरि-हृदयहिमवदवतीर्णश्रीगुरुप्रभाव-पद्मह्रदप्रभवायां श्रीपर्युषणा-महापर्वविज्ञप्तित्रिदशतरङ्गिण्यां जयश्र्यङ्कायां द्वितीये श्रीगूर्जरा-वती-देशतन्नरेश्वरश्रीपत्तननगरादिवर्णनस्रोतसि चैत्यषट्क-बन्धचित्रमहाह्रदे स्वस्वदेवस्तुतिरूपे श्रीरैवतकाचलाल-ङ्कारश्रीनेमिचैत्यचित्रान्तर्ह्रदे श्रीरैवतकाचलालङ्कार-श्रीनेमिस्तोत्रखण्डरूपे शिखरमण्डप-कलशध्वजबन्धनामानः

षष्टसप्तमाऽष्टमाः युगपदेव तरङ्गाः । चैत्यमहाहृदे च मूलतश्च (१९, २०, २१) ॥ सम्पूर्णश्चाऽयं श्रीरैवतकाचलालङ्कारश्रीनेमि-स्तवरूपश्रीरैवताद्रि - श्रीरैवतकाचलालङ्कार-श्रीनेमिमहा-चैत्यबन्धचित्रान्तर्हृदः । अन्तराले प्रथमस्तोत्रस्याऽन्ते "एवं रैवतकाद्रिमण्डनमणिमिति" काव्यस्य द्वितीयस्तोत्रस्य चादौ "जगज्जैत्रस्ये" ति श्लोकस्य चाऽपाठे एकमेव महत् स्तोत्रं भवति ॥

अथ श्रीजीरापल्लीमण्डनश्रीपार्श्वचैत्यबन्धचित्रनामान्तर्हृदः । तत्र श्रीपार्श्वस्तुतिरूपः(प)स्तोत्रद्वयेन प्रस्तूयते । तत्र पूर्वं जालिकाबन्धरूपपीठबन्धस्तोत्रम् -

श्रीमत्पार्श्वविभो ! वच्मि जीरापल्लिविभूषण ! ।
स्तुतीस्ते चैत्यचित्रेण द्वैधद्वेषि जयश्रिये ॥ १ ॥ १६७
प्रस्तावनाश्लोकः चित्रादधिकः ॥

जय श्रीपार्श्व ! दुर्वारि (र)विघ्नोच्चयहृतिक्षम ! ।
भगवन् ! भवनिस्तारकर ! भावयुजा(जो?) जिन ! ॥ २ ॥१६८

परमज्ञानविज्ञातसर्वभाव ! महाशय ! ।
जगदानन्दसन्दोहनिदान ! जननादिक ! ॥ ३ ॥ युग्मम् १६९

पीठे जालिकाबन्धे देवाद्दक्षिणत आद्योद्धर्वदण्डके मध्यभाग-कोणादारभ्य उद्धर्वाधोगत्या द्वितीयप्रान्तोर्ध्वदण्डकमध्य-प्रविष्टप्रान्तपीतवर्णप्रथमपङ्क्तिबन्धः ॥

जगत्तात ! परज्ञानदूरीकृततमोभर ! ।
जिनेश ! तव संसार-भीतोऽहं शरणं श्रये ॥ ४ ॥ १७०

पादि(हि?) मं(मां?) तद्दयासत्रधामाऽरीण ! हितालय ! ।
त्वमेव जगतां येन पालनेऽलमसि प्रभुः ॥ ५ ॥ १७१

तत्रैव तथैव तत एवाऽऽरभ्याऽध[ऊ]र्द्ध्वगत्या नीलवर्ण-द्वितीयपङ्क्तिबन्धः ॥

विकाररहिताकार ! नलिनीदललोचन ! ।
निशाकान्तमदप्रान्तकरकान्तगुणानन ! ॥ ६ ॥ १७२

नीलोत्पलविनीलाङ्ग ! जगत्त्राणलसन्मनाः ! ।
असंख्यसत्त्वसन्देहहरणक्षमभाषित ! ॥ ७ ॥ १७३

तत्रैव तथैवाऽऽद्योर्ध्वदण्डके उपरितनभागकोणदारभ्य प्रथमा मूलतश्च तृतीया नीलवर्णा ऊर्ध्वाधोगामिनी पङ्क्तिः ॥

विश्वापापाऽतिदुष्टारिलीलाकृतजयादर ! ।
प्राप्त त्रैलोक्यनिष्णात-पूज्यभावगुणोदय ! ॥ ८ ॥ १७४

सर्वज्ञानरमापात्र ! परमः पारगामिनाम् ।
त्वमेव नय मां क्षीणकषायं स्वपदं विभुः (भो!) ॥ ९ ॥ १७५
चतुर्भिः कलापकम् ॥

तत्रैव तथैव तत एव कोणादारभ्याधऊर्द्ध्वगामिनी रक्तवर्णा द्वितीया मूलतश्च चतुर्थी पङ्क्तिः ॥

कर्मसन्तप्तसंसारि-सुधाहृदसमाऽमम ! ।
फणिस्फारफटाटोपमण्डितेश ! शिवालय ! ॥ १० ॥ १७६

स्वर्णाचलशिरःस्नात ! नम्रीभूतसुरव्रज ! ।
जिनराज ! जगत्त्राण ! त्वं मां रक्ष(क्षाऽ)क्षितारक ! ॥ ११ ॥
युग्मम् १७७

तत्रैव तथैव आद्योर्द्ध्वदण्डकेऽधस्तनकोणादारभ्योर्द्ध्वाऽ-
धोगामिनी रक्तवर्णा प्रथमा मूलतश्च पञ्चमी पङ्क्तिः ॥

करोति तव यो ध्यानं सर्वसातस्य साधनम् ।
गताशुभ ! न दुष्प्राप-स्तस्य वासो महोदये ॥ १२ ॥ १७८
विहिता[नं]तभीभङ्ग ! सत्प्रभावक्रमाम्बुज ! ।
त्वदेकशरणं दीनं मां कुरुष्व सुखाश्रितम् ॥ १३ ॥ १७९

तत्रैव तथैव तत एव कोणादारभ्य द्वितीया मूलतश्च षष्ठी नीलवर्णा पङ्क्तिः ।. एवमूर्ध्वाधोगामिपङ्क्तिषट्केन द्वादशश्लोकग्रथितेन मिथःसंवलितेनाऽन्तरा स्पर्द्धकानि कुर्वता जालिकाबन्धः सम्पूर्णः॥

शमामृतरसाचान्तं त्वन्मुखं लोचना[स]मम् ।
वीक्ष्य विज्ञायते तात ! मुक्तिर्वशमिता किल ॥ १४ ॥ १८०

पीठे जालिकायामधस्तनी सरलप्रलम्बा पङ्क्तिः ॥

भवनीरधिपाराय नीलतारस्फुरद्गसो ।
वीरपोतनिभं पापाऽपहं त्वां संश्रयाम्यलम् ॥ १५ ॥ १८१

पीठे जालिकायामुपरितनी सरलप्रलम्बा पङ्क्तिः ॥

भद्राणि वितर व्याज-हीनां धर्मकलां दिशन् ।
गतशोक ! सदाप्रीत ! भक्त्या ऋभुनतक्रम ! ॥१६॥ १८२

पीठे जालिकायामुभयतो अर्धाभ्यामाद्यन्तयोरूद्ध्वर्वदण्ड-
काकारपङ्क्तिद्वयम् ॥

इति पञ्चदशभिः सम्पूर्णो जालिकाबन्धाकारः पीठबन्धः ॥

एवं जीरापल्लिकामौलिमौले !
पार्श्व ! श्रीमन् ! संस्तुतो भक्तियोगात् ।
देयाः स्वामिन् ! वारिराशे ! महिम्नां
सर्वप्रेयः ! श्रेयसां मे विलासम् ॥ १७ ॥ १८३

श्रीजीराउलिपार्श्वनाथमिति यः सर्वेन्द्रपद्मावती-
वैरोट्यामुनिसुन्दरस्तुतिपदं संस्तौति चित्रैर्मुदा ।
आसंसारमभीप्सिताखिलसुखैः स्फूर्जत्प्रमोद दयो
मोहद्वेषिजयश्रिया स लभते श्रेयोऽचिराच्छाश्वतम् ॥ १८ ॥ १८४

इति श्रीजीरापल्लिकामौलिमण्डनश्रीपार्श्वनाथस्तवनम् । तच्चैत्यबन्धेन श्रीमुनिसुन्दरसूरिकृतम् ॥ इति युगप्रधानावतार तपाबृहद्गच्छाधिराजपरमपूज्यश्री-देवसुन्दरसूरिगुरुगुण-महिमाऽर्णवाऽनुगामिन्यां तद्विनेयश्रीमुनिसुन्दरसूरिहृदयहिमव० श्रीपर्युषणामहापर्वविज्ञप्तित्रिदशतरङ्गिण्यां जयश्र्यङ्कायां द्वितीये श्रीगूर्जरावतीदेश० श्रोतसि चैत्यषट्कबन्धचित्रमहाहृदे स्वस्वदेवस्तुतिरूपे श्रीजीरापल्लीमण्डनश्रीपार्श्वचैत्यचित्रान्तर्हृदे तत्पार्श्वस्तुतिरूपे पीठबन्धनामकौ प्रथमद्वितीयौ युगपदेव तरङ्गौ ॥ चैत्यष० महाहृदे च मूलतश्च (२२-२३) ॥ सम्पूर्णं च ताभ्यां प्रथमद्वितीयाभ्यां तरङ्गाभ्यां प्रथमं स्तोत्रम् ॥

जयश्रियो मुक्तिपदस्य दातः ! पद्मावतीध्येयपदारविन्द ! ।
श्रीजीरिकापल्ल्यवतंस ! पार्श्व !
नागेन्द्रसंसेव्य ! महाप्रभाव ! ॥ १ ॥ १८५

यतः समग्रामरमर्त्यवन्द्यात्
स्तुताद् वशीस्याच्छिवशर्मलक्ष्मीः ।

स्तवीमि तं त्वां जगदीश ! पार्श्व !
समीहितं येन रयाल्लभेयम् ॥ २ ॥ १८६
गर्भागारे देवाद्दक्षिणतो भित्तौ तन्निष्पादकपङ्क्तिद्वयेन शाखाद्वयम् ॥

यतमानस्तव स्तोत्रे क्षिपते कर्मसंकरम् ।
चिनुतेऽपरदेवानां स्तवे त्वनघ ! तं नरः ॥ ३ ॥ १८७

तज्ज्ञास्तेन चिदां पात्रे त्वय्येव कलयन्त्यरम् ।
स्तुत्याक्षेपमनन्तानां गुणानां नन्दने परम् ॥ ४ ॥ १८८

ज्ञमण्डलभवभ्रान्तिभिदोऽर्हन् हेतवः शुभे ।
नीलोत्पलजितो भान्ति तव देहे लसत्प्रभाः ॥ ५ ॥ १८९
[त]त्रैव स(म)ध्ये त्रिभिरन्तरालपूरकवल्ल्याकारबन्धः । एवं सम्पूर्णः प्रथमभित्तिबन्धः ॥

भावारिवर्गस्य विजृम्भितं तत् खलायितं विश्वपते ! कलेर्वा ।
देवान्तरोपास्तिमदात् परे य-
च्छिवार्थिनस्त्वामपि नाऽऽद्रियन्ते ॥ ६ ॥ १९०

भदन्तमीशं जगतां हितैककर्तारमानन्त्यधरं गुणानाम् ।
भवन्तमार्याः स्तवयन्ति पार्श्व !
भवभ्रमक्लेशविनाशहेतोः ॥ ७ ॥ १९१

गर्भागारे देवाद् वामतो भित्तौ तन्निष्पादकपङ्क्तिद्वयेन शाखाद्वयबन्धः ॥
भित्तिद्वयेऽपि मध्यमध्यशाखाद्वयेनोभयतो द्वारशाखाद्वयबन्धोऽपि च ॥

वाणी तव विभो ! भेदं नयत्येव भवापदम् ।
दरदावनवाम्भोद-त्रिलोकाऽवनकोविद ! ॥ ८ ॥ १९२

महोदयरमाभोगो न दूरे तस्य भाविनः ।
यस्ते देव ! पदाम्भोजं ध्यायतीभाऽघभूरुहे ॥ ९ ॥ १९३

तस्येन्द्रियरसत्यागो दुर्लभोऽतत्त्ववेदिनः ।
शृणोत्यवनतज्ञाऽज ! त्वदीयां भारतीं न यः ॥ १० ॥ १९४
त्रिभिस्तत्रैव मध्येऽन्तरालपूरकवल्ल्याकारबन्धः ॥
एवं द्वितीयभित्तिः ॥

जगत्पतिर्यः सदयः फणीन्द-मजीगमत् श्रीपरमेष्ठिमन्त्रात् ।
दैवीं श्रियं सोऽस्तु शिवाय पार्श्वः
स्फुरत्प्रभावः फलिनीलताभः ॥ ११ ॥ १९५

यः सर्वदेवेषु सुतत्त्वरूपो नित्योदितज्ञानविलासशाली ।
स्तुतो भवत्येव शिवाय सोऽर्हन्
कुर्याद् भवापायभरापनोदम् ॥ १२ ॥ १९६
द्वाभ्यां पङ्क्तिद्वयस्थिताभ्यां प्रासादे गर्भागारस्य तलबन्धः ॥

समग्रविघ्नव्रजघातदक्षः क्षमो जगत्त्राणविधौ धुतार ! ।
अनङ्गनज्ञानधर ! स्मरश्रीरसारतो रक्ष नतानरं नः ॥ १३ ॥
उंबरबन्धः ॥ १९७

दमो दया सत्यमलोभता च तपः परं ब्रह्म कषायमोक्षः ।
इत्यादयो यत्र गुणा विविक्ता
वर्ण्या नितान्तं जगतां हिताय ॥ १४ ॥ १९८

भवेत् पुमर्थेषु तथोत्तमस्य धर्मस्य यस्मात् प्रकटो ह्युपायः ।
त्वदागमोऽयं बहुभिः सुपुण्यै-
र्जिनाऽऽप्यते सर्वहितोपदेष्टा ॥ १५ ॥ १९९

तथैव महामण्डपस्य तलबन्धः ॥

वशीबभूवाऽद्भुतयत्त(वृत्त?)धारी यमव्रजे यः परमार्थदर्शी ।
महामनाः संश्रितयोगिकोटिः
कैवल्यतेजःप्रचयस्य हेतोः(तुः?) ॥ १६ ॥ २००

भावद्विषत्सामजभेदसिंहः फणीन्द्रसंसेवितपादपद्मः ।
स चिन्तनातीतसुखप्रदाता
पार्श्वः श्रियं रातु रतोऽघदाहे ॥ १७ ॥ युग्मम् ॥ २०१

द्वाभ्यां पङ्क्तिद्वयस्थिताभ्यां गर्भागारे उपरी(रि) भारपट्टाकारपद्म-शिलाबन्धः ॥ उत्तरङ्गाकारबन्धोऽपि च ॥

इति युगप्रधानावतार-तपाबृहद्गच्छाधिराज-परमपूज्यश्रीदेवसुन्दरसूरि-गुरुगुणमहिमार्णवानुगामिन्यां तद्विनेयश्री-मुनिसुन्दरसूरिहृदयहि० श्रीपर्युषणामहापर्वविज्ञप्तित्रिदशतरङ्गिण्यां जयश्र्यङ्कायां द्वितीये श्रीगूर्जरावतीदेश-तन्नरेश्वर-श्रीपत्तननगरादिवर्णनश्रोतसि० चैत्यषट्कबन्धचित्रमहाह्रदे स्वस्वदेवस्तुतिरूपे श्रीजीरापल्लीमण्डनश्रीपार्श्वचैत्यचित्रान्तर्ह्रदे तदीयश्रीपार्श्वस्तुतिरूपे द्वितीयस्तोत्रे गर्भागारभित्तिद्वय-समण्डपप्रासादतलबन्धगर्भागारद्वारशाखोम्बरपद्मशिलोत्तरङ्गबन्ध-नामकौ तृतीयचतुर्थौ युगपत्तरङ्गौ ॥ चैत्यषट्कबन्धचित्रमहाह्रदे च मूलतश्च (२४-२५) ॥

भवन्त्यवश्यं तव नामशून्याः सर्वेऽपि मन्त्रा विफला नराणाम् ।
संस्थाप्यमाना अपि बिन्दवः
किमादिस्थिताङ्कैर्विकलाः फलाय ॥ १८ ॥ २०२

गर्भागारादारभ्य मण्डपे प्रथमः ॥

स्मरन्ति रम्यं तव नाममन्त्रं ये सुप्रभाते दृढभक्तिभाजः ।
सर्वेहितार्थान् खलु ते लभन्ते
रयादिदं मेऽप्यनुभूतिभूमिः ॥ १९ ॥ २०३

मण्डपे द्वितीयः स्तम्भः ॥

स्फुरत्तरस्फारफणालिशाखा बिभ्रन्मणीपल्लवपेशलाग्राः ।
त्वं नाथ ! युक्तं कलिकल्पवृक्षः
सतां करोषीहितसारसातम् ॥ २० ॥ २०४

तृतीयः स्तम्भः ॥

सुरा हराद्या अपि पादपद्मं ध्यायन्ति ते नाथ ! शिवाप्तिकामाः ।
संसारदुःखौघविमोचनाय यदस्त्युपायः पर एष एव ॥ २१ ॥ २०५

चतुर्थः स्तम्भः ॥

विना जिनाधीश ! तवाऽऽगमेन
न प्राणिनः कर्ममलो व्यु(व्य)पैति ।
शुद्धिः कुतो वा कतकस्य चूर्णं
विना रजोभिर्मलिने वने[स्यात् ?] ॥ २२ ॥ २०६

मण्डपे पञ्चमः स्तम्भः ॥

एवं मण्डपद्वयस्य स्तम्भपञ्चकबन्धः ॥

तोषं देहि गतद्वन्द्व ! हे श्रीपार्श्वविभो ! मम ।
अमेयमहिमागार ! भक्त्या नम्रनरामर ! ॥ २३ ॥ २०७

मण्डपद्वये गर्भागारद्वा(रादा) रभ्य
पङ्क्तिद्वयरूपभारपट्टखण्डत्रयबन्धः ॥

तव सेवाफलाभिज्ञाः न रमन्ते सुरान्तरे ।
चिन्तारत्नगुणज्ञा हि काचेऽनादरधारकाः ॥ २४ ॥ २०८

मेधाविप्रवरा ये त्वां श्रयन्ति शरणं विभो ! ।
रागाद्याः शत्रवो नैषां भवन्ति दरकारकाः ॥ २५ ॥ २०९
स(म)हामण्डपेऽधस्तनमध्यपङ्क्तौ साधोमुखकमले ॥

गरीयो महिमागारं त्वं नवः कल्पपादपः ।
यः स्मृतोऽपि सदाऽभीष्टततीर्वितनुषेऽङ्गिनः ॥ २६ ॥ २१०

महामूढा रता देवान्तरे जानन्ति किं... ।
असन्मुक्तिः परो मुक्तिं दत्ते स्तुतपदोऽपि न ॥ २७ ॥ २११
महामण्डपे उपरितने बहिःपङ्क्तौ सकलशे ॥

एवं चतुर्भ्यां साधोमुख-कमल[कल]शमहामण्डपबन्धः ।
महानन्दपदप्राप्ति-दुर्लभा तस्य नाऽङ्गिनः ।
गाढभक्त्या प्रभुं स्तौति यस्त्वां सन्त्यज्य रागिणः ॥ २८ ॥ २१२
लघुमण्डपबन्धः ॥

भग्नारिश्रीः शुभश्रेणीदातः ! पापभरापहृत् ।
श्रीपार्श्व ! क्षोभमुक्तस्त्वं सना मे भज नाथताम् ॥ २९ ॥ २१३
शिखरमूले तन्मध्ये च पार्श्वनाथेति नामगर्भं कमलम् ॥

शिवार्थिनो नंनमति प्रकामं मनस्विनः संशमिताऽघराशेः ।
न के भवन्तं तरसा ददानं
न तेषु मोक्षं क्षमयाऽभिरामम् ॥ ३० ॥ २१४

शिखरे मूलशकुनाशेतिशास्त्रप्रसिद्धगर्भागारिकाबन्धः ॥

जगन्मित्र ! नवः कोऽपि त्वत्प्रभावप्रभाचयः ।
स्तुतोऽपि हरते विघ्नध्वान्तजालं सुजात ! यः ॥ ३१ ॥ २१५
अर्द्धाभ्यां शिखरमूले देवाद्वामतो दक्षिणतश्च
प्रथमे बहिःखण्डदेवकुलिके ॥

इति युगप्रधानावतार-तपाबृहद्गच्छाधिराज-परमपूज्य-श्रीदेवसुन्दरसूरि-गुरुगुणमहिमार्णवानुगामिन्यां तद्विनेयश्रीमुनि-सुन्दरसूरिहृदयहिमवदवतीर्ण० श्रीपर्युषणा-महापर्व-विज्ञप्ति-दशतरङ्गिण्यां जयश्र्यङ्कायां द्वितीये श्रीगूर्जरावतीदेशतन्नरेश्वर-श्रीपत्तननगरादिवर्णनश्रोतसि चैत्यषट्कबन्धचित्रमहाहृदे स्वस्वदेवस्तुतिरूपे श्री जीरापल्लीमण्डनश्रीपार्श्वचैत्यचित्रान्तर्हृदे तत्श्रीपार्श्वस्तवरूपे द्वितीयस्तोत्रे स्तम्भपञ्चक-तदुपरितनभार-पट्टमहामण्डपसाधोमुखकमलमध्यपङ्क्तिसकलशबहिः पङ्क्तिलघुमण्डपशिखरमूल-तन्मध्यकमलगर्भागारिका-उभयपार्श्वस्थबहिःप्रथमखण्डदेवकुलिकाद्वयबन्धनामकौ युगपत् पञ्चमषष्ठौ तरङ्गौ ॥ चैत्यषट्कबन्ध० महाहृदे च मूलतश्च (२६-२७) ॥

त्वदीयगुणसन्दोहे रमते यस्य भारती ।
भारती दुर्लभे(भा) नैव तस्य सच्छर्मसङ्गिनः । ३२ ॥ २१६
शिखरे देवाद्दक्षिणतो द्वितीया बहिःशीर्षा खण्डदेवकुलिका ॥

अतुल्यगुणसन्दोह ! हताज्ञानतमोभर ! ।
रत ! संसारविध्वंसे सेवे तव नतः पदौ ॥ ३३॥ २१७
तादृश्येव देवाद् वामतो द्वितीया खण्डदेवकुलिका ॥

जगज्जिनेन्दो ! शरणं समाश्रितं तवैव संसाररिपोर्बिभेति न ।
न दन्तिनो हन्ति भयं हि वेतसं
समाश्रितः कोऽपि समुल्लसत्क्रुधः ॥ ३४ ॥ २१८

शिखरे देवाद्दक्षिण(त) स्तादृश्येव तृतीया देवकुलिका ॥

अनन्तसद्दर्शनचारुलोचनं नतो भवन्तं भवभीतिमोचनम् ।
न(त्वां?) नौति नूनं परमर्च्यतां भजन्
जगत्त्रयस्याऽपि महत्तमः श्रिया ॥ ३५ ॥ २१९

शिखरे देवाद् वामतस्तादृश्येव तृतीया देवकुलिका ॥

त्वन्नाममन्त्रो हरते प्रजानां नानामहाविघ्नचयं स्मृतोऽपि ।
वशीकरोता(ती)हितमङ्गलानि
निरञ्जनध्येयबुधस्तुतोऽर्हन् ॥ ३६ ॥ २२०

शिखरे शकुनासोपरि अर्धाभ्यां पङ्ि क्तद्वयेन सर्वमध्या देवकुलिका॥

अनन्तमाहात्म्यमयस्वरूपं पराभिभूतान्तरवैरिचक्रम् ।
क्रमाब्जसेवापरनागराजं जगत्पतिं पार्श्वजिनं महेश! ॥ ३७ ॥ २२१

अकालकालाब्दपयः प्रवाहहतोऽपि ते ध्यानशिखी दिदीपे ।
पेठुर्बुधास्तेन भवद्यशांसि
सितांशुशुभ्राणि सुधाम[धाम!] ॥ ३८ ॥ २२२

शिखरमध्ये द्वाभ्यां पङ्क्तिद्वयस्थिताभ्यां मध्यमा महादेवकुलिका ॥

नीलोत्पलविनीलाङ्ग ! गतकर्ममहाभय !
यशसामेकपात्रं त्वं त्वरितं वाञ्छितं कुरु ॥ ३९ ॥ २२३

शिखरे तद्गर्भमध्यमहादेवकुलिका ॥

हतमोहमहायोध ! धरणाऽभ्यर्चितक्रम ! ।
ममाऽऽनन्दपदं देहि हितसर्वस्वसङ्गतम् ॥ ४० ॥ २२४

तत्रैव कुलिकातो वामतः खण्डदेवकुलिका ॥

नमत्फणिफणस्फाररत्नोद्भासिक्रमाम्बुज ! ।
जय पार्श्व ! जगत्तात ! तनुभाजितनीरज ! ॥ ४१ ॥ २२५

शिखरे सर्वोपरितनभागे मध्यपङ्क्ती ॥

सितमपि वचनं ते नाथ ! संसारतापं
परिभवति परेषां नैव बह्वप्यराग ! ।
गरममृतलवोऽपि प्रापयत्याशु नाशं
शतमपि न घटा यद्वारिणः प्राणभाजः ॥ ४२ ॥ २२६

तव चरणसपर्या देव ! सर्वाघवृन्दं
दव(ल)यति भवभाजां सर्वतः साध्वसं च ।
चतुरनुतगुणौघ ! श्रेयसां चाऽपि पुञ्जं
जनयति परितोऽवि स्तोतृदेवाधिराज ! ॥ ४३ ॥ २२७

द्वाभ्यां शकुनासादारब्धमूलामलसारकप्रविष्टप्रान्तमध्य-गतबहिर्गताद्धार्द्धपङ्क्ति-स्थिताभ्यां सामलसारकः सम्पूर्णः शिखरबन्धः ॥

धरणोरगनाथस्ते भक्तानां भगवन् ! वरम् ।
रभसा सादरं दत्ते विहितेष्टहितः सना ॥ ४४ ॥ कलशः ॥२२८
यस्यानर्था(घा?)ज्ञा विमदीकरोति वेतालभूपालफणीभसिंहान्।
अकालकालज्वलदालयादि-
भियश्च जेघ्नेति कृतिस्तुतिज्ञा ॥ ४५ ॥ २२९

अघवल्ल्यां स वह्न्याभो वरज्ञानधनो जिनः ।
भवतानवकारी नः कुर्याद् भयजयं ... ॥ ४६ ॥ ध्वजः ॥२३०

एवं मया स्तुत ! जगत्पतिपार्श्वजीरा-
पल्लीवतंस ! वितराऽऽशु मम प्रसद्य ।
आरोग्यबोधिविभवौ वरभक्तपद्मा-
वत्यौरगेश्वरशिरोमुकुटायितांह्रे ! ॥ ४७ ॥ २३१

श्रीजीराउलिपार्श्वनाथमिति यः सर्वेन्द्रपद्मावती-
वैरोट्या मुनिसुन्दरस्तुतिपदं संस्तौति चित्रैर्मुदा ।
आसंसारमभीप्सिताखिलसुखैः स्फूर्जत्प्रमोदाद्वयो
मोहद्वेषिजयश्रिया स लभते श्रेयोऽचिराच्छाश्वतम् ॥ ४८ ॥२३२
श्रीजीरिकापल्लिमण्डनश्रीपार्श्वनाथस्तवनं
तच्चैत्यबन्धेन श्रीमुनिसुन्दरसूरिकृतम् ॥

इति युगप्रधानावतार तपाबृहद्गच्छपरमपूज्यश्रीदेवसुन्दर-सूरिगुरुगुणमहिमाऽर्णवाऽनुगामिन्यां तद्विनेयश्रीमुनिसुन्दरसूरि-हृदयहिमवदवतीर्णश्रीगुरुप्रभावपद्महृदप्रभवायां श्रीपर्युषणा-महापर्वविज्ञप्तित्रिदशतरङ्गिण्यां जयश्र्यङ्कायां द्वितीये श्रीगूर्जरा-वतीदेशतन्नरेश्वरश्रीपत्तननगरादिश्रोतसि चैत्यषट्क-बन्धचित्रमहाहृदे स्वस्वदेवस्तुतिरूपे श्रीजीरापल्ली-मण्डनश्रीपार्श्वजिनचैत्यचित्रान्तर्हृदे तत्श्रीपार्श्वस्तवरूपे द्वितीयस्तोत्रे सालेखे शिखरकलशध्व-जबन्धनामानौ युगपत् सप्तमाऽष्टमौ तरङ्गौ ॥ चैत्यषट्कबन्ध-चित्रमहाहृदे च मूलतश्च (२८-२९) ॥ सम्पूर्णश्चाऽयं तदीयस्तोत्रद्वयेन श्रीजीरापल्ली-मण्डनश्रीपार्श्वचैत्यचित्रान्तर्हृदः ॥

अथ श्रीमहावीरजिनचैत्यचित्रान्तर्हृदस्तदीयस्तुतिरूपः प्रस्तूयते–

जयश्रियं प्राप्य महाभटानां रागादिकानां जितविष्टपानाम् ।
बभूव यः सार्थकनामधेयः प्रभुं महावीरमिमं स्तवीमि ॥१॥
श्रीवीरप्रासादे तलबन्धः ॥ २३३

न शक्यते या सदृशादृतैस्ते स्तुतिः सुरेन्द्रैरपि कर्तुमीश ! ।
तां संविधित्सन्नहमल्पबुद्धिः
स्फुटं ब्रवीमि प्रभुशक्तिमौग्ध्यम् ॥ २ ॥ २३४
गर्भागाराच्छादकपद्मशिलाकारभारपट्टबन्धः ॥

रमानिधे ! वीर ! भवाब्धिपारं ददासि सुध्येयपदारविन्द ! ।
त्वमेव संसाधितसिद्धियोगा(ग) !
रसाऽर्दितः पारगताऽविकार ! ॥ ३ ॥ २३५

रतीशदुर्वारविकारभारं(र)संहारहेतुर्वचनं त्वदीयम् ।
तत्त्वावबोधं भविनां तनोति
रङ्गद्गुणाधार ! विनिर्जिताऽर ! ॥ ४ ॥ २३६
द्वाभ्यां पङ्क्तिद्वयस्थिताभ्यां पीठे प्रथमं सोपानम् ॥

रवाऽपास्तस्फुरद्दाद्र्द ! तनुभाजितकाञ्चन ! ।
लीलाचलितदेवाद्रे ! जय रम्य ! सुखाकर ! ॥ ५ ॥ २३७

रमते यस्य धीरस्य त्वदगुणस्तवने मतिः ।
पदं स लभते नूनं श्रीवीर! भुवनोत्तरम् ॥ ६ ॥ २३८
तथैव द्वाभ्यां पङ्क्तिद्वयस्थिताभ्यां द्वितीयं सोपानम् ॥

रयाद् भवभियां पारं रतस्त्वत्पूजने नरः ।
रङ्कोऽपि सुरपूज्योऽरं रङ्गवांल्लभतेऽक्षरम् ॥ ७ ॥ २३९
तत्रैवाऽनेन पङ्क्तिस्थितार्द्धद्वयेन तृतीयसोपानम् ॥

स्तुतिं यतितितिस्तुत्य ! भगवन् ! विदधत्तव ।
लभते भविदोऽभीष्टमकाम ! शमधाम ! शम् ॥ ८ ॥ २४०

गर्भागारे देवाद्दक्षिणतः प्रथमस्तम्भः ॥

वरहारहरक्षीरगौराः कीर्त्तिभरास्तव ।
धवलीकुर्वते विश्वं ज्ञस्तोमस्य महामताः ॥ ९ ॥ २४१

द्वितीयस्तम्भः ॥

ये नटा नव्यनव्यस्वावतारैर्मोहका नृणाम् ।
श्रितास्तेऽपि त्वदज्ञैर्ही देवाऽरतिरसे रतैः ॥ १० ॥ २४२

तृतीयस्तम्भः ॥

रविं भुवि भविस्फूर्ज-न्मोहध्वान्तक्षये विभो ! ।
त्वामाश्रित्य जयत्येव न को भव्यो भवं भटम् ॥ ११ ॥ २४३

चतुर्थस्तम्भः ॥

स महा(समहा?) मम मङ्गल्यलक्ष्मीलीलागृहं भवेत् ।
यस्ते नाथ ! पदद्वन्द्वं स्तौति भग्नभयं भवी ॥ १२ ॥ २४४

पञ्चमस्तम्भः ॥

स्मरवीरतिरस्कारक्षम ! नाथैकशोऽप्यहो ! ।
नयतस्तेन तं स्वस्य सच्चक्रं शक्रतां क्रमौ ॥ १३ ॥ २४५

षष्ठः स्तम्भः ॥

एवं स्तम्भषट्कबन्धः ॥ एवं त्रयोदशभिः सम्पूर्णः सपीठससोपान-गर्भा[गा]रबन्धः ॥

इति युगप्रधानावतार० नुगामिन्यां तद्विनेयश्रीमुनिसुन्दरसूरिहृदय० त्रिदशतरङ्गिण्यां जयश्र्यङ्कायां द्वितीये श्रीगूर्जरावती० स्रोतसि

चैत्यषट्कबन्धचित्रमहाह्रदे स्वस्वदेवस्तुतिरूपे श्रीवीरस्तवरूपतच्चैत्यचित्रान्तर्ह्रदे सपीठ गर्भागारबन्धनामानौ युगपत् प्रथमद्वितीयौ तरङ्गै ॥ चैत्यषट्कबन्धचित्रमहाह्रदे मूलतश्च (३०-३१) ॥

शमिनां ते श्रयेद्वाणी मुक्तिसौधाधिरोहणे ।
तात ! निश्रेणिदण्ड ! त्वं सुपदन्यासकारणे ॥ १४ ॥ २४६

देवाद्दक्षिणतो मण्डपः ॥

वीरनाथ ! गुणान् स्तौति या ते वाग्(क्) सैव मे मता ।
मौलयश्चापि धन्यास्ते ये त्वदंह्रियुगे नता ॥ १५ ॥ २४७

देवाद्वामतो मण्डपः ॥

जयति श्रीभुजः कुर्वन् स्वानमज्जा जनान् (स्वमानमज्जनान् ?) विभुः ।
सुमहा तेजसां धाम श्रीवीरो जन्तुतारकः ॥ १६ ॥ २४८

शिखरमूले श्रीमहावीरनाथनामगर्भं पञ्चम(द?)लं[कमलम्] ॥

श्रीवर्धमानं नतनाकिराजं जन्मादिहीनं नमतैत्यवन्द्यम् (?) ।
भव्याङ्गिनोऽशंशमि येन मोह-
हरेण तापः परितो भवस्य ॥ १७ ॥ २४९

शिखरे शकुनासेतिप्रसिद्धगर्भागारिकाबन्धः ॥

अनन्तदर्शनज्ञानपद्मानन ! मनस्विनः ।
त्वामेव भुवने देवं प्राहुर्भवदवस्रवम् ॥ १८ ॥ २५०

अर्द्धाभ्यां शिखरमूले उभयतः प्रथमे बहिः खण्डदेवकुलिके ॥

न रोषलेशं दधसे कदापि महामनास्त्वं शमधाम [वीर !(?)]।

तथाप्यवज्ञादिकृतो विधत्से
विभो ! महादण्डमकाम ! कामम् ॥ १९ ॥ २५१
शिखरमूलेऽर्द्धाभ्यां उभयतो मध्यमे खण्डदेवकुलिके ॥
चकार यः कर्मवनानि भस्मसात् स्वयोगतेजःप्रचयैर्महामनाः ।
कैवल्यलक्ष्मीकलितश्च निर्वृतिं
भेजे स जीयाच्चरमोऽरिहाऽघहृत् ॥ २० ॥ २५२
शिखरे शकुनासोपरि सर्वगर्भमध्यदेवकुलिका ॥

इति युगप्रधानावतार-तपाबृहद्गच्छाधिराज-परमपूज्यश्री-देवसुन्दर-सूरिगुरुगुणमहिमार्णवाऽनुगामिन्यां तद्विनेयश्रीमुनि-सुन्दरसूरि-हृदयहिमव० त्रिदशतरङ्गिण्यां जयश्र्यङ्कायां द्वितीये श्रीगूर्जरावतीदेशतन्नरेश्वर-श्रीपत्तननगरादिवर्णनस्रोतसि चैत्यषट्कबन्धचित्रे महाहृदे स्वस्वदेवस्तुतिरूपे श्रीवीरजिनस्तव-रूपतच्चैत्रा(त्या)न्तर्हृदे मण्डल(प)द्वयकमलगर्भागा-रिकाप्रथमस्थ(स्त)र-खण्डदेवकुलिकाचतुष्क- सर्वमध्यदेव-कुलिकाबन्धनामा तृतीयस्तरङ्गः । चैत्यषट्कबन्धचित्रमहाहृदे अन्तर्हृदे मूलतश्च तरङ्गः (३२) ॥
अतीतलोकत्रितयोपमान ! भदन्त ! नाथाऽमृतसातदातः ! ।
त्वदंह्रिलीनं मम चित्तमस्तु
संसारदुःखोत्करपारगाऽरम् ॥ २१ ॥ २५३
अर्द्धाभ्यां शिखरे द्वितीयस्थ(स्त)रे उभयतो बहिः खण्डदेवकुलिके॥

यै रोषतोषप्रमुखैश्चरि[त्रै]र्जडा हरादीन् मुदितान् स्तुवन्ति ।
त्वदागमाज्जा(ज्ज्ञा) तसमग्रतत्त्वा-
स्तैरेव तान् नाथ ! परित्यजन्ति ॥ २२ ॥ २५४

शिखरोपरितनभागे सामलसारकेऽर्द्धाभ्यां बहिः पङ्क्ती ॥

निरञ्जनं विश्वहितैकहेतुं त्वामीश्वरं ये शरणं श्रयन्ति ।
नूनं परानन्दपदप्रतिष्ठां ते सर्ववेदिन्नचिराद् भजन्ति ॥ २३ ॥२५५
अर्द्धाभ्यां तत्रैव मध्यपङ्क्ती ॥ एवं द्वाभ्या शिखरशीर्षबन्धः ॥

भविनां विश्ववन्द्यस्त्वं ददसे दम्भवर्जितः ।
तरसा सारतत्त्वानि लम्भयन्नभवः शिवम् ॥ २४ ॥ कलशः ॥२५६

मुनीन्द्र ! भक्तत्रिदशेन्द्रवृन्दश्रेयोलताकन्दनवाम्बुवाह ! ।
गताखिलाज्ञान ! मनस्विरम्य !
नमोनमोऽनर्दनतान ! ते नः ॥ २५ ॥ २५७

विश्वबान्धव ! तव स्त[व]मे[तत्]
वीरनाथ ! विरचय्य सुभक्त्या ।
मार्गयामि भगवन् ! शिवहेतुं
बोधिमेव शिवसन्ततिदातः ! ॥ २६ ॥ २५८

द्वाभ्यां ध्वजबन्धः ॥

एवं यो मतिमान् स्तुते जिनवरं श्रीवर्द्धमानाभिधं
शक्रालीमुनिसुन्दरस्तुतिपदं तच्चैत्यचित्रैर्मुदा ।
आसंसारमभीप्सिताखिलसुखैः स्फूर्जत्प्रमोदाद्वयो
मोहद्वेषिजयश्रिया स लभते श्रेयोऽचिराच्छाश्वतम् ॥ २७ ॥२५९
इति श्रीवीरजिनस्तवनं तच्चैत्यबन्धेन
भट्टारकश्रीमुनिसुन्दरसूरिकृतम् ॥
इति स्तवोपसंहारकाव्यम् ॥

इति स्वचैत्याऽभिधचित्रबन्धैः स्तोत्रैः स्तुताः पञ्चजिना मयाऽपि।
दत्त्वा द्रुतं पञ्चमचिद्विलासं गतिं ददन्तां मम पञ्चमीं ताम् ॥२६०
इति पञ्चजिनसर्वस्तोत्ररूपमहाह्रदोपसंहारकाव्यम् ॥ इति पञ्चजिनप्रासादबन्धस्तोत्राणि ।

इत्यादिचित्रैर्बुधचित्रहेतुभि-श्चित्रात्मकैः स्तोत्रगणैः समन्ततः ।
प्रतिप्रभातं जिनराजसद्मसु
स्तुवन्ति यस्मिन् कवयो जिनाकृतीः ॥ १ ॥ २६१

एवं सदा विज्ञविधीयमानस्तोत्रारवैरुन्नतचैत्यपङ्क्तौ ।
यस्मिन् प्रगे भव्यजनश्रवस्सु
भवन्ति पीयूषरसाभिषेकाः ॥ २ ॥ २६२

इति चैत्यषट्कचित्रबद्धपञ्चजिनबहुस्तोत्ररूपमहाह्रदस्य नगरवर्णनसम्बन्धकरणकाव्यद्वयम् ॥ इति युगप्रधानावतार-तपाबृहद्गच्छाधिराजपरमपूज्यश्रीदेवसुन्दर-सूरिगुरुगुण-महिमार्णवानुगामिन्यां तद्विनेय-श्रीमुनिसुन्दरसूरिहृदय-हिमवदवतीर्णश्रीगुरुप्रभावपद्महृदप्रभवायां श्रीपर्युषणामहापर्व-विज्ञप्तित्रिदशतरङ्गिण्यां जयश्र्यङ्कायां द्वितीये श्रीगूर्जरावतीदेश-तन्नरेश्वर-श्रीपत्तननगरादिवर्णनश्रोतसि चैत्यषट्कबन्धचित्रमहाह्रदे स्वस्वदेवस्तुतिरूपे श्रीवीरचैत्यचित्रान्तर्ह्रदे श्रीवीरजिनस्तवरूपे शिखरकलशध्वजबन्धस्तुत्याद्युपसंहारनामा चतुर्थस्तरङ्गः ॥ चैत्यषट्कबन्धमहाह्रदे च अन्तर्ह्रदे मूलतश्च [३३] ॥ सम्पूर्णश्चाऽयं श्रीवीरजिनस्तुतिरूपस्तच्चैत्यचित्रान्तर्ह्रदः ॥ तत्सम्पूर्तौ च सम्पूर्णोऽयं चैत्यषट्कबन्धचित्रनामा महाह्रदः स्वस्वजिनस्तोत्ररूपः॥

पू. पं. श्री नेमिरत्नगणिनिर्मिता

# ११. ॥ स्तोत्रावली ॥

(प्रथमा चतुर्विंशतिका)

## ॥ अथ श्रीजिनगुणसहोक्त्यलङ्कारवर्णन: प्रथम: स्तव: ॥

आनम्रामरनरवरविसरशिरश्चञ्चरीकपरिकलितम् ।
क्रमकमलं ते रमया सममामोदं सतां दत्ताम् ॥ १

संश्रितं मानसं ज्ञानं क्षयं ते कर्मभिः समम् ।
वक्षः पुनस्तवातुल्यं वैपुल्यं दयया समम् ॥ २

लोचने तव पीयूष-पूरिते वचनैः समम् ।
सहैव यशसा बाहु-द्वयं दीर्घं तवाऽजनि ॥ ३

प्रपन्नं पाणिपादं ते मृदिमानं गिरा समम् ।
वंशेन सह ते नासा धत्ते स्मौन्नत्यमद्भुतम् ॥ ४

भेजुः सूर्योपमां प्रेङ्ख-न्नखास्ते सह तेजसा ।
प्रगुणैस्ते गुणैः सार्द्धं दन्ता मुक्ताफलोपमाम् ॥ ५

माहात्म्येन समं तेऽधाद् भास्वद्भालं विशालताम् ।
विकस्वरौ कपोलौ ते सौभाग्येन समं तनौ ॥ ६

नेत्रान्तैः सार्द्धमाधत्ता-मधरौ ते सरागताम् ।
भामण्डलेन साकं च तवांसौ पीनतां भृशम् ॥ ७

श्रितां गम्भीरतां नाभि-स्तव ज्ञानाब्धिना सह ।
नवपद्माश्रितिं चांह्री तव भक्तैः सहाऽऽपताम् ॥ ८

एवं परस्परस्पर्धा-ऽनुबन्धादिव सर्वतः ।
निःशेषमहिमश्रीभिः सहैवाऽऽलिङ्गितो भवान् ॥ ९

सहैकेन विवेकेन मूर्त्तिर्जागर्त्ति तेऽद्भुता ।
येषामन्तर्मनस्तेषां धर्मश्रीः सह शर्मणा ॥ १०

इति सत्कुमुदं तव स्तवं विकचं मे वरसंवराशये ।
जुषती जिनकीर्त्तिराजिता शिवलक्ष्मी रमतां समं मया ॥ ११

**॥ अथ श्रीजिनगुणशृङ्खलालङ्कारवर्णनः स्तवो द्वितीयः॥**

जय विश्वविश्वपूजित ! जितदुर्धरमाररणरङ्गः ।
नतभक्तजनसमीहित-हितदायी वीतराग ! त्वम् ॥ १

हृदा तव परित्यक्तं कौटिल्यं भ्रूयुगं श्रितम् ।
भ्रूयुगेनोज्झितं भेजे वक्त्रेणौज्ज्वल्यमद्भुतम् ॥ २

मुक्तो वक्त्रेण रागोऽय-मध्युवास करद्वयम् ।
करद्वयेन निर्मुक्ता ह्रस्वता शिश्रिये रदैः ॥ ३

शैथिल्यं च रदैस्त्यक्तं स्वीकृतं कर्मराशिभिः ।
तैर्मुक्ता स्थितिरत्यन्ताऽऽदृता केवलसंविदा ॥ ४

कालुष्यं च तया मुक्तं सन् मषीतिलकैः श्रितम् ।
विस्तीर्णता च तैस्त्यक्ता धृता पादाब्जरेखया ॥ ५

तया सरलता मुक्ता नासावंशेन चाऽऽश्रिता ।
निम्नता चोज्झिता तेना-ऽङ्गीकृता रोमराजिभिः ॥ ६

मुक्ता निःस्नेहता ताभि-र्मनोवृत्त्या समाश्रिता ।
त्यक्तमर्थप्रकाशित्वं तया चाऽऽदृतमात्मना ॥ (ष.कु.) ७

गुणालिवत्ते जिन ! कीर्तिरुज्ज्वला-
त्वत्कीर्त्तिवन्मूर्त्तिरसौ मनोहरा ।
त्वन्मूर्त्तिवत् संस्तुतिरस्तदुष्कृता
हिता ममाऽस्तु स्तुतिवत्तवाऽऽद्दतिः ॥ ८

## ॥ अथ श्रीजिनसौभाग्यातिशयफलदर्शनवर्णनः स्तवस्तृतीयः ॥

प्रणतोत्तमजन्तुकामिता-प्रमितार्थार्पणकल्पपादपम् ।
जगतीजनलोचनोत्सवं भक्त्या त्वां स्तुतिकर्मतां नये ॥ १

दर्शं दर्शं स्वनेत्रे त्वां स्तावं स्तावं निजां गिरम् ।
ध्यायं ध्यायं स्वचेतोऽपि पुनीते धन्य एव हि ॥ २

सर्वेष्वप्यन्यदेवेषु देवः सौन्दर्यसम्पदा ।
विशेषतो विभासि त्वं सुधाभीशुरिवोडुषु ॥ ३

विमुच्येतरसंसर्गं जनानां युगपद् दृशः ।
भजन्ति त्वाञ्जसा भृङ्ग्यः केतकीकुसुमं यथा ॥ ४

अहो रूपमितीक्षित्वाऽऽकृतौ त्वामतिविस्मयात् ।
त्वल्लग्ने नयने कर्ष्टु-मिव स्वं धूनयेच्छिरः ॥ ५

पङ्कजे पङ्कजावासा-नुवेलं खेलति स्वयम् ।
इतीव मानसे धत्ते धन्यास्ते पादपङ्कजम् ॥ ६

ललाटं घट्टयत्यङ्गी भूमौ त्वामानतो मुदा ।
निजभालगतां क्षेप्तु-मिवालाभलिपिं मुहुः ॥ ७

भवार्त्तं मां सुधाकल्पैस्त्वं गुणैर्निरवीवपः ।
तपार्कातपसन्तप्त-मिन्दुर्मृदुकरैरिव ॥ ८

इति संस्तवनैरावण-वारणपृष्ठाधिरोहणेन्द्र ! त्वम् ।
प्रवितर मम जिनकीर्त्तित-नित्यसुखानन्दपदलाभम् ॥ ९

**॥ अथ श्रीजिनवर-शरीराङ्गातिशयवर्णनः स्तवश्चतुर्थः ॥**

कृतिनां सुकृतोदयेन ते रूपं लोचनगोचरं भवेत् ।
भवसम्भवदंहसां तमःप्रकराणां रविवन्निवर्त्तकम् ॥ १

तव भालस्थलीभास्व-त्सौभाग्यभरहारिणी ।
भाति भव्याक्षिवाहानां खेलितुं नु खलूरिका ॥ २

आस्यं ते राति राकेन्दो-र्दास्यं सौन्दर्यसम्पदा ।
निश्रीयते च निर्माल्य-मिव नीलोत्पलं दृशोः ॥ ३

सुधानन्तरधारास्ते वर्षतीदं दृशोर्युगम् ।
सन्मनोवसुधावेल्लि धर्मवल्लीमिवोक्षितुम् ॥ ४

क्रीडायै ज्ञानसिंहस्य शिला वक्षःस्थली तव ।
कलशौ वर्तुलौ स्कन्धौ कण्ठः कम्बुविडम्बकः ॥ ५

भुजौ वीर्यहरिस्तम्भौ भ्रुवौ कामगजाङ्कुशौ ।
कपोलौ विमलादर्श-सन्निभौ तेऽखिलश्रियाम् ॥ ६

सौभाग्यामृतसम्भारः स्फुरत्येष जिने त्वयि ।
स्नेहेनेवाम्बुधिर्लक्ष्मीं सम्भाषयितुमागतः ॥ ७

सर्वाङ्गगुणनिर्माण-द्विष्टोऽयमिति वेधसा ।
अयशः स्वमपाकर्त्तुं जनितस्त्वमदूषितः ॥ ८

इति तव स्तवनातुलकुञ्जरं समधिरूढमुदूढ जयश्रियम् ।
वितनु मामधिपं शिवपत्तने वृजिनकीर्जिनकीर्त्तितवैभवे ॥ ९

## अथ श्रीजिनवरकीर्तिवर्णनो नाम स्तवः पञ्चमः॥

नरनाकिमुखाङ्गणे रसज्ञा सुनटी नाट्यविनिर्मितौ गुरुस्ते ।
विशदैकयशोभर ! प्रमोदं भुवने कस्य ददाति नैव नेतः ! ॥१

नेतस्त्वत्कीर्तिमाकर्ण्य कर्णपीयूषवर्णिकाम् ।
संसारेऽप्यवतारं स्वं सकर्णा बहु मन्वते ॥ २

तव स्फूर्त्तिमती कीर्त्ति-र्नृत्यन्ती गीतिवात्यया ।
वैजयन्तीतुलां धत्ते जगत्प्रासादमूर्धनि ॥ ३

यशःकीर्तिभरौ श्रान्तौ त्रैलोक्यभ्रमणेन किम् ।
हिमोर्वीधरकैलास-च्छलात्ते संस्थितौ भुवि ॥ ४

कीर्तिराशिस्तवाऽऽविश्वं परै रुद्धोऽपि सर्पति ।
उत्तरङ्गापगापूरः केन रोद्धुं हि पार्यते ? ॥ ५

त्वद्भक्ताभक्तयोः कीर्त्त्य-पकीर्त्ती विस्फुरत्तरे ।
स्यातां जगत्त्रये गङ्गा-यमुने इव सङ्गते ॥ ६

कतकेन यथाऽर्णांसि वासांसि पयसा यथा ।
तथाऽऽत्मानो विशुद्ध्यन्ति कीर्त्तियोगेन ते प्रभो ! ॥ ७

त्वत्कीर्त्तिकीर्त्तिनीः कर्णा-मृतनिःस्यन्दवर्षिणीः ।
स्तुतीः सुकृतिनां श्रुत्वा त्रैलोक्येऽप्युन्मुखो न कः ? ॥ ८

तव भुवि जिन ! कीर्त्तिस्तोम सोमप्रकाशे,
कुपथसुपथदर्शिन्यङ्गभाजां समन्तात् ।
विधुमणिरिव तेजोराजिता मे त्वदीयो-
त्तमनुतिरमृतश्रीप्राप्तये काममस्तु ॥ ९

## ॥ अथ श्रीजिनभक्तिफलव्यक्तिवर्णनो नाम स्तवः षष्ठः ॥

सुप्रसन्नवदनस्य ते सदा संस्तवं विरचयन्ति ये मुदा ।
तेषु कार्मणवशीकृता इवानेकशः स्थितिमधुः श्रियो ध्रुवाः ॥१

सुधीर्मिथ्यात्वमुत्सृज्य जिघांसुमिव दूरतः ।
सखायमिव सद्यस्त्वां स्वीकरोति सुखाकरम् ॥ २

कुर्वाणेन प्रणामं ते चन्दनेनेव रेणुना ।
भालं तिलकितं येन वृणुते स शिवश्रियम् ॥ ३

दर्शनेन तव स्वामिन् ! कतकेनेव कश्मलम् ।
विमुच्य शुद्ध्यति प्राणी जडोऽपि क्षणतः क्षितौ ॥ ४

प्रमादोद्भेदमेदस्वी मनस्वी त्वदुपासकः ।
वर्जयेत् सर्वजन्तूना-ममन्तूनां विघातनम् ॥ ५

तव सम्पर्कतः स्वामिन् ! धर्मवर्मितसन्मतीः ।
भजन्ते भविनो भूयः पूर्वांहोह्रासलालसाः ॥ ६

शस्या कस्य न ते भक्ति-र्ययाऽऽकृष्टाः क्षणादिह ।
आयान्त्यपि सुपर्वाणः स्ववर्णा इव वल्गया ॥ ७

हृद्यासाद्य तवाऽऽलोकं साक्षिणं मोक्षसम्पदः ।
सद्य एवाऽऽनवद्यात्मा बुधो निर्धौतधीर्न कः ? ॥ ८

इति नुतिपथपान्थस्त्वं कृतः कल्पवृक्षो-
ऽभिमतफलविधानाद् मेऽप्रमेयप्रसादः ।
विगतवृजिन ! कीर्त्ति-द्योतिताशेषलोकः,
प्रथय कथमपीश ! प्रेयसीमाशु मुक्तिम् ॥ ९

## ॥ अथ श्रीजिनभाग्योदयसुलभदर्शनवर्णनो नामस्तवः सप्तमः ॥

सदनं सदनेकसम्पदां गुरुतावल्लिविलासमण्डपः ।
विजहत्त्वमनङ्गजं सुखं ध्रुवमाप्तश्च शिवेऽप्यनङ्गजम् ॥ १

दुरासादोऽपि मच्चित्ते सपापे यत्त्वमागमः ।
मरुनीवृति तन्मन्ये मरुत्तरुरवातरत् ॥ २

पार्श्वं निरयसूनाया नीतोऽपि स्फीतपाप्मभिः ।
अत्राणः पशुवत्त्राणस्त्वयाद्याऽहं कृपालुना ॥ ३

सकृद्वात्सल्यमुन्मील्य ममात्मानं पवित्रय ।
नीचस्यापि न किं वेश्म करैरिन्दुः प्रकाशयेत् ? ॥ ४

सद्यः शुभाशुभाध्वानं भाग्येनाऽद्य ममाशये ।
साक्षात्कर्त्तुमुदेषि त्वं कर्मसाक्षीव पुष्करे ॥ ५

भाग्यभूमिरियं मेऽद्य यया त्वं मेऽक्षिगोचरः ।
यत्तु त्वामधिजिह्वोऽस्ति तत्सुवर्णस्य सौरभम् ॥ ६

विश्वास्कन्दककन्दर्प-दर्प सर्पाहितुण्डिकः ।
विडम्बी विपदां त्वं मां कुरु श्रीणां कुटुम्बिनम् ॥ ७

विवेकदीक्षितस्याऽद्य भवद्भक्त्या ममाऽभवन् ।
भिदेलिमानि कर्माणि घनाभ्राणीव वात्यया ॥ ८

इति दूरितनतदुष्कृत ! जिन ! कीर्तिद्योतिताऽखिलदिगन्त ।
स्तुतिपथगतस्त्वमङ्गी कारय मां शिवरमां परमाम् ॥ ९

## ॥ अथ श्रीजिनदुर्लभप्राप्तिवर्णनो नाम स्तवोऽष्टमः ॥

अगण्यपुण्यैर्जनपावनाद्भुत-
प्रभूतसद्भूतगुणाश्रितं द्रुतम् ।
ब्रह्मैकरूपं शरणं शरीरिणां,
स्वास्याम्बुजे त्वामवतारयाम्यहम् ॥ १

अद्य वृष्टिरनभ्राऽभू-दहो ! चिन्तामणिः करे ।
अद्य कल्पद्रुमो जज्ञे दरिद्रस्य गृहे मम ॥ २

अद्योदितः कलाशाली कुहूनिशि निशाकरः ।
विस्मेरमुद्गतं पद्मं कटरे शिखरे गिरेः ॥ ३

उषरे धान्यनिष्पत्ति-र्बपुरे समजायत ।
यन्मयाऽद्य महाभाग्यै-र्दृष्टस्त्वं दृष्टितुष्टिदः ॥ ४

नानायोनिष्वहं भ्रामं भ्रामं स्थानेष्वनेकशः ।
भवन्तं क्वापि न प्राप-मपुण्य इव शेवधिम् ॥ ५

नाद्यावलम्बते सीमां भाग्यैकमहिमा मम ।
सद्धर्ममिव मूर्त्तं त्वां प्राप्याऽहं पुलकाङ्कितः ॥ ६

न भवेद् भवतो यत्त-न्मानसे वस्तुमर्हता ।
यस्य तस्य करे युक्ता स्थितिश्चिन्तामणेः किमु ? ॥ ७

पुण्यवल्लिवसन्तस्य तवाभिनवसङ्गमे ।
भृशं वनप्रियस्येव पिप्रिये मेऽद्य मानसम् ॥ ८

जिनकीर्त्तिसुधामयादिति, स्तवनोत्तुङ्गतरङ्गसेकतः ।
फलितः सुरपादपो भवान्, सततं स्तात् सदभीष्टसिद्धिदः ॥९

**॥ अथ अन्ययोगव्यवच्छेद-श्रीजिनातिशयः स्तवो नवमः ॥**

प्रसन्नमूर्त्तिः सफलैकवृत्ति-र्मूर्त्तं तपस्तेज इति प्रतीतः ।
सन्तिष्ठसे बोधविधानदक्षः, सदाशये भानुरिव प्रभाते ॥ १

प्रसूनमालावलिमण्डितं ते, बिम्बं विलोक्याऽतुलकान्ति शङ्के ।
दिवाकरस्यैव दिवोऽवतीर्णं, सतारकं मण्डलमंशुवर्षि ॥ २

मिथ्यात्वशल्यं हृदयप्रसक्तं,
पुण्योक्त्ययस्कान्तवशेन कृष्ट्वा ।
शमामृताऽऽकण्ठनिपायनेन,
सुखावहस्त्वं नहि कस्य जातः ? ॥ ३

भवन्तमासाद्य परोपदिष्ट-देवोपसेवामिह यो विधत्ते ।
सुरद्रुमारोप्य विषौघयूषै-र्निषिञ्चतेऽसौ विमतिः समन्तात् ॥४

शुद्धं सुवर्णं मणिनेव दीप्रं, रूपं यथा शीलगुणेन रम्यम् ।
शमोदयेनेव तपःप्रशस्यं, तथा सुशोभं सुकृतं त्वयेदम् ॥ ५

धर्मोऽप्यभीष्टार्थकरस्तदासा-वेकान्ततस्तत्र यदि प्रभुस्त्वम् ।
कृषिर्भवेत् सा सफला हि यत्र, समीरराशिः प्रथते प्रधानः ॥६

अतिरङ्गदभङ्गभावनोद्भव-वैराग्यतरङ्गिताशयः ।
यदि ते नतिमाप्नुते कृती, तदसौ निर्वृतिमेति विष्टपे ॥ ७

इति तव नुतिविद्यां योऽनवद्यामधीते,
सुमतिरपगतान्याऽशेषवेद्यानुभूतिः ।
स जयति जिनकीर्त्ति-स्फीतमोहारिजेता,
शिवनगरनिवासी सौख्यलक्ष्मीविलासी ॥ ८

## ॥ अथ श्रीजिनाष्टमहाप्रातिहार्यस्तवो दशमः ॥

तव भक्तिभरात् सतां प्रभो ! सुकृतं सन्ततमुत्तरङ्गताम् ।
अयतीह सुधाकरोदयादिव दुग्धाम्बुधितोयसञ्चयः ॥ १

सङ्गतस्तव चैत्यद्रुर्भाति मण्डलान्वितः ।
दिव्यध्वनिजितोऽब्दः किं विद्युदुद्द्योतमण्डितः ? ॥ २

जानुदघ्नं दधासि त्वं सत्पुष्पप्रकरं पुनः ।
स्वगुणौघमिव प्रादु-र्भावयन् भव्यसंसदि ॥ ३

संहर्त्तुं देहि सन्देहान् गजानिव तवाऽऽननात् ।
ध्वनिः प्रादुरभूद्दिव्यः कन्दरादिव केसरी ॥ ४

प्रभापूरद्वयेनेव कुण्डलद्वितयोद्धुवा ।
चामरावलियुग्मेन भासि त्वं वीजितोऽनिशम् ॥ ५

तव सिंहासनेषूच्चै-र्भान्ति रत्नांशुराशयः ।
लसन्तो धर्मकल्पद्रु-मञ्जरीस्तबका इव ॥ ६

भानुमन्तमिवाऽदभ्रां प्रभां बिभ्राणमद्भुताम् ।
दृष्ट्वा त्वां कस्य नो दृष्टिः पद्मिनीव प्रबुध्यते ? ॥ ७

व्योमदुन्दुभिनादौघै-र्नादयन्तो दिवौकसः ।
भीषयन्त इवाभान्ति कलिद्विष्टं पुरस्तव ॥ ८

छत्राणि ते पवित्राणि त्रीणि शीर्षोपरि व्यभुः ।
बहिः पिण्डीकृतानीव सुखान्यात्मन्यमात्त्वतः ॥ ९

न विस्मापयसि स्वस्य परमृद्ध्या नरामरान् ।
किन्तु सौभाग्यमात्रेण सुत्रामादिप्रभूनपि ॥ १०

इति जिन ! कीर्तिधारिणः, स्तवनं विश्वसुधैकपारणम् ।
अजरामरताप्रदं सदा भवताद् भक्तिमतामनारतम् ॥ ११

## ॥ अथ श्रीजिनातिशयवर्णनः स्तव एकादशः ॥

कल्पवल्लिरिव सेवकवर्गै-र्भक्तिसौधरससञ्चयसिक्ता ।
पम्फलीति तव मूर्त्तिरनन्ताऽमन्दसम्मदफलैरनुवेलम् ॥ १

सेव्यतामेष तीर्थेश इति विश्वत्रयाङ्गिनः ? ।
ख्यापयद्भिरिवाऽऽतोद्यै-र्भासि शब्दायिताम्बरः ॥ २

निरोद्धुं दुर्गतिं नृणां कपिशीर्षमिषात् करैः ।
प्राकारत्रितयं रेजे-ऽभितस्त्वामकुतोभयम् ॥ ३

यत्रेश ! त्वं तमस्तोम-वासरः समवासरः ।
तत्राङ्गिभ्यो दुराचारः स मोहारिरपासरत् ॥ ४

हेमसिंहासने देव ! तवैवासनमेधते ।
नहि किं जात्यरत्नस्य निवेशः स्वर्णभूषणे ? ॥ ५

अवक्रं धर्मचक्रं ते भासते भास्वरं पुरः ।
किमंशोर्वा सुधांशोर्वा प्रभामण्डितमण्डलम् ॥ ६

किं सद्दुःखेन्धनज्वालि-ज्वलनोद्दीपने चलः ।
योजनानां सहस्रं ते पुरो भात्युच्छ्रितो ध्वजः ॥ ७

योजनानां शतं पञ्च-विंशत्यधिकमङ्गिनः ।
पुरस्ते नीतिमन्तोऽपि कौतुकं भान्त्यनीतयः ॥ ८

शशितर्जिनकीर्त्तिमण्डलं न समस्तीह तवाधिकोज्ज्वलम् ।
इति ते परमाधिपत्यतश्चरणौ त्राणवणौ चणौ श्रये मुदा ॥ ९

## ॥ अथ श्रीजिनविधिपूजावर्णनः स्तवो द्वादशः ॥

दृढभक्तिभरेण भारितोऽ-
ञ्जलि-मौलिः प्रणतः प्रवर्त्तते ।
स्वहिताय तवार्चनाविधौ,
सुविवेको भुवि को न कोविदः ? ॥ १

तव पूजाशयाऽधीश ! धन्यः स्नाति न किन्त्वसौ ।
स्वस्यानाचारसम्भूतं क्षालयत्यभितो मलम् ॥ २

नैति त्वामर्चितुं लोकः पूजोपस्करधारकः ।
किन्तु शैवपुरं गन्तुं प्रस्थानमिव साधयेत् ॥ ३

क्षीरांशुकानि तेऽर्चार्थं जनो धत्ते न किं पुनः ।
भजत्यसौ महांसीव पुण्येन्दोरन्तरुद्यतः ॥ ४

भवत्पूजाकृते नेत-र्घनसारमुदारधीः ।
न हर्षोत्कर्षतो घर्षेत् किन्त्वसौ निजकल्मषम् ॥ ५

तवाङ्गसङ्गिनिर्माल्यं जनः स्नपनकाम्यया ।
दूरमुत्सारयेन्नैव किन्तु दौर्भाग्यमात्मगम् ॥ ६

मलं नापनयत्यङ्गी मूर्त्तौ ते शुद्धवारिणा ।
किन्त्वपाकुरुते पाप-पङ्कमेव निजात्मनि ॥ ७

मूर्त्तिं ते नव्यवस्त्रेण रुक्षयेन्न विचक्षणः ।
किन्तु स्वं कुरुतेऽलेपं जडभावापहारतः ॥ ८

केसरोल्लासिवर्णेन श्रीखण्डेन न मण्डयेत् ।
तवाङ्गं रङ्गभागङ्गी किन्तु स्वं जगदर्चया ॥ ९

नैतां निरुपमां कण्ठे तवाऽऽरोपयते कृती ।
मालां सुमनसां किन्तु गुणानामयमात्मनः ॥ १०

न त्वाऽलङ्कारवारेणा-मुनालङ्कुरुते नरः ।
किन्तु मूर्त्तविवेकेन सातिरेकेण स स्वकम् ॥ ११

प्रदीपं ते पुरो दीप्रं न दक्षो दीपयेदिमम् ।
किन्त्वयं द्रागुपद्रोतुं तमःस्तोमं स्वमान्तरम् ॥ १२

धूपाद् वास्तवकस्तूरी-वस्तूरीकृतगन्धतः ।
न तेऽङ्गं वासयत्यङ्गी किन्तु विश्वं स्वकीर्त्तितः ॥ १३

अखण्डाक्षतनैवेद्य-फलोद्यद्ढौकनं न ते ।
विधत्ते कोविदः किन्तु स्वस्यैवानन्तयत्यदः ॥ १४

ध्वजारोपं नरो नेत-स्त्वत्पुरो न करोत्यमुम् ।
किन्तूज्ज्वलगुणस्यासौ स्वस्य विश्वोच्चकैः स्थितिम् ॥ १५

तवारात्रिकमुत्तार्य नरो नान्यत्र मुञ्चति ।
किन्त्वेष दोषसङ्घातं स्वजातमपि वर्जयेत् ॥ १६

दीव्यन् मङ्गलदीपं ते नैतमुत्तारयेन्नरः ।
किन्त्वात्मानं भवाम्भोधेः स्वप्रकाशं सुमङ्गलम् ॥ १७

आयात्यादरतस्तेऽग्रे धन्य एव न केवलम् ।
स्पर्द्धयेवैति मालिन्यं भवारेः पुनरानने ॥ १८

साम्मुख्यं तेऽग्रगश्चक्रे नैकाग्र्येणैव किन्त्वयम् ।
आगन्तूनामगण्यानां पुण्यानामिव पुण्यधीः ॥ १९

अङ्गा-ग्र-भावपूजास्ते कुर्याद्विज्ञो न किन्त्वसौ ।
स्वयं त्रिभुवनश्रीणां भोगे सत्यङ्कृतित्रयम् ॥ २०

कृती प्रतीयते सैव यस्ते भाति स्तवं सृजन् ।
त्वद्गुणोक्तिमिषाऽऽनन्दं हृद्यमान्तं वमन्निव ॥ २१

तव स्तुत्या च नत्या च दृष्ट्या च भविनां भवेत् ।
सुधयेव सुनिर्वाणः संसारैकदवानलः ॥ २२

चकोरा इव राकेन्दुं मयूरा इव वारिदम् ।
वीक्ष्य त्वां नर्त्तने मर्त्याः के के नोत्सुकतां गताः ? ॥ २३

सन्तोष इव सौख्यानां पर्जन्य इव वीरुधाम् ।
इष्टाप्तिरिव हर्षाणां हेतुस्त्वं शिवसम्पदाम् ॥ २४

इति नुतिमणिमालां यः स्वकण्ठे विशालां
रचयति भवदीयां भाग्यसौभाग्यशाली ।
स भजति जिन ! कीर्तिस्फूर्त्तिमाविश्वविश्वं,
शिवयुवतिपरीतः स्फीतसौख्योपयुक्तः ॥ २५

**॥ अथ श्रीजिनभावपूजोपक्रमवर्णनो**
**नाम स्तवस्त्रयोदशः ॥**

देव ! सेवकनरामरनाथैर्निर्मलामृतरसैः स्नपितो यैः ।
त्वं गताऽखिलमलोऽपि बभूवुश्चित्रमत्र नु त एव पवित्राः ॥१

न क्रिया न दयालुत्वं न प्रियालापनं प्रभो ! ।
जनस्य जायतेऽनन्त-कालेनाऽपि विना त्वया ॥ २

त्वं माता त्वं पिता त्वं च बन्धुर्बन्धुरताञ्चितः ।
त्वमसाधारणाधार-स्त्वत्तो हि न परो हितः ॥ ३

जैनचैत्यानि कार्यन्ते स्थाप्यन्ते जैनमूर्त्तयः ।
जिनयात्रा विधीयन्ते जैनं वा लेख्यते श्रुतम् ॥ ४

जैनोऽनघोऽर्च्यते सङ्घो जैनं वा द्योत्यते मतम् ।
धीरपीति भवेन्नृणां त्वन्मतश्रुत्यनुग्रहात् ॥ (यु.) ५

भवतः पूजया स्तुत्या पुरो नृत्येन च प्रभो ! ।
नैवोपरमते कोऽपि नहि तृप्तिः सतां हि तैः ॥ ६

सहस्रं यदि जिह्वानां दत्ते यस्योरगेश्वरः ।
सहस्राक्षः सहस्रं च दद्याद् यद्यादृतो दृशाम् ॥ ७

यद्यमान्द्यममेयं च भवेदायुरुदारधि ।
तथापि त्वां गुणानन्त्ये स्तोतुं द्रष्टुं न सोऽप्यलम् ॥ (यु.) ८

दाहं दाहं स कस्तूरी-पूरं धूपभरं वरम् ।
पुरस्ते क्रियते केन चिदेव ध्यानवन्मनः ॥ ९

निध्याय भवतो नाम ललाम सकलावनेः ।
पुण्यगात्रा न के पात्रं भवेयुः शिवसम्पदाम् ? ॥ १०

इति संस्तुतिपुष्पमालया विधिना त्वामिह पूजयन् न कः ।
अतुलां जिनकीर्त्तिता-मितानन्दामर्थयते शिवश्रियम् ॥ ११

## ॥ अथ विधिना जिनार्चनस्तवश्चतुर्दशः ॥

भक्तिभारविनतैर्नतामरैः
प्रोल्लसत्परिमलोत्तमैः सुमैः ।
पूजितोऽसि सुभगोऽपि यैः सना
पूजितास्त्रिजगतापि त एव ॥ १

स्थापितं तव नाम्नापि बिम्बं शर्मावहं सताम् ।
अभ्रच्छन्नोऽपि तिग्मांशुः किं न प्रीणाति वारिजम् ? ॥ २

सुदिनं तत्सतां यत्रा-र्चनं ते यक्षकर्दमैः ।
बाहुल्येन बहिर्मोद-रसैः प्रसृमरैरिव ॥ ३

विस्तारितामितामोद-सर्वगस्फातिजातिभिः ।
पवित्रैः शतपत्रैश्च विपङ्कैश्चम्पकैः परम् ॥ ४

पूजितः पूजकारातीन् विजेतुमिव वर्मितः ।
विभासि दासिताशेष-देवः सेवकवत्सलः ॥ (यु.) ५

नित्यं किं कर्त्तुमुद्योतं तवाग्रे तेजसा जितः ।
दीप्रदीपच्छलादंशु-जालं हेलिरढौकत ॥ ६

ये धूपं तालवृन्तेन वीजयन्ति पुरस्तव ।
स्वकमुत्सारयन्तीव तेऽपि दुष्कर्मसञ्चयम् ? ॥ ७

अतुलैः सत्फलैर्भव्यैः पुरस्ते ढौकने कृते ।
अलाभि सुफलीभावो-ऽनुवेलं भुवनेऽखिले ॥ ८

त एव भुवने श्लाघ्या यैर्भवान् महितः स्तवैः ।
हृदालवाले फुल्लाया भक्तिवल्ल्याः सुमैरिव ॥ ९

कलानां निलयः सौम्यः सुवृत्तः सुमनःप्रियः ।
सदा कुवलयोल्लासी सोम एवाऽसि वास्तवः ॥ १०

इति लम्भितसर्वकामितात् स्तवनात्ते सुररत्नसन्निभात् ।
जिनकीर्त्तितमुक्तिकामिनी-कमनीयोऽभवमेव नन्वथ ॥ ११

**॥ अथ श्रीजिनजन्माधीन-सौधप्रौढिवर्णनः स्तवः पञ्चदशः ॥**

ईश ! तैस्तव जनुःप्रभावतो देवदानवगणैश्चलासनैः ।
आगतैः प्रतिकलं विभूषितं सौधमप्यधिकमेधते श्रिया ॥ १

भाति ते वसुधोत्तंसं तव सौधं जनुःक्षणे ।
स्वर्विमानमिवोत्तीर्णं पुण्यराशिरिवोज्ज्वलम् (ः) ॥ २

स्फूर्जत्तूर्यत्रयध्वान–प्रबोधितजगज्जनम् ।
पुरो वाराङ्गनावार–मण्डिताखण्डताण्डवम् ॥ ३

कर्पूरादिवरामोद–सुरभीकृतदिग्मुखम् ।
उच्छ्रितध्वजदम्भेन प्रमोदपुलकाङ्कितम् ॥ (त्रिभि.वि.) ४

तव जन्मगृहे देवै रत्नराशिः कृतो बभौ ।
जितो गाम्भीर्यतोऽब्धिः किं शोषितस्तेजसाऽऽगतः ? ॥ ५

वज्राकरो मरुन्मुक्ता–प्रत्नरत्नोत्करच्छलात् ।
किमायातो जनुर्गेहे सेवार्थं ते गुणैर्जितः ? ॥ ६

वितीर्णः स्वर्णराशिस्ते जन्मागारे सुरैर्बभौ ।
उन्नत्येव जितः प्राप्तः सेवार्थं काञ्चनाचलः ॥ ७

सतारामण्डलं व्योम सरत्नसदनच्छलात् ।
पित्रोर्वर्द्धापनं कर्त्तुं किं जन्मन्यागतं तव ? ॥ ८

तव ऋद्धं जनुःसौधं विस्मयादिव वीक्षितुम् ? ।
निशि तारामिषोत्तान–नयना द्यौस्तदाप्यभूत् ॥ ९

दृष्ट्वा जन्मनि ते सौध–श्रियं सख्य इवाखिलाः ।
वदनानि दिशः कामं विशदानि वितेनिरे ॥ १०

स्वाधिकं तव सौधस्य वैभवं वर्णयन्निव ।
स्वर्गो जनुर्महागच्छ–च्चतुर्द्धा त्रिदशैरभूत् ॥ ११

यत्र ते जनुषा माता–पित्रोर्वर्द्धिष्णुसम्मदः ।
दुग्धाब्धिं गोष्पदीचक्रे तन्मुदे कस्य वेश्म न ? ॥ १२

द्योतितं लसदुद्योतै-स्सौधं ते जन्मनः क्षणे ।
केवलं नाऽभवत् किन्तु विश्वं विश्वमपि प्रभो ! ॥ १३

सिन्धुरानुद्धरान् सङ्ख्या-तिगान् तुङ्गतुरङ्गमान् ।
प्रगुणानणुमाणिक्य-सौवर्णाऽऽभरणानि च ॥ १४

हर्षवृद्ध्यनुकूलानि दुकूलानि जनालिषु ।
कलानि सुकुमालानि चीवराणि वराणि च ॥ १५

पित्रा यत्राऽतिमोदेन द्युम्नानि तव जन्मनि ।
देवद्रुणेव दत्तानि स्तोतुं तद्वेश्म नेश्महे ॥ १६

इति भक्तिसुधैकसेकतोऽङ्कुरिता संस्तुतिकल्पवल्लरी ।
अतिरूढवती सुरद्रुमं त्वामिष्टार्थफलप्रदाऽस्तु मे ॥ १७

**॥ अथ श्रीजिनानादरादरजातापत्सम्पद्दर्शनस्तवः षोडशः॥**

तरणीकरणिर्भवाम्बुधौ कलधौताङ्गरुचिः सुचेतसा ।
महितः स्वहिताप्तये भवान् गतपङ्केन न केन केवलिन् ? ॥१

मोहेन मलिनं योऽपि त्वदन्याचरणं श्रितः ।
स गुणैस्त्यज्यते दूरं द्विजैरिव जनङ्गमः ॥ २

पुरन्दरमिवाऽमर्त्त्या मर्त्त्या इव धराधिपम् ।
ये स्थूरानन्दपूरास्त्वा-मीशते तेऽर्चिताः समैः ॥ ३

तवैकान्तहितामाज्ञां दूरमुज्झाञ्चकार यः ।
तस्य सौदामिनीव श्रीः सद्य एव विलीयते ॥ ४

प्रीणयन्तो जनं वृद्धिं नयन्तः पुण्यकाननम् ।
समुद्रं त्वां श्रिताः प्रौढा घनाः प्रावृषिजा इव ॥ ५

त्वयि दानान्तरायं यः कुरुते स गृहे गृहे ।
परत्र कणमात्राय देहि देहीति भिक्षते ॥ ६

त्वयि दानोपदेष्टारो ये भवन्ति परं प्रति ।
ते स्युस्त्वमिव विश्वेऽपि दानिनो दायका अपि ॥ ७

त्वयि भावेन भव्यस्य दत्तमल्पमपि श्रिये ।
गवे तृणमपि प्रत्तं स्निग्धदुग्धाय जायते ॥ ८

दानिनां स्फायते सम्प-द्भवद्भक्त्यनुषङ्गतः ।
वर्द्धते न विधोः सङ्गे किं वेला वीचिमालिनः ? ॥ ९

जनः पङ्कजबन्धोऽपि त्वन्नमस्सम्मदोदयात् ।
बन्धनान्मुच्यते सूर्यो-दयादिन्दिवरो यथाः ॥ १०

इति तेऽद्भुतसम्पदं सदा विदधानं स्तवनामरद्रुमम् ।
भजते जिनकीर्त्तितोल्लसद्विभवं यः स भवेत् सुखास्पदम् ॥११

**॥ अथ श्रीजिनैकविघ्नापहारिता-वर्णनस्तवः सप्तदशः ॥**

प्रणयात् प्रणतो बिडौजसा निबिडौजा न शमी त्वमीडितः ।
भवघातकरः स्वपातक-प्रलयात् केन दयालुतालयः ॥ १

त्वदीयाऽऽज्ञा-विनिर्मुक्ताः युक्ताः केऽप्युग्रकर्मणा ।
सद्धर्मं न प्रपद्यन्ते पीतमद्या इव स्थितिम् ॥ २

भवन्तं केचिदासाद्या-प्यतिमोहविमोहिताः ।
निषेवन्ते न भावेन मुमूर्षव इवौषधम् ॥ ३

आलस्याद्यैर्मुहुः केऽपि दर्शनं ते चिकीर्षवः ।
निवार्यन्ते यथा द्वाःस्थै-र्धराधीशं दिदृक्षवः ॥ ४

पराऽऽसक्ता यतन्ते नो केऽपि ते शासनेऽनघे ।
सम्यक् सौवर्णवाणिज्ये यथा लावण्यतैलिकाः ॥ ५

केचिन्निचितकर्माणः सधर्माणं मरुन्मणेः ।
न त्वां श्रद्दधते क्वापि खलाः परगुणं यथा ॥ ६

केऽपि श्रद्दधतोऽपि त्वां विषयासक्तचेतसः ।
नासेवन्तेऽपि ही भूता-विष्टा इव दिवानिशम् ॥ ७

एवं विनैकमप्यङ्गं त्वामाराद्धुं कदापि न ।
पारयन्ति नराः प्रायः सापाया हि शुभाः क्रियाः ॥ ८

निरपायः स्वयं स्वामि-न्नन्यापायापहोऽप्यसि ।
प्रकाशात्मांशुमाली किं विश्वे नान्यतमोपहः ? ॥ ९

इत्यन्तरायसन्दोह-छेदनं मे तथा कुरु ।
श्रितवत्सल ! निर्विघ्नं यथा त्वां सम्यगाश्रये ॥ १०

इति स्तुतस्त्वं जिन ! कीर्त्तिताद्भुतप्रभूतसद्भूतगुणैर्विभूषितः ।
हितप्रवीणः शरणं शरीरिणां प्रसद्य सद्यः कुरु मे परं पदम्॥ ११

**॥ अथ श्रीजिनैकान्तभक्तिदर्शनपरस्तवोऽष्टादशः ॥**

गुणरत्ननिधे ! बुधेडितः, सविधे मे प्रविधेहि सद्विधीन् ।
विपदं जहि सम्पदं कुरु, प्रथय त्वं पृथुसम्मदं शिवे ॥ १

तस्य किं जायते वैरि-पराभूतिविभावरी ?।
सदा यत्र भवद्भक्ति-भावभानुरुदित्वरः ? ॥ २

उदीयुषा त्वया याति बोधं कुवलयं यतः ।
जिनाधिराज ! राजेव राजसे तत्कलानिधिः ॥ ३

मुख्याऽजनि कृपालक्ष्मी-र्नानाधर्मरमासु ते ।
तारासु किमु नो सारा रोहिणी रोहिणीपतेः ? ॥ ४

तवैधयन्ति सौभाग्य-श्रियं सौम्यादयो गुणाः ।
प्रभाभिर्मणयो दीप्राः सौवर्णालङ्कृतिं यथा ॥ ५

मूर्त्तावानन्दकारित्वं निर्दोषत्वमुदारताम् ।
तवावेक्ष्य प्रभुत्वं कः प्रत्येति प्राकृतोऽपि न ? ॥ ६

येषां त्वयि वामवर्त्तित्व-मयोग्यास्ते खला इव ।
नैव प्रतिक्रियाग्राह्याः प्रत्युताऽनर्थहेतवः ॥ ७

तेऽपि स्युर्घनकर्माणो येषां द्वेषं वहेन्मतिः ।
त्वयि सर्वगुणावासे कौशिकीव दिवाकरे ॥ ८

त एव लघुकर्माणो येषां ते दर्शनादपि ।
दिनापरार्द्धच्छायेव प्रीतिः स्फीततमा भवेत् ॥ ९

महानन्दसुखश्रीणा-मिवाकारणदूतिकाः ।
कृती कस्ते स्तुतीर्भक्त्या विधत्ते न हितेच्छया ? ॥ १०

गरिमयुजि न कीर्त्ति-व्यापिताशेषविश्वे,
त्वयि विनिहितदृष्टिर्येन दिष्ट्याष्ट्वा व्यरामि ।
प्रगुणगुणगणो वाऽस्तावि नव्यस्तवेन
प्रभवति स शिवश्री-भोगलीलाविलासी ॥ ११

## ॥ अथ विघ्नहरशुभकर-श्रीजिनमन्त्रगर्भस्तव एकोनविंशः ॥

यस्य प्रचण्डः स्फुटजाड्यखण्डन-स्तवस्तवश्चण्डगुमण्डलायते ।
भवोद्भवद्भीतिनिशाविडम्बना-
विडम्बितो नैव भवेत् स पण्डितः ॥ १

धरणेन्द्रो धरित्रीश-श्चमरेन्द्रो महेश्वरः ।
ब्रह्मेन्द्रः खचराधीशः क्षेत्रपालो नरेश्वरः ॥ २

आदीश्वरो जटाधारी व्योमचारी निरञ्जनः ।
सहस्रांशुस्तपस्वीश-श्चन्द्रः सोमशमीश्वरः ॥ ३

योगीन्द्रोऽथ जगत्प्राणः पावकेन्द्रो विभावसुः ।
शस्येन्द्रो जीवनाधारः समुद्रः संवरेश्वरः ॥ ४

शमनो धर्मराजस्त्वं श्राद्धदेवो यमेश्वरः ।
कर्मसाक्षी जगत्साक्षी जगच्चक्षुस्तमोरिपुः ॥ ५

ज्योतीरूपो जगद्व्यापी सुपार्श्वः पार्श्वनायकः ।
ॐ झ्राँ सौँ ह्रीं नमो मन्त्रः प्रशान्तिरुपशान्तिकः ॥ ६

वीरेश्वरो महावीरो विजयोऽथापराजितः ।
विद्यादेवीश्वरः सर्व-दिक्पालेशो ग्रहेश्वरः ॥ ७

पञ्चतत्त्वात्मको नाथः सर्वज्योतिर्मयो महान् ।
वीतराग ! त्वमेवैको वीरवेलाक्षणे स्मृतः ॥ ८

जिनेन्द्रो जिनचन्द्रस्त्वं जिनभद्रो जिनेश्वरः ।
भक्तरक्षां कुरु स्वाहा क्षुद्रोपद्रवतः प्रभो ! ॥ ९

शङ्करो हरहुण्डस्त्वं सरसुंसः सुरेश्वरः ।
गौरीपद्मावतीशस्त्वं शान्तये भूतये भव ॥ १०

मन्त्राह्वानकृतध्यानः सर्वसिद्धिकरो भवान् ।
शाकिनी-डाकिनी-भूत-वेतालत्रासकारकः ॥ ११

भवान् दुष्कर्मनिर्माथी हर्म्यं निस्सीमसम्पदाम् ।
स्मृतो वज्रमयं वर्म बिभ्यतां वैरिवर्गतः ॥ १२

भवता जन्यते मुक्ति-र्घनेनेव वनस्पतिः ।
कुठारेणेव पापद्रुः छिद्यते मूलतः पुनः ॥ १३

प्राक् ते शौण्डीर्यमुद्दण्ड-दोर्दण्डोल्लासि ताण्डवम् ।
नो भैषज्यायते ते स्वामिन् ! केषां दर्पज्वरच्छिदे ? ॥ १४

अबला-बालगोपाल-भूपाद्यैः श्वापदैः सुरैः ।
अत्यन्तोपद्रुतोऽपीशः क्षमेव क्षमसे क्षमी ॥ १५

तव स्मृत्यनुभावेन जागरूकाः सुराऽसुराः ।
भक्तस्योपद्रवं घ्नन्तः शङ्कराः किङ्करा इव ॥ १६

कृतसन्मार्गलोपानां पापानां तमसामिव ।
त्रासकारि तव स्तोत्र-ममोघज्वलनास्त्रवत् ॥ १७

रात्रौ शत्रौ जले शैले स्मृत ! त्वं सततं कृती ।
सन्मन्त्र इव सर्वत्र निःशङ्कप्रसरो भवेत् ॥ १८

इति स्तुतः श्रीजिन ! कीर्त्तितस्त्वं स्वनेमिरत्नप्रदमन्त्रमाली ।
ह्रींकारविद्याक्षररूपधारी ध्यातस्त्रिसन्ध्यं शिवतातिरस्तु ॥१९

## ॥ अथ श्रीजिनगुणैक-वर्णनस्तवो विंशतितमः ॥

विमलकीर्त्तिगुणस्थित-सद्गुणप्रगुणमौक्तिकहारविराजितम् ।
तव हि यः स्तवनैकविभूषणं श्रयति स प्रियतीह शिवश्रियः ॥१

भेजुः सौभाग्य-सौरभ्य-लोलुभास्ते पदौ न के ? ।
देवाः पद्ममिवाछद्म-हृदयाः षट्पदा इव ॥ २

सौन्दर्यौदार्यगाम्भीर्य-प्रमुखा निखिलाः गुणाः ।
अभितस्त्वामराजन्त राजहंसा इवाम्बुजम् ॥ ३

याति त्वदन्यदेवेषु नैकोऽप्यादेयतां गुणः ।
किं नापेयं सतां क्षीरं वारुणीभाजनस्थितम् ? ॥ ४

प्रभो ! निरुपमागण्य-लावण्यरसवारिधेः ।
नूनं घुणाक्षर-न्यायात् तवाऽभूद्दर्शनं मम ॥ ५

निभालयन्तः सौभाग्यं तव त्रिभुवनाद्भुतम् ।
तृणायापि न मन्यन्ते सहस्राक्षं परीक्षकाः ॥ ६

शेषाद्या यत् क्षमाभारं धरन्ति ख्यातिरेव सा ।
तादृक्षः स्थूललक्षस्तु त्वमेव परमार्थतः ॥ ७

निर्घोषस्ते गुणौघस्य क्रियते यैर्जडैरपि ।
तेषां प्रज्ञालतावृद्धौ स एवाभिनवाम्बुदः ॥ ८

केऽत्र न स्युर्गुणा नृणां त्वत्त एव गुणाकरात् ।
रत्नाकरं विनाऽन्यत्र न रत्नप्रभवो यतः ॥ ९

तस्मै कां कां बलिं कुर्वे वेधसेऽहं सुमेधसे ।
येनाहं मेलितः पातु-र्जगन्ति (ति) तव मूढधीः ॥ १०

पर्जन्यवत् त्वमेवैकः परार्थैकपरोऽसि यत् ।
तन्मयोपास्यसे भक्त्या भवदुःखविमुक्तये ॥ ११

इति मम स्तवनामृतदीधिति-
र्यदि भवन्तमनन्तगुणास्पदम् ।
सपदि शम्भुमलङ्कुरुते स्म तत्
शिवपदे जिनकीर्त्तिमहं श्रितः ॥ १२

## ॥ श्रीजिनगीरतिशय-वर्णनो नाम स्तव एकविंशः ॥

अमृतैकरसस्य सारणि-र्भवतो वाणिरपूपुषत्तराम् ।
वरमुक्तिफलावहां महा-समताकल्पलतां सतां हृदि ॥ १

अवोचः पुण्यमुच्चस्थ-स्त्वमुच्चैर्देशनावनौ ।
कुपथप्रस्थितान् मार्गं नेतुं शब्दायसे स्म किम् ? ॥ २

नरेन्द्रा अपि देवेन्द्राः पर्युपास्यां विधित्सवः ।
निषेदुः सकलास्तेऽग्रे भूपतेरिव पत्तयः ॥ ३

सर्वदा संविदा ज्ञाता-ऽशेषविश्वः प्रभो ! गिरा ।
क्षालितान्तर्मलः कस्य त्वं मनो हि धिनोषि नो ? ॥ ४

भुवि वर्ण्याः सकर्णास्ते ये प्राञ्चद्वचनं तव ।
मनोहत्य पिबन्तोऽत्र सुधामप्यवमन्वते ॥ ५

अस्तोकतोषपीयूष-वृषा तापभरप्लुषा ।
शम्पुषाऽघमुषा ते गीः-प्रावृषा मोदते न कः ? ॥ ६

गिरा ते पापसन्ताप-निर्वापामृतकुल्यया ।
अतुल्यफलदो धर्मः सिक्तः कस्यैति नोदयम् ? ॥ ७

न विस्मापयसि स्वस्य गिरैवोदारया नरान् ।
किन्तु सौभाग्यमात्रेण सुत्रामादि-प्रभूनपि ॥ ८

देशनाद्भुतदानेन सुधावृष्टिसधर्मणा ।
भवतोज्जीविताः के न मोहाहिविषदुःखिताः ? ॥ ९

सदोदारतरं सद्यो ध्वस्तारं ते वचोभरम् ।
प्राप्येश ! मोदते को न निधानमिव निर्धनः ? ॥ १०

जिन-कीर्त्तिकरम्बिताखिल-त्रिजगत्ते भगवन्निति स्तुतः ।
शिवसौख्यमनारतं सतां विदधातु प्रमदात् प्रणेमुषाम् ॥ ११

## ॥ अथ द्वाविंशः स्तवः ॥

सुरदानवमानव-प्रभुप्रकरेण प्रणतो भवान् भुवि ।
तनुतां तनुतां तनूमतां विहितानां मनसाञ्जसांहसाम् ॥ १

धन्योऽहम्पूर्विकापूर्वं तवाऽऽज्ञातत्परो न कः ? ।
न स्यान्मधुकरः कस्कः केतक्यामुत्कमानसः ? ॥ २

धन्योऽद्याहं दुरापस्त्वं यदि मे हृदि जायसे ।
किं नात्रोत्तमसङ्गत्या वासरोऽपि मरुन्मणिः ॥ ३

कस्यापि विदतोऽपि त्वां नाऽदेवाद्धीर्निवर्त्तते ।
लता हि न जहात्येव वृक्षं शुष्कमपि प्रभो ! ॥ ४

आलिङ्गन्त्यङ्गिनं रङ्गाद् भवद्भक्त्यागमे रमाः ।
वर्षागमे यथा हर्षा-द्वीरुधो जगतीरुहम् ॥ ५

आसन्नसिद्धिकत्वे स्याद् वन्दनाप्यङ्गिनां त्वयि ।
मञ्जरी हि फलासत्तौ भवेन्माकन्दशाखिनाम् ॥ ६

सपापेऽपि सपर्या ते हिता सा त्वनघेऽधिका ।
शस्योपकारिणी वृष्टिः शुक्तौ मुक्ताकरी न किम् ? ॥ ७

जायतेऽह्नाय ते योऽङ्गी भक्तिरागेण भूषितः ।
कटाक्षयति तं लक्ष्मी-रखिलापि प्रहर्षुला ॥ ८

इति सोऽमृतयोगकृत् सदा मे गरलोद्गार इव स्तवस्त्वदीयः ।
दुरितैकविषापहारतोऽसौ जिनकीर्ति प्रथनोऽस्तु सिद्धिदानात्॥९

## ॥ अन्ययोगव्यवच्छेदपरश्रीजिनेन्द्रस्तवस्त्रयोविंशः ॥

नम्रामराधीश्वरमौलिमौलि-
प्रभाङ्कुराम्भःस्नपितांह्रियुग्मः ।
यशोविशोभित्रिजगज्जनास्यः
सदास्य दास्यस्थितिमीश ! मे त्वम् ॥ १

प्रणामोऽपि तवाकामो मोक्षसिद्धौ निदानताम् ।
दधाति धान्यनिष्पत्ता-वौत्तराह इवानिलः ॥ २

अप्यैहिकसुखावाप्त्यै न विराध्यस्त्वमङ्गिना ।
छिनत्ति खलु कल्पद्रु-मिन्धनाय न धीधनः ॥ ३

सकृदप्युपयुज्येत यस्तवोपासने सुधीः ।
बिडौजा इव निर्व्याज-निविडौजाः स जायते ॥ ४

चित्तोदयाद्रिमारूढे त्वयि प्रद्योतने सताम् ।
विघ्नव्राता विलीयन्ते ध्वान्तौघा इव शार्वराः ॥ ५

पशुः कामदुघा धेनुः काष्ठमेव सुरद्रुमः ।
दृशद्विषदां रत्नं तवेश ध्रुवमग्रतः ॥ ६

कस्य स्तुतिपथं याति गरिमा परमस्तव ।
नूनं सर्षपतामेति मन्दरोऽपि यदग्रतः ॥ ७

देवत्वेन श्रयामि त्वां न हरादीन् परान् क्वचित् ।
हारयत्यारकूटाय कः सुवर्णं सचेतनः ? ॥ ८

त्वदुपास्तिपरत्वेन देहिनां सकलाः कलाः ।
भजन्ते परमां शोभां मुखश्रीरिव चक्षुषा ॥ ९

साम्राज्यं मे जिनेश ! त्वं वितरीतुमिवाद्भुतम् ।
दृक्पथं प्राक्तनागण्य-पुण्यनुन्न इवागमः ॥ १०

हठभाजि न कीर्त्तितापथे मयि पापे विहिता कृपा त्वया ।
अथ ते सुपथावलम्बिनः कृतिनो मे प्रथयाऽऽशु निर्वृतिम् ॥ ११

॥ श्रीजिनदर्शनातिशयवर्णनोनाम स्तवश्चतुर्विंशः ॥

सदा त्वदाशीर्वचनप्रकाशि-प्रज्ञालभूपालनतस्तुतांह्रिः ।
प्रभावभास्वद्गुणरत्नराशि-रत्नाकरो विश्वगुरो ! जय त्वम् ॥१

सुधावृष्टिर्ममाद्याभू-द्विना पुष्पं फलोदयः ।
निधानं च प्रधानं मे करेऽधादधुना स्थितिम् ॥ २

प्रादुर्भूतं प्रभूतं मे पाकिमं भक्तिसेकतः ।
वरेण्यं प्राच्यपुण्यं च यत्त्वमद्य मयेक्षितः ॥ ३

मूर्त्तिस्ते प्रगुणागण्य-लावण्यार्णस्तरङ्गिणी ।
तर्षापहाप्यहो तर्षा-वहा विश्वाङ्गिचक्षुषाम् ॥ ४

काप्यसौ स्फारसौभाग्य-भङ्गिसर्वाङ्गसङ्गिनी ।
मूर्त्तिस्ते जरतः स्रष्टुः सृष्टिर्नैव विभाव्यते ॥ ५

तव मूर्त्तेर्विषादः स्याद् येषां तेषामघात्मनाम् ।
सुधामयूखलेखायाः किलाऽभूद्विषवर्णनम् ॥ ६

भवद्भक्तिभरस्मेरे-ऽभ्युदयोऽप्यैति पाटवम् ।
दीपेऽधिकं प्रदीप्ते हि प्रकाशोऽपि प्रवर्धते ॥ ७

पुंसां ते दर्शनादेव सर्वकामितसिद्धयः ।
वल्लरीणां समुद्भेदः किं न कन्दवशंवदः ? ॥ ८

सतां त्वद्दर्शनोत्साह-वर्यपर्जन्ययोगतः ।
प्रावृषेण्यश्रवन्तीव पुण्यश्रीः स्फातिमेति हि ॥ ९

मिथ्यादेवेषु सम्यक्त्वां यदेवमहमाप्तवान् ।
प्रस्तरेषु मया न्यस्ते तत्प्राप्तः स्वर्मणिः करे ॥ १०

इति तव नुतिमालां पुण्यसौरभ्यशालां,
कलयति निजकण्ठे भक्तिभूषाञ्चितो यः ।
त्रिजगति जिन ! कीर्त्तिव्रातसम्पूरिताशः,
स भवति नियतश्री-मुक्तिकन्यानुयोगः ॥ ११

इति जिनपचतुर्विंशति-विततिः साहित्य-शर्कराह्वाना ।
येनास्वादि न स कथं स्व-मनस्तापं समापयति ? ॥ १

श्रीमज्जिनकीर्त्तिगुरु-क्रमकमल-मरालतां मुदा कलयन् ।
स्तुतिविततिचतुर्विंशति-परागवान् नेमिरत्नगणिः ॥ २

इति श्रीतपागच्छाधिराज-सुविहितचक्रचूडामणि-सूरिश्रेणि-पुरन्दर-श्रीसोमसुन्दरसूरिशिष्यपूज्यश्रीजिनकीर्त्तिसूरिविनेयाणुना पं. नेमिरत्नगणिना विनिर्मितायां स्तोत्रावल्यां श्रीजिनवरलघु-स्तवाधिकारे साहित्यशर्कराभिधा प्रथमा चतुर्विंशतिका समाप्ता।

## १२. ॥ द्वितीयचतुर्विंशतिकायां श्रीजिनाज्ञापालनफल-तारतम्यातिशयवर्णनो नाम प्रथमः स्तवः॥

चिन्तामणिरिव महसा सहसा परिचिन्तितार्थदानेन ।
हृदयस्थितोऽरिविजयं ददत् सतामीश ! भासि त्वम् ॥ १

प्रसूते प्रवराऽऽज्ञा ते विवेकं सेवकाङ्गिनाम् ।
रोहणोर्वीधरस्योर्वी जात्यरत्नमिवोज्ज्वलम् ॥ २

मतेन ते विना नाङ्गी विभासीद्धोऽपि बुद्धिभिः ।
शाखाशतसमृद्धोऽपि फलेनेव महीरुहः ॥ ३

शोभते भूषितोऽप्यङ्गी नैव ते शासनादृते ।
प्रसूनं सौरभन्यूनं सद्वर्णमपि भाति किम् ? ॥ ४

तवाऽऽज्ञाराधनं धन्यैः ख्यातमान्तरमण्डनम् ।
अभिमानसुखायैव बाह्याभरणडम्बरम् ॥ ५

यस्तवाज्ञावहो विश्व-रसज्ञारङ्गमण्डपे ।
ताण्डवाडम्बरं तस्य कुरुते कीर्तिनर्त्तकी ॥ ६

पूर्वाचलमिव प्राप्य त्वन्मतं को न जायते ? ।
स्फुरन्महातपस्फाति-र्भास्वानिव यमप्रसूः ॥ ७

तवैवाज्ञाश्रयात् पाप-मनन्तमपि देहिनाम् ।
झटिति त्रुटति स्वामिन् ! हस्तन्यस्तमिवोदकम् ॥ ८

तवाज्ञातरणीयोगात् तेरिवान् भवसागरम् ।
शिवं तीरमिव प्राप्या-न्यूनलाभो न को भवेत् ? ॥ ९

त्वदाज्ञाराधकीभूय स्वकीयाधिकभावतः ।
भावुकी को विवेकी न त्रिलोकीतिलकायते ? ॥ १०

तरणि-करणिरेवं ते स्तवो वासवोऽसौ
स्फुरितदुरितपङ्काशेषशोषप्रवीणः ।
अधिमहि जिनकीर्त्तिप्रोल्लसत् पुण्डरीका-
प्रतिमततिविकाशी मेऽस्तु पुण्याहसिद्ध्यै ॥ ११

**॥ जिनगीरतिशयवर्णनो नाम द्वितीयः स्तवः ॥**

प्रशमामृतसारणिस्तवा-मलवाणिर्भविकाऽऽशयालये ।
सुकृतैकसुरद्रुमं सदा-फलमनुवेलमदीदधत्तराम् ॥ १

गिरा सुधाकिरा प्रोद्य-द्वासना धर्मदेशना ।
त्वया प्रगुणिता नृणां शिवश्रीदूतिकेव सा ॥ २

आयोजनावनी-भव्य-गात्रपावित्र्यसूत्रिणी ।
युगपद्देहिसन्देह-हरा गीस्ते बभौ पुरा ॥ ३

सच्चक्रोल्लसदानन्द-प्रदा सत्पथदर्शिनी ।
अस्तदोषा जगज्जन्तु-प्रतिबोधविधायिनी ॥ ४

तवेशोद्यद्गवीश्रेणि-र्भास्वतो भासितक्षमा ।
समस्तान्यप्रशस्तानि तमांस्यत्र निरस्यति ॥ (यु.) ५

धन्या एव ध्वनन्तीस्ते गिरः स्वश्रवणाध्वनि ।
प्रवेशयन्ति भावारि-जैत्रभेरीरिवोत्तराः ॥ ६

तरीवोत्तारिणी प्राणि-श्रेणीनां भववारिधौ ।
सद्वाणीश ! त्वयाऽभाणि पुण्यकाननसारणिः ॥ ७

पीयमाना श्रवःपीना-ऽमन्दानन्दातिदायिनी ।
गरिष्ठा किं सुधावृष्टि-रभीष्टा शिष्टसंसदाम् ? ॥ ८

किं वेयं शर्करावारि-धारा धीधनधारिता ।
तुष्टिपुष्टिकरा स्फारा-वार्यतापापहारिणी ॥ ९

किं वाऽसौ क्षोदितद्राक्षा-रसपूरैकसारणिः ।
तव वाणिरिति प्राणि-गणेनाभाणि शङ्किता ॥ (कुलकम्) १०

अद्य वो भास्वरो वार-स्तीर्णः संसारसागरः ।
श्रोतारस्ते गिरामेवं देव ! मोदेन वादिनः ॥ ११

तव देव ! प्रासादेन सदेनःस्थितिहारिणा ।
ससारो वासरो मेऽस्तु यत्र स्यां तव गीश्रवः ॥ १२

इति संस्तवनैकगोचरं शरणं त्वां भुवनेष्वनुत्तरम् ।
जिन ! कीर्त्तिधरं सृजन्नहं श्रितदत्तार्थितमर्थये शिवम् ॥ १३

## ॥ जिनवरदर्शनविस्मयकारितावर्णनो नाम तृतीयः स्तवः ॥

त्रिदशेशनुतो हितोपदेशः स हि देशस्तव यत्र सुप्रवेशः ।
जनता घनतापवर्जिता सा, सहसा सन्मनसा नतो यया त्वम् ॥१

जन्मनि प्राक्तने कर्म निर्ममे किमहं शुभम् ।
येन त्वामीशमद्राक्षं कल्पद्रुमिव जङ्गमम् ॥ २

सम्प्राप्तेन त्वया नृणां विलीयन्ते समन्ततः ।
दुरन्ता विघ्नसङ्घाताः ध्वान्ता इव विवस्वता ॥ ३

तादृशो मे कदाऽऽनन्दो भविता भवदीक्षणात् ।
ध्रुवं गोष्पदतामेति समुद्रोऽपि यदग्रतः ॥ ४

व्यापारा मे समेऽप्यन्ये संसारे यात्यसारताम् ।
सारस्त्वयं ममाऽभूत् ते प्राप्तौ कल्पतरोरिव ॥ ५

कृतार्थास्तेऽङ्गिनां सार्था-स्त्वामाराध्यन्ति येऽन्वहम् ।
त्वयि स्याद् भक्तिरासन्न-भद्राणां हि दृढीयसी ॥ ६

भूतपूर्वमिदं नाऽभूद्दृग्मार्गे त्वं यदेषि मे ।
प्रसत्तिस्फातिसङ्केत-निकेतः पूरितेहितः ॥ ७

तनोति स्वमनोभक्त्या स्तोतुकामस्तवास्ति धीः ।
कृती नमस्कृतीः श्रेयः श्रीणां सत्याकृतीरिव ॥ ८

नेत्रोल्लासनचूडाल-भालः कः स्यान्न विस्मयात् ।
निरूप्याप्रतिरूपं ते रूपं श्रद्धालुमानसः ॥ ९

इयं कान्तिरियं मूर्त्ति-रिदं सौन्दर्यमद्भुतम् ।
इति सर्वातिशायीदं सर्वं ते विस्मयावहम् ॥ १०

इति ते जिनकीर्तिशुभ्रिता-खिलविश्वत्रयनूतनस्तवः ।
भुवने परमं पदं सदा विदधानोऽस्तु समस्तदेहिनाम् ॥ ११

## ॥ श्रीजिनस्तोतव्यार्हतादर्शनपूर्वप्रार्थनावर्णनो नाम चतुर्थः स्तवः ॥

नतसत्तमकामितामिता-प्रमितार्थप्रथने सुरद्रुमम् ।
भवतः क्रमयामलं भजेद् बहुलच्छायमनाकुलं न कः ? ॥ १

प्राप्तान्यसर्वदेवापि त्वां विना जनताऽवनौ ।
द्यौरिव द्योतते नैव सग्रहाऽपि रविं विना ॥ २

भव्याङ्गिनां प्रभूतापि विभूतिस्त्वां प्रभुं विना ।
अरण्यारामलक्ष्मीवत् सकलाऽप्यत्र निष्फला ॥ ३

त्वन्मतोद्योतने धन्यो मन्ये नैव धनं व्ययेत् ।
अनन्तगुणलाभार्थं किन्तु न्यस्येत्कलान्तरे ॥ ४

भवद्भावेऽपि भव्यानां हन्ति मिथ्यामतिः शुभम् ।
तैलेऽपि किमु नो वात्या विध्यापयति दीपकम् ? ॥ ५

सेव्यो नैहिकसौख्यार्थ-मपि त्वत्तः परोऽङ्गिनाम् ।
कः सुधीः सौधमात्मीयं ध्वंसते कीलिकाकृते ? ॥ ६

कार्मणं शर्मलक्ष्मीणां मर्मभिद् दुष्टकर्मणाम् ।
स्पर्शोपलः सुवर्णाप्तौ निधिर्वा सन्निधिस्तव ॥ ७

अहम्पूर्विकया सेव्यः शक्राद्यैस्त्वमभीष्टदः ।
न के समुत्सुकायन्ते स्वहिते हि सुचेतसः ? ॥ ८

भवद्भक्तिभरोद्दीप्राः कला मे वितराऽखिलाः ।
उद्यत्कलो यतः पूज्यो न तु नष्टकलः शशी ॥ ९

तव संस्तवनं स्वामिन् ! मुखशुक्तिगतं सताम् ।
स्वातितोयमिवावश्यं कल्पते मौक्तिकश्रिये ॥ १०

इति भक्तिलतोद्भवत्सुमप्रतिमः शान्तिपरागसङ्गतः ।
जिन ! कीर्तिकरस्तव स्तवः शिवसम्पत्फलमातनोतु नः ॥११

**॥ श्रीजिनवरपरमसौभाग्यवर्णनो नाम पञ्चमः स्तवः ॥**

गाम्भीर्यवार्द्धिर्गुणरत्नसेवधि-
र्ज्ञानप्रकर्षाभिविधिर्यशोदधिः ।
लसन्महर्द्धिः सुरसेव्यसन्निधिः
कृतेष्टसिद्धिर्जय सार्वसाद्विधिः ॥ १

सदा बिभर्ति मूर्तिस्ते विमलं गुणमण्डलम् ।
रोहणोर्वीधरोर्वीव प्रवरं मणिसङ्करम् ॥ २

न के नरामरेन्द्राद्याः पुण्यसौरभलालसाः ।
सिषेविरे सहर्षास्त्वां भ्रमरा इव वारिजम् ॥ ३

सदोऽप्यासादयेच्छोभां त्वय्यैवेन्द्रेषु सत्स्वपि ।
नभो नभोमणिं मुक्त्वा नहि भाति ग्रहैः परैः ॥ ४

तेजोबलगुणानन्त्यै-र्मूर्त्तिर्लोकोत्तरा तव ।
निमेषैरेव जात्वेषा मानुषीति मता तदा ॥ ५

भुवनासेवनं रूपं तव वीक्ष्य सुरा इव ।
विस्मयाद् भूस्पृशोऽपि स्यु-र्निर्निमेषेक्षणाः क्षणम् ॥ ६

रूपाऽऽलोकरसाक्षिप्ताः सङ्क्रान्ता जनतादृशः ।
भ्रमर्य इव संलीना-स्तर्क्यन्ते ते मुखाम्बुजे ॥ ७

विवेकिनोऽद्भुतान् गीत-सङ्गीतादिमहानपि ।
तृणायापि न मन्यन्ते त्वद्दर्शनमहोत्सवे ॥ ८

यस्य नेत्रे तवाऽऽलोके पद्मे इव दिनोदये ।
विस्मेरे भवतः स्वामिं-स्तस्य श्रीर्नैव दूरतः ॥ ९

आर्जवादिव दौर्जन्य-मौदार्यादिव दुर्यशः ।
प्रणामाद्भवतो नृणां दुरितं याति दूरतः ॥ १०

इति तव स्तवशीतरुचिर्ममामृतयुतं जिन ! कीर्तिमहोदधिम् ।
सततमुल्लसितं तनुतां यतः सुखतरङ्गभरः सुलभो भवेत् ॥११

**॥ श्रीजिनासमानगुणगानफलवर्णनो नाम षष्ठः स्तवः ॥**

गुणरत्नभरैर्विभूषितो विशदज्ञानसुधाकरोदये ।
प्रशमामृतपूरमन्वहं वहसे युक्तमहो ! महोदधिः ॥ १

युक्तं क्षमामयोऽसि त्वं यतः पञ्चमहाव्रती ।
मेरुपञ्चतयीवात्र दुर्द्धराऽपि धृता त्वया ॥ २

अष्टादशसहस्राणां शीलाङ्गानां सना भरम् ।
धरापिण्डमिव प्रौढं वोढुं प्रौढिं श्रितो भवान् ॥ ३

आहारादिषु सन्तुष्टो न सन्तुष्टः शुभोद्यमे ।
क्षुधादुःस्थोऽप्यसि स्वच्छो गवेषयितुमेषणाम् ॥ ४

कृशोऽपि वपुषा तैस्तै-स्तपःस्तोमैश्च मांसलः ।
अधौतोऽपि बहिस्त्वन्तः क्षालितात्ममलः शुचिः ॥ ५

तपनाऽऽतपतस्तप्तो न पुनः क्वापि कोपतः ।
परीषहोदये त्वं च स्तब्धो न त्वभिमानतः ॥ ६

अनृजुः कर्मकौटिल्ये कामं न क्वापि मायया ।
परार्थकरणे नित्यं सतृष्णो न तु लोभतः ॥ ७

भवभ्रमादतिश्रान्तो न सद्ध्यानाध्वतारतः ।
सासहिस्त्वं परापायान् क्षमया नाक्षमत्वतः ॥ ८

निस्सङ्गत्वाद्वने वासी नाश्रयालाभतो भवान् ।
कर्मक्षयार्थताहेतो-र्मौनी न त्विह मौक्यतः ॥ ९

मनोवाक्काययोगेषु नितान्तमुपयुक्तवान् ।
अपायेषु महाधीरः स्वदेहेप्यनपेक्षकः ॥ १०

उपसर्गास्त्वया दुर्गा दिव्यतैरश्चमानुषाः ।
द्वाविंशतिः क्षुधाद्याश्च दृढं सोढाः परीषहाः ॥ ११

जगज्जयपटीयांसौ रागद्वेषमहाभटौ ।
अजय्यौ चक्रिशक्राद्यै-र्निर्जितौ तावपि त्वया ॥ १२

मोहं मोहं जगत्सर्वं द्रोहं द्रोहं त्वहर्निशम् ।
ग्राहं ग्राहं च तल्लक्ष्मी-समूहं मोहमेधितम् ॥ १३

दूर्वामिव प्ररोहन्तं छिन्नमप्यन्वहं परैः ।
विद्यासिद्धमिवोद्दामं दुर्मरं भुवने प्रभुम् ॥ १४

त्वया वीराधिवीरेण तमप्युन्मूल्य मूलतः ।
जयश्रीर्भाग्यलभ्यासौ वव्रेऽमा केवलश्रिया ॥ (त्रिभि.) १५

अहो ! त्यक्त्वाऽतिचाराँस्त्वं लङ्घितासि भवाटवीम् ।
अव्यापारोऽपि मुक्तिश्री-स्वीकारे व्यापृतः प्रभो ! ॥ १६

धर्मैकभूपतेर्दूता इवोपेता गुणास्तव ।
अधर्मोर्वीपतेस्त्रासं कुर्वन्ति प्राणिनां पुरे ॥ १७

न परं तेऽवभासेन निर्मला विपुलाशयाः ।
किन्त्वगस्त्योदयेनेव सर्वेऽप्यत्र जडाशयाः ॥ १८

शिवभाजि न कीर्तिभासिते त्वयि के मुक्तिकृते व्यधुः स्तुतिम् ?।
इति तां सृजतः प्रसद्य मे प्रथय त्वं सदयं महोदयम् ॥ १९

**॥ अथ श्रीजिनभक्त्येकान्ततफलवर्णनः**
**सप्तमः स्तवः ॥**

यद्ध्यायति त्वामितनमानसं तन् नियोजिते ये त्वयि लोचने ते।
वाणी च सा या स्तुतिकारिणी ते
पाणी च तौ यौ श्रयतस्तवार्चाम् ॥ १

भाग्यं विना मया कस्ते भक्तिं योजयितुं क्षमः ? ।
निशावियुक्तचक्रेण चक्रीमिव दिवाकरम् ॥ २

भवद्भावनरेन्द्रस्य राजधान्यां मतौ सताम् ।
मिथ्यात्वं सञ्चरेन्नैव विप्रपुर्यामिवान्त्यजः ॥ ३

तवैव सेवया भव्य-वर्गे मिथ्यामतोक्तयः ।
ध्रुवं भजन्ति वैफल्य-मुपदेशो यथा जडे ॥ ४

त्वत्त एवानघीभूता मनोवृत्तिर्मनस्विनाम् ।
त्वदीयोपकृतिक्रीती नहि कामयते परम् ॥ ५

विवेकस्येव कार्पण्यं दुग्धस्येव तुषोदकम् ।
रूपस्येव कुशीलत्व-मिन्दोरिव कलङ्किता ॥ ६

कुनीतिरिव राजस्य क्षारत्वमिव वारिधेः ।
त्वद्भक्तस्यापि धर्मस्य मिथ्यात्वं दूषणं भवेत् ॥ (यु.) ७

त्वदेकधर्मशुद्ध्यर्थं सुधीर्मिथ्याधियं त्यजेत् ।
श्रोत्रीयः स्वस्य शौचार्थं मातङ्गीसङ्गतिं यथा ॥ ८

त्वयि द्वेषाद्वियुक्तस्य वर्द्धन्ते प्रत्यहं श्रियः ।
तिग्मभानोर्विभिन्नस्य कला इव कलावतः ॥ ९

तवैव देव ! सङ्गोऽयं सुरङ्गस्य सदाऽस्तु मे ।
वसन्त इव यः पुण्य-वल्लीपल्लवनक्षमः ॥ १०

भवता जिन ! कीर्त्तिताखिल-त्रिजगत्तारकधर्मवर्त्मना ।
इति मे श्रितवत्सल ! स्तुतिं सृजतो बोधिरमा विधीयताम् ॥११

## ॥ श्रीजिनवर-लोकोत्तरतावर्णनः अष्टमः स्तवः ॥

भक्तितस्तव पुरः प्रणामतो
भूरजस्तिलकितं निजं शिरः ।
यैरकारि जिन ! तैरधारि किं
कार्मणं शिवरमा वशीकृतौ ? ॥ १

त्वया देवाधिदेवत्वं सम्पदत्रोपयम्यते ।
कः परो वृणुते लक्ष्मीं विहाय पुरुषोत्तमम् ॥ २

मन्ये सर्वोत्तमैर्विश्वे परमाणुभिरद्भुतैः ।
त्वमेव विहितपूर्वं शेषैरिन्द्रादयस्तु तैः ॥ ३

सर्षपा मन्दरस्येव गोष्पदान्यम्बुधेरिव ।
खद्योतास्त्वरुणस्येव शक्राद्यास्ते पुरः श्रिया ॥ ४

अहो ! मे फलितं पुण्यै-रहो ! पापैः पलायितम् ।
अहो ! वन्ध्यागृहे सूनु-रहो ! कल्पतरुर्मरौ ॥ ५

गङ्गाऽहो जङ्गलस्यान्त-रहो ! दर्शे निशामणिः ।
दृक्पथेनाद्य मे चित्त-सौधं यत् प्राप्तवानसि ॥ (यु.) ६

त्वत्तः प्रमोदबाष्पाम्बु-पूरैः पुण्यमहीरुहम् ।
सिञ्चन्तमद्य मां पङ्क-मस्यन्तं त्वमपेक्षसे ॥ ७

तव स्मरणमात्रस्य माहात्म्यं वर्णनातिगम् ।
यस्य दास्यं श्रिताश्चिन्ता-मणिकल्पद्रुमादयः ॥ ८

इति सुरपतिगीतस्फीतिमानं भवन्तं
स्तुतिपथमवतार्य प्रेर्यमाणोऽतिभक्त्या ।

अवृजिनजिन ! कीर्तिस्फूर्तिमन्मुक्तिलक्ष्मी-
परिणयनविनोदं स्वस्य याचे समोदम् ॥ ९

**॥ श्रीजिनेन्द्राऽभक्तिभक्तिजफलवर्णनो नवमः स्तवः ॥**

ये पाटवं न चरणे दधते त्वयेश !
प्राज्यं सुदर्शनमहो ! परमोदकं ते ।
पुष्टा प्रभोज्य विहितास्तदमन्दवीर्या
जङ्घालतामविकलं कलयन्ति मुक्तौ ॥ १

मोहस्फातिसुरापाणा-दिवोन्मत्ततया जनः ।
त्वामेकान्तहितं हित्वा रज्यतेऽनाप्तराजिषु ॥ २

केऽपि मोहग्रहावेशा-दिव ग्रहिलतां गताः ।
स्वकीयमास्यमुल्लास्य हास्यं तन्वन्ति ते मते ॥ ३

मिथ्यात्वभावितः कोऽपि विचाराँस्ते मताश्रितान् ।
न श्रद्धत्ते वराहारा-निवात्यन्तमरोचकी ॥ ४

स्वाधीनोऽपि शुभो भावो न परेषां हिते त्वयि ।
पराङ्मुखमशेषं हि प्रतिकूले विधातरि ॥ ५

पराङ्मुखास्त्वयि स्वामिन् ! भ्रश्यन्ते दीप्सितः परे ।
प्रदीपे खलु निर्वाणे प्रकाशोऽप्यपसर्पति ॥ ६

न मन्त्रेण न तन्त्रेण न रत्नेन न विद्यया ।
न सिद्ध्या नापि चौषध्या तव (त्वद्) भक्तेरतिरिच्यते ॥ ७

वाङ्मात्रेणावनौ साराः शारदाम्बुदवत् परे ।
प्रथमाम्बुदवन्नेतः ! सद्यः कार्यकरो भवान् ॥ ८

सौभाग्यारोग्यदीर्घायुः–साम्राज्यादिसुखश्रियाम् ।
तव पादाम्बुजं स्थानं मणीनामिव रोहणः ॥ ९

नूनमुत्कर्षगग्रीष्म–सरसीव कृशीयसी ।
जायते त्वयि भक्त्याऽऽशु प्राचीनांहः प्रथाऽङ्गिनाम् ॥ १०

त्वमेव दैवतं स्वामिं–स्त्वमेव भुवने विधिः ।
नूनं त्वमेव कल्पद्रु–स्त्वमेव दिविषन्मणिः ॥ ११

घनगर्जि न कीर्तिमण्डलं भुवनव्यापि विराजते न ते ।
इति संविदममन्दसम्पदं परमस्त्वं कुरु मे समीहितम् ॥ १२

**॥ श्रीजिनेन्द्रपूजाविधिप्रक्रमवर्णनो दशमः स्तवः ॥**

भवतः प्रणतिं श्रयेत यत् करणं तद्धरणीविभूषणम् ।
गुणगानपरा तवैव या रसना सा स्तवनीयतां गता ॥ १

बहिर्विरचयेच्छौचं दक्षस्तेऽर्चाचिकीर्षया ।
रोषादिदोषकालुष्या–पहारादन्तराऽपि च ॥ २

त्वां संस्नापयितुं भाति मुञ्चन् वारिभरं कृती ।
निषेक्तुमिव सर्वेष्ट–प्रदं पुण्यसुरद्रुमम् ॥ ३

श्रीखण्डस्यार्चना यस्य श्रीखण्डेनार्चकस्तु यः ।
अत्र ते कौतुकं त्वत्तः श्रीरखण्डा तयोरपि ॥ ४

येषां सुमनसां पूजा ये च स्युः पूजकास्तव ।
विश्रो (विश्वे) तयोर्द्वयोरेव सौमनस्यं हि साम्प्रतम् ॥ ५

दीपस्याऽप्यर्चना यस्य यस्तेऽग्रे दीपदीपकः ।
युक्तं स्याद् दीपकत्वं त्वत् तयोरेवाऽत्र दीपक ! ॥ ६

निःस्नेहस्य पुरस्ते यो दीपः स्नेहमुचा कृतः ।
युक्तं सस्नेहमश्नाति यथा राजा तथा प्रजा ॥ ७

अगुरुं धूपयेद्धन्यः स्वकर्मागुरुतां नयन् ।
यस्तेऽग्रे सोऽपि किं नैति गुरुत्वं मतिगौरवात् ? ॥ ८

गुरुत्वं भजते धूप-व्रजेऽप्यगुरुतान्वितः ।
योऽर्थस्तस्य त्वदेकान्ता-र्चकत्वात्तदपि प्रभो ! ॥ ९

धूपदाहित्वतस्तेऽग्रे वह्निः पावकतां भजेत् ।
विश्वसन्तापकोऽप्येष महद्भ्यो वा न किं भवेत् ? ॥ १०

ढौकते न तवैवासौ धन्योऽतुलफलव्रजम् ।
किन्तु स्वस्याप्ययं स्वर्गा-पवर्गादिफलोच्चयम् ॥ ११

इदं हृद्यं न नैवेद्यं सद्यस्कमनवद्यधीः ।
निधत्ते तेऽग्रतः किन्तु मूर्त्तं सम्यक्त्वमात्मनि ॥ १२

निक्षिपत्यक्षतान्नैतान् पुरस्ते भक्तितः सुधीः ।
किन्तु वप्तुमयं पुण्य-कृषिसिद्ध्यै किमात्मनः ? ॥ १३

उदारस्ते नमस्कारः कृतः पापापहारकः ।
हन्ति विघ्नमिह प्रेत्य दुर्गतिं च मनस्विनाम् ॥ १४

न धन्यस्तेऽवलोकेन नेत्रे एव पवित्रयेत् ।
स्तवेनाऽऽस्यमपि स्वस्य प्रभूतरसशालिना ॥ १५

विश्वे स्फूर्तिर्भवन्मूर्त्ते-र्भूयसीष्वन्यमूर्त्तिषु ।
पुष्पजातिषु बह्वीषु जातेरेव हि मान्यता ॥ १६

इति नवस्तवनाम्बुरुहासिन-
स्तव विधेर्जिन ! कीर्तिमतः पदम् ।
इह भजन् पुरुषोत्तमतां गतः
परमया रमयाप्यहमीहितः ॥ १७

## ॥ श्रीजिनस्तवनमहिमैकवर्णन एकादशः स्तवः ॥

जिन ! स्पष्टपुण्यामृतव्रातवृष्टिः
स्तवस्तावकः पुष्करावर्तमेघः ।
सृजन् केवलस्फारशस्यश्रियं मे
महानन्दसौख्याय निर्विघ्नमस्तु ॥ १

तवाद्यमन्दरागस्य सङ्गमेऽभिनवः स्तवः ।
मत्तः प्रादुरभूत् सौध-वाहः क्षारार्णवादिव ॥ २

फलसंवावदूकानि स्तवनानि तवाश्रयेत् ।
धन्य एवौषधानीव हन्तुं भावरुजाव्रजान् ॥ ३

धन्योऽहं जनतामध्ये प्रभो ! यन्मे स्तुतिस्त्वयि ।
वदनं भूषयामास कासारं पद्मिनी यथा ॥ ४

तत्तन्निस्तुल्यकल्याण-सम्पदर्पणकर्मणि ।
प्रतिभूर्भवितुं पुंसां संस्तवस्ते प्रगल्भते ॥ ५

तवावश्यं जिनेन्द्रस्य नश्यन्ति स्तवनादपि ।
प्राणिनामापदः सर्वाः शिवा इव विवस्वतः ॥ ६

तव स्तुत्याङ्गिभिः साध्यं सौख्यं स्वर्गापवर्गयोः ।
धीमद्भिः सुप्रयुक्तस्य किमुपायस्य दुष्करम् ? ॥ ७

कषायविषयग्राम-विषभृद्विषमोषिणी ।
भाति ते स्तुतिरप्यत्र जाङ्गुलीव बलीयसी ॥ ८

शस्याऽसौ रसना यस्याः पापाया अपि ते स्तवः ।
शिवङ्करः स्वरो यस्या मान्या दुर्गाऽपि सा न किम् ? ॥ ९

संस्तवेन प्रणामेन दर्शनेनापि तेऽङ्गिनाम् ।
सद्योऽप्युच्छिद्यते पापं वायुनेवाऽभ्रमण्डलम् ॥ १०

इत्याश्रिता ये तव संस्तवेन स्पर्शोपलेनेव सदैव देव ! ।
सन्तोऽद्भुतां काञ्चनसम्पदं ते
नूनं श्रयन्ते जिन ! कीर्तिभाजः ॥ ११

## ॥ श्रीजिनवरदीक्षाप्रस्तावप्रस्तवनो द्वादशः स्तवः ॥

दीक्षाक्षणे ते जिन ! कम्पितासनाः
सुरासुरेना मुदिताः समागताः ।
स्नानार्चितं त्वां विदधुर्विभूषणै-
र्विभूष्य कल्पद्रुमिवात्र जङ्गमम् ॥ १

सस्पर्द्धमुच्चैरवनौ नरेन्द्र-नरैः सुरैस्तु द्यवि वाद्यमानैः ।
पवित्रवादित्रशतैरसङ्ख्यै-रमन्दनादैर्ध्वनितेऽन्तरिक्षे ॥ २

उपेत्य दिव्यां शिबिकामपास्त-विमानमानां रचितां सुरौघैः ।
अप्रत्नरत्नाञ्चितकाञ्चनोच्च-सिंहासनारूढमुदूढशोभम् ॥ ३

प्रभो ! भवन्तं प्रणतामरेन्द्रो-पवीज्यमानं चलचामराभ्याम् ।
नरैरहम्पूर्विकया सुरैश्च ब्राह्मत्वमाप्तैः पथि नीयमानम् ॥ ४

देवाङ्गना-देवगणैः समन्तात् संस्तूयमानं जय जीवशब्दैः ।
वर्द्धाप्यमानं मणिरत्नमुक्ता-फलप्रसूनैर्विविधैर्दुकूलैः ॥ ५

हृदां सहस्रैरनुमोद्यमानं दृशां सहस्रैरवलोक्यमानम् ।
गिरां सहस्रैरभिनूयमानं विदां सहस्रैरभिवन्द्यमानम् ॥ ६

जनाङ्गुलीभिः किल दर्श्यमानं भव्याञ्जलीभिश्च नमस्यमानम् ।
नृत्यन्नटीभिस्त्वभिगम्यमानं
दृष्ट्वेश ! हृष्टोऽत्र न कोऽसमानम् ॥ (षड्भिःकु.) ७

मृगीदृशामास्यगणैर्गवाक्ष-विनिर्गतैरीक्षितुमध्वनि त्वाम् ।
विभूषितं व्योम जनैरलक्षि प्रत्यक्षपीयूषमयूखलक्षम् ॥ ८

असौ सहस्रांशुरहो ! महोभि-
र्नाऽयं जगत्तापहरो यदेषः ।
किं वा सुधांशुः सकलः कलाभिः
नायं यतोऽसौ हि कलङ्कमुक्तः ॥ ९

किं कल्पवृक्षोऽयमभीष्टदानान्
नायं यतोऽसावजडो वदान्यः ।
एवं प्रमोदेन च विस्मयेन
धन्यैस्तदाऽधीश ! विकल्प्यसे त्वम् ॥ १०

वृण्वानयोद्यच्चरणश्रिया समं
रयान् मनःपर्यवसंविदङ्गना ।
स्पर्द्धानुबन्धादिव पाणिपीडनं
चकार यत्तेन कथं तदद्भुतम् ॥ ११

महोत्सवाद्वैतमये त्वदीये
दीक्षाक्षणेऽध्यक्षतयेक्ष्यमाणे ।
सविस्मयो नाऽवनिलोक एव
तदा समग्रोऽपि च देवलोकः ॥ १२

इति तरणिसमाना वास्तवा सा स्तुतिस्ते
भवजलनिधिपूरं तारयन्ती स्वलग्नान् ।
गुरुशिवपुरमार्गे प्रस्थितानन्तसौख्यं
प्रदिशतु जिन ! कीर्त्तिव्याप्तिरत्नाप्तिजं मे ॥ १३

**॥ श्रीजिनेन्द्ररूपादिगुणातिशयवर्णनः त्रयोदशः स्तवः ॥**

स्वकीयरूपैकसरोवरोद्यल्लावण्यपीयूषरसेन यत्त्वम् ।
निहंसि विश्वाघनिदाघतापं युक्तं तदुक्तोऽस्यमृतस्वरूपः ॥ १

मुखं कलाभिर्नयनद्वयं चा-
त्यन्तप्रसत्त्या तव रुध्यमानम् ।
विलोक्य सौत्सुक्यमिव त्वदीयं
सर्वाङ्गमालिङ्गति चङ्गिमश्रीः ॥ २

पश्यतां तृप्तये नासीत् परः कोपि त्वया विना ।
भुञ्जानानां तनूदर्याः कदर्यायाः करो यथा ॥ ३

समकालं समालिङ्गन् प्रगुणस्त्वां गुणाः समे ।
भवदद्भुतसौभाग्य-कृतव्यामोहना इव ॥ ४

विना भवन्तमन्यत्र परीक्षापूर्वकारिणाम् ।
दृष्टिर्न रज्यते क्वापि कलहंसीव पङ्किले ॥ ५

पूज्यस्त्वमेव देवेषु प्रभूतेषु हरादिषु ।
मणिषु श्रयते चिन्ता-मणिरेव हि मान्यताम् ॥ ६

निष्पादितो भवान् सर्वोपकारिपरमाणुभिः ।
परार्थैकपरा तेऽभूत् प्रवृत्तिः कथमन्यथा ॥ ७

न ते केऽपि गुणाः सन्ति ये प्रभो ! त्वयि नाश्रिताः ।
स्वयम्भूरमणाभिख्ये मीनाकारा इवाम्बुधौ ॥ ८

मूर्त्तिस्तवैवानुपमा जगत्त्रये हर्षप्रणाली विमला गुणावली ।
आव्योमगा श्रीजिन ! कीर्त्तिसन्तति-
र्भक्तिश्च दीप्ता हृदि मे सदाऽऽसताम् ॥ ९

## ॥ श्रीजिनवरगीरतिशयवर्णनः चतुर्दशः स्तवः ॥

पुरुषार्थपथावभासकं समवस्तुप्रकरप्रकाशकम् ।
वचनं तव दीप्रदीपकं न भजेत् को भविको भुवि प्रभो ! ॥१

वचनैर्देशनोर्व्यां ते पीयूषरसपाकिमैः ।
उल्ललास सतां मूर्त्तिः पद्मिनीव रवेः करैः ॥ २

अमोघास्ते गिरो धाराः पुष्करावर्त्तमेघवत् ।
भव्यक्षेत्रे सुदृग्बीजात् कृतशस्यमहोदयाः ॥ ३

अभव्यक्षेत्रभूमिषु नैव शस्योदयप्रदाः ।
यतस्तासामवस्थान-मात्रमप्यत्र दुर्वचम् ॥ (यु.) ४

अभव्योऽपि च दौ (दुर) र्भव्यो भिद्यते वचसा न ते ।
त्यजेत् किं कटुतां निम्बः सुसिक्तोऽपि सिताजलैः ॥ ५

त्वमभव्यान् विना क्षेप्तुं कर्माणि प्राणिनामलम् ।
मुक्त्वा हि ग्रथिलं दारु सुधीर्घटयितुं प्रभुः ॥ ६

तवोपदेशपीयूष-पानकेलिप्रभावतः ।
न कोऽत्रानन्दरोमाञ्च-मेदुरीभूतमूर्त्तिकः ? ॥ ७

तितीर्षति भवाब्धिं स सर्वसङ्गं मुमुक्षति ।
पिपासति सुधायूषं यः शुश्रूषति ते गिरम् ॥ ८

तदा भाग्योदयस्तस्य प्रस्थानं च शिवाध्वनि ।
पाणौ चिन्तामणिप्राप्ति-र्यस्याऽऽस्ते तव गीःश्रुतिः ॥ ९

ज्ञानदर्शनचारित्र-पथे पाथेयतां श्रयेत् ।
भवद्गीर्विभवो यस्य तस्य दूरे न मुक्तिद्वाः ॥ १०

एवं तावकपावक-नुतिरेषा कामधेनुरिव ।
भविनां श्रीजिन ! कीर्तिक्षीरं स्फारं दत्ते स कल्याणम् ॥ ११

## ॥ श्रीजिनेन्द्रगीरतिशयवर्णनः पञ्चदशः स्तवः ॥

यत्र यत्र भवतः स्थिरा गिरस्तत्र चित्रकलता भवन्ति ताः ।
नेति चेत्तदसमा रमा प्रभो ! तेषु किं क्षयमुपैति जातु नो ॥ १

धाराधरस्फुरद्वारि-धारास्तापहरा इव ।
पुण्याङ्कुरकराः स्फारा रेजुस्ते देशनाभराः ॥ २

भव्यचेतांसि दुर्भेदा-न्यपि भावयसे गिरा ।
नैव चेतस्त्वभव्यानां कुलिशेनेव निर्मितम् ॥ ३

अभव्यानां मनो नैव भिद्यते त्वयि देशके ।
पुष्करावर्त्तमेघे हि मुद्गशैलोपलः कथम् ? ॥ ४

मतमास्तां तवाभव्यो न श्रद्धातुं वचोऽप्यलम् ।
तुङ्गदुर्गायते पङ्गो-र्गेहस्यापि हि देहली ॥ ५

तव देव ! वचःश्रेणिः सतां चित्ते यथा यथा ।
स्फातिं धत्तेऽनुरागोऽपि स्पर्द्धयेव तथा तथा ॥ ६

घृतैरिव तवोक्तैर्मे दीप्तो ध्यानहुताशनः ।
कर्मैधगः कदा भावी धित्सुर्धगधगायितम् ॥ ७

अभङ्गरसभङ्गीभि–रुत्तरङ्गीकृतानि ते ।
वचनानि सरांसीवा–वगाह्यापश्रमो न कः ? ॥ ८

तवोपदेशपीयूषो–त्तीर्णमोहमहाविषः ।
अजरामरतां धत्ते–ऽनन्तैश्वर्यसुखां पुमान् ॥ ९

गाहते यो महाम्भोधि–मिवागाधं तवागमम् ।
वृणुते स रमां धीमान् पुरुषोत्तमतां श्रयन् ॥ १०

इति संस्तुतिमार्गमुपेतमहं प्रमदेन भवन्तमभीष्टकरम् ।
प्रविधाय महोदयलाभधरं जिनकीर्तिगुरुं गणयामि निजम् ॥११

## ॥ श्रीजिनेन्द्रैकान्तदेवतत्त्वाङ्गीकारदर्शनप्रस्तवनः षोडशः स्तवः ॥

सच्चक्राणां प्रीणनमपहरणं दुर्निवारतमतमसाम् ।
सुदृशां सुपथप्रथनं मथनं दोषाभिषङ्गस्य ॥ १

दुष्टग्रहनिग्रहणं शुभकमलोल्लासनं च भासन्ते ।
भवति जगदेकमित्रे–ऽमूनि विभो ! सहजसिद्धानि ॥ (यु.) २

प्रमाणीयति कल्याणी भक्तिर्यस्त्वां जगत्पतिम् ।
स्मरारिं दूरयित्वा तं विरतिर्वरिवस्यति ॥ ३

नाथं कृताघमाथं त्वां साक्षाद्धर्ममिवाङ्गिनम् ।
उपेत्य श्रेयसीभक्ति–र्मुक्तीयति न कः कृती ॥ ४

भाक्तिक्यः प्रत्यनीकाश्च त्वयि स्युर्न स्त्रियोऽपि किम् ।
मूर्धन्या अप्यमूर्धन्या–स्तेन ते समता मता ॥ ५

निष्प्रमादं सुसंवादं मतं तेऽर्चनचञ्चवः ।
आराध्यन्ति विमृश्येति पाणौ हि प्राणिनां मृतिः ॥ ६

वञ्चितास्ते पराञ्चो ये भवतोऽपि भवद्द्रुहः ।
विश्वेऽपि कृतकृत्यास्ते ये त्वामिष्टदमीशते ॥ ७

अजन्मान्तमपुण्याघं सदैवाऽशोकविस्मयम् ।
स्तवीम्यवैरसौहार्दं भवन्तं हार्दमोदतः ॥ ८

जिन ! कीर्तिलताछाया-च्छादिताऽशेषविष्टपः ।
भवारण्यभ्रमोद्भूतं तापं त्वं कस्य नास्यसि ? ॥ ९

इति ते स्तुतिजाह्नवीरससेवनं यस्य मनः प्रमोदतः ।
विदधाति दधाति स श्रियं शिवलक्ष्मीकरमाश्रितः कृती ॥१०

## ॥ श्रीजिनेन्द्रच्यवन-जन्मावस्थाद्वयकियदङ्गलक्षणवर्णनः सप्तदशः स्तवः ॥

कलाधरस्तारकसाधुसेव्यः,
सौम्याकृतिः सिद्धमहोदयश्रीः ।
अगण्यकारुण्यसुधारसाब्धिः
सदाभिवृद्धिं जिन ! मे नय त्वम् ॥ १

विमानं त्यक्तमानं तद् यतस्त्वमवतेरिवान् ।
गते जीवे शरीरं किं श्रयते कामपि श्रियम् ? ॥ २

सा धन्या जननी या त्वां गर्भे गुणगणोत्तमम् ।
बभार रत्नगर्भेव रत्न-राशिं दधिं निधिम् ॥ ३

शम्मयः समयोऽप्येष भूरिश्रीर्भूरियं पुनः ।
यत्राम्बा त्वामसौत् प्राची यथा मार्त्तण्डमण्डलम् ॥ ४

शैशवेऽपि तवातुल्यां विश्वविश्वेऽप्यधीशताम् ।
भालमालपति स्पष्ट-मष्टमीन्दुसहोदरम् ॥ ५

भाग्यसौभाग्यलक्ष्मीभ्यां मिथो मैत्र्याय वक्रिते ।
मित्राङ्गुल्याविवाभात-स्तवास्येऽभिनवे भ्रुवौ ॥ ६

वदनस्थाः समश्रेण्या रदनास्ते समुज्ज्वलाः ।
लावण्यकमलावल्ल्या रेजुर्बीजकणा इव ॥ ७

राज्यलक्ष्मीसरोजाक्ष्याः खेलने हृदयस्थलम् ।
सुविशालचतुःशाल-लीलां ते ह्यवलम्बते ॥ ८

चापचक्रादिलक्ष्माणि भूषयन्ति कराम्बुजम् ।
भवतो जगदीशत्व-सम्पदं न वदन्ति किम् ? ॥ ९

अयमूर्ध्वमशेषाणां वर्त्तते जगतामिति ।
ख्यापयत्यूर्ध्वरेखापि तवांह्रितलभूषणम् ॥ १०

तवांह्रियुगली प्रेङ्ख-न्नखमालांशुमण्डली ।
भव्यभालेषु भातीव भद्रमाकन्दमञ्जरी ॥ ११

त्वं जगन्मण्डपव्यापि-कीर्तिवल्लीवितानकः ।
जिन ! कीर्तितकल्याण-पञ्चकश्रीरवञ्चकः ॥ १२

## ॥ श्रीजिनेन्द्रराज्यदीक्षाज्ञानावस्थात्रयप्रस्तवनः अष्टादशः स्तवः ॥

स्वर्गानुकारधरभूनगरावतारे
पुण्यावतारसमये स महस्तवाऽभूत् ।
यद्वीक्षणश्रवणपुण्यबलेन जीवा
पारीणतां शिवपुरीसरणौ श्रयन्ति ॥ १

तव वार्षिकदानेन मुक्ता अप्यालयेऽर्थिनाम् ।
कीर्णाऽभवद्यशोवल्ल्या रेजुर्बीजकणा इव ॥ २

मूर्तिभाजेव वैराग्य-रसेन परिकर्मितम् ।
त्वां पर्यवृण्वतात्यन्तं निष्णाता विरिरङ्क्षवः ॥ ३

जगद्विडम्बनौ राग-द्वेषारी त्वयि न क्षमौ ।
स मेरुः किमु कम्प्येत कल्पा तेऽपि महाबलैः ? ॥ ४

अहो ! अम्भोधरस्येव सर्वसाधारणी क्रिया ।
परकृत्यमहो ! कर्त्तुं तव शक्तिरलौकिकी ॥ ५

छद्मस्थस्य विहारास्ते मौनस्थस्यापि शङ्कराः ।
वार्षिका इव पर्जन्या गर्जाडम्बरवर्जिताः ॥ ६

त्वयाऽसेवि तपोवह्निः कर्मेन्धनदिधक्षया ।
सिक्तः शमरसैः स्नेह-पूरैरिव मनोहरैः ॥ ७

स्वान्यकर्माण्यशर्माणि त्यक्तसीमान्युदीयुषा ।
त्वयैव ध्वंसमायान्ति तमांसीव विवस्वता ॥ ८

रमयेव रमाकान्तः पौलोम्येव दिवस्पतिः ।
रत्येव च कलाकेलि-र्भासि त्वं केवलश्रिया ॥ ९

नाऽभूत् तवान्तरोद्योतः केवलं केवलश्रिया ।
किन्तु विश्वत्रयेऽप्यासीद् ध्वंसीकृततमोऽसुखः ॥ १०

तव सूरिकदम्बकीर्तिताऽप्रतिमश्रीर्जिन ! कीर्तिकामिनी ।
जगतीजनसङ्गतापि यद् विशदा सोऽप्यनुभाव एव ते ॥ ११

## ॥ श्रीजिनेन्द्रज्ञानावस्थाप्रातिहार्यश्रीवर्णनः एकोनविंशः स्तवः ॥

भक्तिप्रथाभिनवमानवमुक्तिमार्ग-
प्रद्योतनैकतरणिं तरणिं भवाब्धौ ।
कल्पद्रुमस्य करणिं सरणिं दयालु
भावामृतस्य नुतिवर्त्मनि वर्त्तये त्वाम् ॥ १

स्वर्मणिः केवलज्ञानं यदि ते हृदि वर्त्तते ।
तदा सर्वार्थसंसिद्धिः सुसाध्या स्यात् कथं न ते ? ॥ २

तेजोऽस्तद्वादशार्कं त्वां ज्ञापयंन्निव भूतले ।
स द्वादशगुणश्चैत्य-द्रुमो भाति तवोपरि ॥ ३

आयोजनं भवद्वाणी-स्पर्द्धयेव सुमव्रजः ।
विस्तृतोऽभात्सुरैः कीर्णो जानुदघ्नो स्थितौ तव ॥ ४

तव दिव्यो ध्वनिर्व्याख्या-ध्वनिध्वनितसर्वदिग् ।
पीतोऽनन्यमनोवृत्त्या नरतिर्यक्सुराऽसुरैः ॥ ५

तीर्थकृत्कमलाकेलि-कमलैर्धवलैरिव ।
चामरैस्त्वमभाः स्मेरा-मरालीकरचालितैः ॥ ६

कमनीयचतुःसिंहा-सनी ते काञ्चनी बभौ ।
भवल्लम्भात् प्रभादम्भा-द्वर्षन्ती मूर्तिमन्मुदम् ॥ ७

बभौ भामण्डलं व्याख्या-भूमण्डलगतस्य ते ।
अमादिवान्तः प्रसृतं ज्ञानज्योतिस्तनोर्बहिः ॥ ८

नभो दुन्दुभयो नादै-र्नादयन्तो दिवौकसाम् ।
विश्वे स्वामी त्वमेवासि सदेत्युद्घोषयन्ति किम् ? ॥ ९

निवर्तितमिवावर्त्त्यं कीर्तिव्रातं स्मरारिजम् ।
शीर्षे श्वेतातपत्राणां त्रितयं राजते स्म ते ॥ १०

सहस्रयोजनोच्छ्राया-श्चत्वारोऽग्रे महाध्वजाः ।
स्वकिङ्किणीरणत्कारैर्गायन्ति स्मेव ते गुणान् ॥ ११

मूर्तिमत्केवलज्ञानं धर्मचक्रमिषात्तव ।
किं हत्वाऽन्तस्तमो बाह्यं तन्निहन्तुं बहिः स्थितम् ? ॥ १२

प्रातिहार्यविहितामितहर्षं त्वामिति स्तुतिवराध्वनि नीत्वा ।
प्रार्थये वृजिनहृज्जिन ! कीर्त्ति-स्फूर्त्तिमच्छिवरमाद्भुतसौख्यम्॥ १३

## ॥ श्रीजिनेन्द्रज्ञानावस्थातिशयपरम्परावर्णनो नाम विंशतितमः स्तवः ॥

आनन्दिवृन्दारकवृन्दवन्द्य-पादारविन्दं शुभवल्लिकन्दम् ।
स्तुवेऽनुवेलं परभागवन्तं भक्त्या प्रभोऽनन्तमुदे भवन्तम् ॥ १

प्राकारत्रितयेनापि प्राकरः स्वातिरेकतः ।
विज्ञायेव धृतो मूर्ध्ना भवानीश ! विवेकतः ॥ २

सर्वाङ्गस्फारशृङ्गार-भासुरीकृतदिग्मुखः ।
सुवर्णासनमारूढः पूर्वाचलमिवांशुमान् ॥ ३

चतुर्मुखश्चतूरूप-श्चतुःकर्मक्षयङ्करः ।
चतुर्थार्थे चतुर्धर्म-भेदवादी जय प्रभो ! ॥ ४

कचश्मश्रुनखानां चा-प्रवृद्धिस्त्वयि दीक्षिते ।
ध्वान्तानामिवोलूकानां सहस्रांशावुदीयुषि ॥ ५

गन्धाम्बुवर्षणं देवै-स्त्वामाश्रित्य कृतं मुहुः ।
पञ्चवर्णप्रसूनानां वृष्टिश्च स्तुतिपूर्वकम् ॥ ६

अवाद्यमानवाद्यानि कोटिशो गगने स्फुटम् ।
शब्दायन्ते किमाख्यान्ति तव विश्वजनीनताम् ? ॥ ७

भवतो निकटं कोटि-रमर्त्यानां जघन्यतः ।
भजते दीप्रदीपाना-मिव दीपालिकादिनम् ॥ ८

नवानि नव पद्मानि सौवर्णान्याश्रिताऽत्र ते ।
पदश्रीः पद्मवासायाः किमन्वर्थमदीदृशत् ? ॥ ९

अकाले फलिता वृक्षा दक्षा इव नमन्त्यहो ! ।
मुदा प्रदक्षिणीयन्ति पक्षिणस्त्वां पथीक्षणात् ॥ १०

परित्यज्याऽमनोज्ञत्वं शब्दाद्या विषयास्समे ।
भजन्ते कमनीयत्वं पुरस्ते भाक्तिका इव ॥ ११

कल्पद्रुमा इवारामा स्वस्वकालानतिक्रमात् ।
स पुष्पफलदा यत्र सौख्यदा ऋतवोऽप्यमी ॥ (यु.) १२

यदि वा-तवेवैकान्तभक्तानां न विकारकराः क्वचित् ।
आद्यान्त्यार्थोपयोगित्त्वा-द्विषयास्तूपकुर्वते ॥ १३

तवाचारेण मोदैक-हेतवोऽत्र न कुर्वते ।
रागद्वेषोदयं क्वापि ऋतवः साधवो न किम् ? ॥ (यु.) १४

वातोऽनुकूलतां याति कण्टकाः स्युरधोमुखाः ।
एवं तेऽतिशया रेजु-र्दैव्या एकोनविंशतिः ॥ १५

इत्यतिशीतिपरम्परयाऽहं श्रीजिन ! कीर्तितमत्रभवन्तम् ।
नो भुवि राज्यरमामभियाचे किन्तु परार्थपराऽक्षयसौख्यम् ॥१६

## ॥ श्रीजिनेन्द्रसहज-घातिकर्मक्षयजाऽतिशयवर्णनः एकविंशः स्तवः ॥

आनन्दसुन्दरपुरन्दरमौलिरत्न-
ज्योतिस्सपत्नरुचिरद्युतिमेदुरश्रीः ।
प्रेङ्खन्नखालिरवहेलितहेलिकान्तिः
शान्तिच्छटेव तव राजति पादपद्मे ॥ १

तव नीरोगता देहे रूपगन्धौ तथाऽद्भुतौ ।
मलस्वेदोज्झितत्वं च शिरोजालिरलिप्रभा ॥ २

श्वासः पद्मोल्लसद्गन्धो रुचिरं रुधिरामिषम् ।
गोक्षीरधवलं सर्प-सौरभातिशायान्वितम् ॥ ३

भवदाहारनीहार-विधिर्नृणामचाक्षुषः ।
एवं ते सहजं सिद्ध-मतिशीतिचतुष्टयम् ॥ ४

क्षेत्रे योजनमात्रेऽपि नरतिर्यक्सुधाभुजाम् ।
कोटिकोटेरवस्थान-मव्याबाधं पुरस्तव ॥ ५

नरतिर्यक्सुरेन्द्राणां भाषासंवादिनी तव ।
सर्वाङ्गिसंशयापघ्नी भाति योजनगामिनी ॥ ६

निरस्तसकलज्योतिः प्रभो ! भामण्डलं किमु ।
केवलज्योतिषो भीतं व्यापकात्पृष्ठगं तव ? ॥ ७

योजनानां शते साग्रे न स्फुरन्तीतिभीतयः ।
तपति त्वत्प्रतापेऽत्र शिवा इव दिवाकरे ॥ ८

तव प्रभावतो मारि-वैरिविघ्नपरम्परा ।
विलीयते महावाता-दिवादभ्राऽभ्रमण्डली ॥ ९

यत्र यत्र विहारस्ते क्षुद्रोपद्रवनाशिनः ।
दुर्भिक्षं न भवेत्तत्र दुःस्वप्नमिव धर्मिणि ॥ १०

नातिवृष्टिरवृष्टिश्च न च स्वपरचक्रभीः ।
घातिकर्मक्षयादेका-दशेत्यतिशयास्तव ॥ ११

अतिशीतिरमासमागमा-दुचिता ते पुरुषोत्तमाभिधा ।
श्रितकेवलसंविदम्बुधे-र्जिन ! कीर्त्तिव्रजपाविताऽवने ! ॥ १२

## ॥ श्रीजिनेन्द्रगुणातिशयवर्णनो द्वाविंशः स्तवः ॥

विश्वे स्वदर्शनविनिर्मितमङ्गलौघा
रत्नारुणांशुभररञ्जितनम्रसङ्घाः ।
नश्यत्तमाः क्रमनखावलिरुज्ज्वला ते
धर्मश्रियां जयति दर्पणधोरणीव ॥ १

तवामृतकरस्याप्तौ धर्मो नैःस्व्येऽपि दीप्यते ।
नाऽत्र वर्द्धेत पाथोधि-र्भीष्मग्रीष्मागमेऽपि किम् ? ॥ २

क्रमेलक इव द्राक्षा-वने तावकसेवने ।
पराङ्मुखोऽत्र यः स स्यात् पापपाकातिरेकवान् ॥ ३

हेतुयुक्तिभरैः सिद्धस्त्वं परैर्न मलिन्यसे ।
रजोभिरौर्वरैर्जात्या रत्नतेजो ह्रियेत किम् ? ॥ ४

वदन्त्वन्ये हरादीनां देवत्वं तत्त्वतस्तु ते ।
अन्तरं यत्परीक्षायां बककादम्बयोरिव ॥ ५

नास्ति त्वदपरं पात्रं नेत्रप्रीतिविधायकम् ।
समृद्धे दुर्विधेऽपि त्वं तुल्यवृत्तिर्हितोऽस्ति यत् ॥ ६

पुण्यलक्ष्मीमृगाक्षीणां भूषणायेव यावकः ।
सतां त्वय्यनुरागोऽपि भाति स्फातिकरः श्रियाम् ॥ ७

धन्यः स एव विश्वे यः प्रियङ्करणदर्शन ! ।
अन्वरज्यत् भवन्मूर्तौ मालत्यामिव षट्पदः ॥ ८

यदर्जि पुण्यं जिन ! कीर्तिताप्त-
गुणाश्रयं त्वां हृदये मयाऽऽप्य ।
इति प्रभावातिशयस्तवेन
ततस्त्वमीशोऽस्तु भवे भवे मे ॥ ९

## ॥ श्रीजिनेन्द्रदानादिकोद्दीपनप्रस्तवनः त्रयोविंशः स्तवः ॥

पर्वप्रगर्वितसितांशुकरानुकारि
शीलं दुकूलमिव ये भवता हितेन ।
श्रीवीतराग ! परिचीवरितास्त एव
सौभाग्यभङ्गिमनिभामुररीकर(कुर्व)न्ति ॥ १

तवोपदेशतो जैन-शासनोन्नतिशाणया ।
धन्यः सम्यक्त्वरत्नं स्व-मुत्तेजयति सन्ततम् ॥ २

प्राप्ते त्वद्वचने विश्व-चित्तवृत्तेः पलायते ।
सङ्गतः संशयः सिंहे गुहाया इव जम्बुकः ॥ ३

दूरिते त्वन्मते नृणां मिथ्याभावो मनःस्थितेः ।
प्रादुःष्यादस्तगे भानौ गुहाया इव कौशिकः ॥ ४

पापस्त्वत्तः परं मिथ्या-भिनिवेशशताकुलम् ।
सङ्गच्छेदुरगाकीर्णं बिलमाखुरिव स्वयम् ॥ ५

देव ! त्वमेव भक्तानां सतामेवात्मनः क्षणात् ।
निःसारयसि मिथ्यात्वं सारमेयमिवाऽऽलयात् ॥ ६

प्रभूतभवसम्भूत-तापनिर्वापको भवान् ।
भव्यैः सर इवाऽऽसेव्यः कृपावारितरङ्गितः ॥ ७

भवी भवविनाशाय हृष्टस्ते कुरुते तपः ।
अत्युग्रमपि रोगीव रोगच्छेदाय भेषजम् ॥ ८

कर्मापहैरुपायैः स्या-दानन्दस्त्वदुपासिनः ।
छेदैरिव सशल्यस्य शल्योद्धारनिबन्धनैः ॥ ९

भक्तस्तव भवारण्ये शिवायोद्दीपयेत् कृती ।
मोहभीतो भवद्ध्यानं व्याघ्रभीत इवानलम् ॥ १०

नताधिराजं जिन ! कीर्त्तिराजं
विज्ञानभाजं श्रितसत्समाजम् ।
स्तुत्वेत्यनन्तं शिवशं भवन्तं
याचे वदान्यं जगदेकमान्यम् ॥ ११

## ॥ श्रीजिनेन्द्रागत्वप्रस्तवनो नाम लघुस्तवद्वितीय चतुर्विंशतिकायां चतुर्विंशः स्तवः ॥

नम्रामराधिपतिरप्रतिमातिशेष-
स्फूर्त्तिप्रमोदितजनो दितकामकन्दः ।
श्रीकेवलावगमसङ्गमसर्वलोका-
लोकावलोकनकलां भजसे त्वमीश ! ॥ १

भजेत् त्वन्नमनेनापि तथौन्नत्यं कृती यथा ।
तमीष्टे कर्म न स्प्रष्टुं मृगाङ्कमिव भूमिगः ॥ २

धन्यस्यैवाङ्गिनः स्वामिन्नहार्यं रज्यते मनः ।
रङ्गेण भवदीयेन माञ्जिष्ठेनांशुकं यथा ॥ ३

भवदाज्ञाविभङ्गेन पुण्यं सञ्चितमात्मनः ।
त्रुटत्याशु जलं पालि-भ्रंशेन सरसो यथा ॥ ४

भवच्छासनसम्बद्धः प्राणी पुण्यरसास्पदम् ।
तिष्ठेद् व्यवस्थया सेतु-बद्धसिन्धुप्रवाहवत् ॥ ५

अधन्यस्त्वन्मतं मुक्त्वा रतिं धत्तेऽन्यधर्मिणि ।
नहि पङ्कमृतेऽन्यत्र रमते शूकरः क्वचित् ॥ ६

युक्तं शुद्ध्यति नाभव्यो मिथ्यादृग् विधिनापि ते ।
किं दुग्धेनातिधौतोऽपि त्यजति श्यामतां द्विकः ! ॥ ७

विधिस्तेऽल्पोऽप्यनल्पानि सतां पापान्यपास्यति ।
नेभान् सिंहकिशोरः किं भिनत्त्यद्रीन्न किं पविः ? ॥ ८

पितेव नाथ ! पुष्णासि प्रभो ! मातेव रक्षसि ।
भ्रातेव त्वं बरीभर्षि विश्वे स्निह्यसि बन्धुवत् ॥ ९

जगत्त्रयमिदं सर्वं कृपापात्रे मतल्लिका ।
कृपालुकुञ्जरोऽसि त्वं तन्न त्वत्तोऽत्र किं हितम् ? ॥ १०

एवं प्रधानं गुणसन्निधानं स्तुत्वा भवन्तं जिन ! कीर्तिमन्तम् ।
जितारिवर्गं शमितोपसर्गं याचेऽपवर्गं स्थिरसौख्यसर्गम् ॥ ११

इति जिनपचतुर्विंशतिविततिः साहित्यशर्कराह्वाना ।
येनाऽऽस्वादि न स कथं स्वमनस्तापं समापयति ॥ १

श्रीमज्जिनकीर्त्तिगुरुक्रमकमलमरालतां मुदा कलयन् ।
स्तुतिविततिचतुर्विंशतिपरागवान् नेमिरत्नगणिः ॥ २

इति श्रीतपागच्छाधिराजसुविहितचक्रचूडामणिसूरिश्रेणि-पुरन्दर-श्रीसोमसुन्दरसूरिशिष्यपूज्यश्री जिनकीर्त्तिसूरि विनेयाणुना पं नेमिरत्नगणिना विनिर्मितायां स्तोत्रावल्यां श्रीजिनवर-लघुस्तवाधिकारे साहित्यशर्कराभिधा

**द्वितीया चतुर्विंशतिका समाप्ता ।**

## १३. ॥ जिनलघुस्तवविंशतिकाबीजकाव्यरूपायां द्वात्रिंशिकायां परमात्मवर्णनो नाम प्रथमस्तवः ॥

कर्म प्रसर्पद्धिमवद्धराभृन्मध्यात्मपद्महृदहृत्कजस्था ।
चारित्रवामोदरजातशुक्ल-ध्यानाप्तयुक्ता तव केवलश्रीः ॥ १

चारित्रचारूत्तरसाधकाश्रयात् सद्ध्याननव्यानलकुण्डमापुषः ।
श्रीकेवलज्ञान-सुवर्णपौरुषः सिद्धो हि कर्माहुतिदानतस्तव ॥२

कर्मैकचक्रस्थकुदृष्टिराधा-वेधं शुभध्यानशरेण सम्यक् ।
संसाध्य वव्रे भुवि केवलश्री-
कन्या त्वयाऽमा सुरपुष्पवृष्ट्या ॥ ३

लसच्छुभध्यानदिवाकरोदया-द्दोषागमोद्यन्मुकुलत्वमुज्झति ।
उड्डानमोहभ्रमरे विकस्वरे स्थिताऽऽत्मपद्मे तव केवलेन्दिरा ॥४

कर्माब्धिमध्यस्थितमोहशुक्ते-रन्तर्गता केवलमौक्तिकश्रीः ।
चारित्रपोतप्रतिबद्धशुद्धध्यानै-करज्ज्वाश्रयणात् त्वयाऽऽप्ता ॥५

तवेश ! सिद्धा घनकर्मविघ्न-करामरालीविनिवारकेण ।
सद्ध्यानयोगोत्तरसाधकेन श्रीकेवलज्ञाननभोगविद्या ॥ ६

विधीयमानोग्रतपोग्नितापितात्
कर्मालिमूषान्तरगात्मलोहतः ।
सद्ध्यानचूर्णेन किलापिवान् भवान्
विश्वेऽद्भुतां काञ्चनकेवलश्रियम् ॥ ७

भवोदधौ संयमवायुभाम्बुदोद्भवच्छुभध्यानरसेन सङ्गतः ।
आत्मा स्थितः कार्मणशुक्तिसम्पुटे
सूते स्म ते केवलमौक्तिकश्रियम् ॥ ८

कर्माम्बुयुक् केवलबोधदुग्धं
स्थितं गुणस्थानकपात्रमध्ये ।
सद्ध्यानचञ्च्वा प्रविवेष्य पीतं
तवात्मना तत् स कथं न हंसः ? ॥ ९

ध्यानानिलावाप्तबलस्त्वया श्रितः
कर्मैधभस्मीकरणोदितोदयः ।
प्रकाशिताऽशेषचराचरो बभौ
जाड्यापहो भास्वरकेवलानलः ॥ १०

रत्नाकरे स्वे घनकर्मभूमिं
सद्ध्यानकुद्दालबलेन लेभे ।
त्वया खनित्वा गुणरत्नतार-
तम्यातुलं केवलदेवरत्नम् ॥ ११

ध्यानप्रथाराधितकामदात्मा-
मरप्रसादाप्तवरो जयाऽर्हन् ।
त्वं केवलश्रीवरकामधेनु-
प्रभावलब्धाऽभिमतार्थसार्थः ॥ १२

चारित्रवृत्त्या विहितान्यरक्षो-
वरेण्यकारुण्यवसन्तदीप्तः ।
सद्ध्यानवातेन च केवलश्री-
फलोदयो भाति तवात्मकल्पः ॥ १३

कर्माब्धिमध्यस्थितिनष्टरूपः
सद्ध्यानपोताधिगमेन सिद्धः ।
लब्ध्वाखिलार्थस्तव केवलैक-
श्रीदक्षिणावर्त्तविशालशङ्खः ॥ १४

सकर्म सौवात्मदधिव्रजं त्वं
सद्ध्यानमन्थानकमादधानः ।
विलोड्य भास्वद्गुणगोलिकायां
श्रीकेवलभक्षणपिण्डमाप्तः ॥ १५

ज्ञानप्रदीपप्रकटप्रकाशो
रुद्धाऽऽश्रवश्चेन्द्रियनिर्जयेन ।
कर्मैकपुञ्जं तपसा विशोध्य
शुद्धात्मसौधः सुखितस्त्वमेव ॥ १६

अदभ्रकर्माभ्रभरापकर्षं
तपःप्रकर्षप्रबलानिलेन ।
वितन्वतः शुद्धविधेरनन्त-
प्रकाशशाली तव केवलार्कः ॥ १७

निर्मथ्य कर्माम्बुनिधिं विशुद्ध-ध्यानप्रसर्पत्कनकाचलेन ।
मनोहरा निर्मलकेवलश्रीस्त्वयोपयेमे पुरुषोत्तमेन ॥ १८

जितेन्द्रियत्वस्फुररक्षितात्मा सुशीलवाहाधिगतोऽरिचक्रम् ।
तपःकृपाणेन निहत्य विश्वे जयश्रियं त्वं वृणुषे प्रवीर ! ॥ १९

ध्यानानलोत्सारितकर्मकिट्टं
स्वमात्मदर्शं तपसातिघृष्टम् ।
उत्तेज्य साम्येन च तत्र विश्वं
सङ्क्रान्तमालोकितवान् जिनत्वम् ॥ २०

कर्मावनिमध्यगपुण्यराशि-
सुवर्णशैलोपरिभागभाजि ।
तेजः स्फुरत्केवलचूलिकायां
प्राप्तोऽसि सद्ध्यानविमानयोगात् ॥ २१

सद्ध्याननालप्रसरेण मुक्त-
कर्मैकपङ्कं जडभावसङ्गम् ।
हित्वा स्फुटं केवलकेसराढ्यं
हंसेन भुक्तं भवताऽऽत्मपद्मम् ॥ २२

आत्मा लसत्कर्ममलाविलाङ्गः
सुध्यानशुद्धोदकमध्यधौतः ।
सत्केवलौज्ज्वल्यधरो विभूषां
सदंशुकश्रीस्तव किं न दत्ते ? ॥ २३

स्वान्यप्रकाशस्तव घातिकर्म-
ध्वान्तव्रजध्वंसनबद्धकक्षः ।
मोहोच्चयं स्नेहमयं निपीया-
प्यनश्वरः केवलनव्यदीपः ॥ २४

स्फुरत्तपःपावकयोगतप्तः
सदोल्लसत्कर्ममृदो वियुक्तः ।
भवान् शुभध्यानरसैकरूपो
निस्तुल्यकल्याणमयोऽजनिष्ट ॥ २५

प्रभुज्य चारित्रलसन्मनोभू-
दयेन कर्मस्थितिपङ्कजाक्षीम् ।
सद्ध्यानवीर्योदयजातगर्भान्
मुक्तः सुतस्तेऽजनि केवलात्मा ॥ २६

क्षुण्णस्तपोभिश्चरणाम्बरेण
पूतः पृथक्कर्मतुषस्तवात्मा ।
सत्केवलश्रीसमितैकरूपः
प्राज्यः सिताप्तः परमोदकोऽभूत् ॥ २७

कर्मालिपङ्काष्टकलेपमग्नः
सुसंवरौघप्रसरेण धौतः ।
तुम्बस्वरूपस्तव केवलात्मा
तीर्णो भवाब्धेः परतारकश्च ॥ २८

चारित्रसद्ध्यानबलप्रयुक्त्या
प्रभूतकर्मारणिदारुघर्षात् ।
तव प्रसूतोऽतुलकेवलात्मा-
ऽनलो नवीनः स्वपरप्रकाशो ॥ २९

ध्यानसत्कतकचूर्णयोगतः प्रोल्लसद्विमलकेवलामृतः ।
देशनैकरसदानतोऽङ्गिनां त्वं तृषापनयनक्षमो ध्रुवम् ॥ ३०

ध्यानदैवतवरप्रसादतः
कर्मकूपपतितं मनोहरम् ।
केवलामृतभृतं शुभान्वितं
स्वात्मकामघटमापिवान् भवान् ॥ ३१

स्फुरत्कर्मरात्रौ लसन्मोहराहू-
परागाच्छुभध्यानचारेण मुक्तः ।
सदा केवलश्रीयुतः क्षीणविघ्न-
स्तवात्मासुधांशुर्नवस्त्यक्तदोषः ॥ ३२

शुद्धध्यानस्पर्शोपलेन दीव्यत्तपोग्निना तप्तः ।
सदयःस्थितिरपि भास्वन्निर्मलकल्याणतां धत्से ॥ ३३

एवं प्रोद्यदगण्यपुण्यवचनप्राज्यामृतासारतो
निर्विघ्नं भवतोऽम्बुदादिव विभो ! श्रीपुष्करावर्त्ततः ।
शान्ते कर्म्मधराऽतिघर्मनिकरे स्तोत्रैकबीजं मम
क्षेत्रे प्राग् जिनकीर्तितां प्रथयताच्छस्यश्रियं सिद्धिगाम् ॥ ३४

**॥ श्रीजिनेन्द्रस्तुतिफलाविसंवादित्ववर्णनो नाम**
**लघुस्तवतृतीयचतुर्विंशतिकायां प्रथमः स्तवः ॥**

कर्मप्रसर्पद्हिमवद्धराभृन्-मध्यात्मपद्महृदहृत्कजस्था ।
चारित्रवामोदरजातशुक्ल-ध्यानप्रयुक्ता तव केवलश्रीः ॥ १

रसज्ञां कृतिनामेव रसज्ञां त्वद्गुणस्तुतेः ।
वादयेद्भक्तिरागस्ते वैणिको वल्लकीमिव ॥ २

वास्तवं स्तवनं ते यः पठेदकठिनोक्तिभिः ।
पादयोस्तस्य विद्विष्टा लुठन्ति कठिना अपि ॥ ३

स एव भुवने श्लाघ्यो यः प्रादुष्कुरुते मुदा ।
भवदीयस्तुतिं दूती-मिव मुक्तिमृगीदृशः ॥ ४

त्वामुपश्लोकयन् भूम्ना हर्षसांराविणं सृजेत् ।
बिसरः स्मेरनेत्राणां नृणां विस्मयतो न कः ? ॥ ५

भवद्भक्तिलतोल्लासे वारिदामास यः सदा ।
सुलभं तस्य सत्कर्म कार्मणं सर्वशर्मणाम् ॥ ६

स्वर्गापवर्गदः सेव्यस्त्वमेव भुवने सताम् ।
निर्णीतसत्फले हेतौ नाऽऽलसः स्यादबालिशः ॥ ७

स मुक्तिमन्दिरे प्राप्तो यः स्तुतिं तेऽवलम्बते ।
दुरुत्तारभवावार-पारतारतरीमिव ॥ ८

इति ते जिन ! कीर्तिशालिनो विलसत्यां शुभसंस्तुतौ श्रियः ।
कृतिनं प्रति यान्ति मेदुराः सरितः प्रावृषि वारिधिं यथा ॥ ९

**॥ श्रीजिनेन्द्रप्रभावातिशयवर्णनो नाम द्वितीयः स्तवः ॥**

चारित्रचारूत्तरसाधकाऽऽश्रयात्
सद्ध्यान नव्यानलकुण्डमापुषः ।
श्रीकेवलज्ञानसुवर्णपौरुषः
सिद्धो हि कर्माहुतिदानतस्तव ॥ १

युक्तं भवेत् पराभूतिस्त्वत्तो भक्तेतराङ्गिनाम् ।
सन्माने वाऽपमाने वा सन्तो हि समवृत्तयः ॥ २

त्वां निरूपयतो जातो रोमाञ्चच्छद्मनाऽङ्गिनाम् ।
ये पुण्यस्वर्द्रुमाङ्कुरा महोदयफला हि ते ॥ ३

प्रभो ! त्वय्यदृढः पुण्यं सञ्चिनोति कुतः पुमान् ।
भूयोऽपि स्थापितं सूर्पे पानीयं किमु तिष्ठति ? ॥ ४

गते त्वद्विषये भावे पुंसां यान्ति महोभराः ।
तपनेऽस्तं प्रयाते हि स्फुरन्ति किरणाः किमु ? ॥ ५

त्वन्मतात् त्रिजगत्युच्चात् पातो मूढस्य साम्प्रतः ।
निम्नमार्गानुगामित्वं द्रवस्यापि जडस्य हि ॥ ६

सुधीर्जागरिता यस्य सुभगङ्करणे त्वयि ।
श्रियस्तमुपतिष्ठन्ते महाम्भोधिमिवापगाः ॥ ७

यस्यात्मा मीनवल्लीनो नाथाऽमृतमये त्वयि ।
अजरामरता तस्य यौक्तिकी जायते प्रभो ! ॥ ८

इतीश ! ते जिनकीर्तिलक्ष्मीपयोरुहाक्षी रभसा सरागम् ।
येन स्वकण्ठे परिरभ्यतेऽत्र सौख्यैकसिद्धि स भजेत युक्तम्॥ ९

**॥ श्रीजिनेन्द्रभावैकाग्रताफलवर्णनो नाम तृतीयस्तवः ॥**

कर्मैकचक्रस्थकुदृष्टिराधा-
वेधं शुभध्यानशरेण सम्यक् ।
संसाध्य वव्रे भुवि केवलश्री-
कन्या त्वयाऽमा सुरपुष्पवृष्ट्या ॥ १

सदाऽभीष्टं ददानं ते पादाब्जं नेमुषां मुदा ।
निषेवन्ते न के वृक्षं पक्षिणः फलितं यथा ? ॥ २

पापः शुभोपदेशेऽपि न जह्यात् त्वय्यनादरम् ।
प्रयासेऽपि शुनः पुच्छं नहि मुञ्चति वक्रताम् ॥ ३

तवाऽऽज्ञया गुणप्राप्तेर्जैनाः स्युर्जगदर्चिताः ।
मानाय यदमानाय गुणा न तु कुलादिकम् ॥ ४

जन्तूनां यद्दिनं शून्यं भवतो वरिवस्यया ।
तदजागलजोरोज-समानं निष्फलं प्रभो ! ॥ ५

जनो येनावनौ स्थाणु-निखात इव जायते ।
तं मानं त्वत्प्रणामो मे क्षेप्ता तूलमिवानिलः ॥ ६

कर्पूरेणेव भूरेणु-पूरेणैव विशेषयन् ।
स्वभालं भाग्यवानेव नमँस्त्वां नमयत्यघम् ॥ ७

त्वयि पापापहे जाते ममाऽलं परसेवया ।
किमनामयकायस्य क्रियते हि प्रतिक्रिया ? ॥ ८

पापापहो भवद्भावः स्वाधीनोऽपि न पापिनि ।
सर्वं प्रतीपतामेति प्रतिकूले हि कर्मणि ॥ ९

सर्वं मेऽजनि चेद्भाव-स्त्वय्याश्रयतया स्थितः ।
शरण्यः पुण्यवान् किं न यतः स्युः सम्पदः समाः ॥ १०

इति ते जिन ! कीर्तिविस्फुरत्-सुरवल्लीमवलम्बतेऽत्र यः ।
निजकामितसम्पदाप्तितः प्रभुता तस्य जगत्त्रयेऽद्भुता ॥ ११

**॥ श्रीजिनेन्द्रक्रममहिमवर्णनो नाम चतुर्थः स्तवः ॥**

लसच्छुभध्यानदिवाकरोदयाद्
दोषागमोद्यन्मुकुलत्वमुज्झति ।
उड्डीनमोहभ्रमरे विकस्वरे
स्थिताऽऽत्मपद्मे तव केवलेन्दिरा ॥ १

भवितव्यमिवात्मीयं मूर्त्तं स्फीतसुखावहम् ।
पादारविन्दमालोक्या-नुवेलं ते स्तुवे मुदा ॥ २

करक्रमनखज्योतिः पङ्क्तयोऽपि विभान्ति ते ।
दीपिका इव दीप्राः स-न्मुक्तिमार्गप्रकाशने ॥ ३

रोगिणामपि ते पाद-जलेन सुषमा तनोः ।
वल्ल्या दवाग्निदग्धाया इव नव्याम्बुयोगतः ॥ ४

तवांह्रीस्फारसौभाग्य-सौरभ्यरसलालसः ।
मोक्तुं नैव प्रगल्भेऽहं द्विरेफ इव वारिजम् ॥ ५

तवांह्रिदर्शनोद्भूतं प्रसादं हृदये सताम् ।
स्तुतिः प्रसृत्वरी दुग्धं शर्करेव विशेषयेत् ॥ ६

विवेकी वन्दमानस्ते क्रमाब्जं भूमिरेणुना ।
शिरस्तिलकितं तन्वन् स्तवीति नतिवामनः ॥ ७

धन्यास्ते येऽनुमोदन्ते त्वत्पदाराधकान् जनान् ।
वृद्धये सुकृताम्भोधेः कौमुदी ह्यनुमोदना ॥ ८

भविनां वदने विलासिनी सृजतीयं युवतीव निर्वृतिम् ।
इति कैः स्तुतिरिष्यते न ते जिन ! कीर्त्तिद्युतिसिद्धिदायिनी ॥९

**॥ श्रीजिनेन्द्रप्रार्थनास्तुतिप्रस्तवनो नाम पञ्चमः स्तवः ॥**

कर्माब्धिमध्यस्थितमोहशुक्तेरन्तर्गता केवलमौक्तिकश्रीः ।
चारित्रपोतप्रतिबद्धशुद्धध्यानैकरज्ज्वाश्रयणात्त्वयाऽऽप्ता ॥ १

दक्षत्वं च क्षमां येन कषायाः शुभमाश्रयम् ।
उपद्रोतुमढौकन्त वृषव्याघ्रा इवोत्तमम् ॥ २

मिथ्यात्वं जहि मे येन स्यात् पुण्यमविनश्वरम् ।
दुग्धं काञ्जिकयोगेन विकारं भजते न किम् ? ॥ ३

सरागस्त्वत्परो देवो न नीरागयति श्रितम् ।
लगति प्रतिगेहे हि समीपस्थं प्रदीपनम् ॥ ४

प्रसन्नं वदनं शान्ते नेत्रे स्त्रीवर्जमन्तिकम् ।
मूर्तिरेव तवाख्याति भुवने वीतरागताम् ॥ ५

सर्वदेवेषु देवत्वं तवैवाख्यात्यरागता ।
कान्तिर्न किं द्युरत्नस्य मुख्यत्वं रत्नराजिषु ? ॥ ६

कस्य त्वद्दर्शनान्नैव गरुत्मद्दर्शनादिव ।
कर्मपाशा विशीर्यन्ते नागपाशा इवाऽभितः ॥ ७

पापेन यद्दुरापोऽपि मयाऽऽप्तस्त्वं द्युरत्नवत् ।
तन्नूनमद्भुतैर्भाग्यैः फलितं मे पचेलिमैः ॥ ८

मम त्वं परमं तीर्थं मम त्वं मङ्गलं परम् ।
त्वं मे बन्धुरसम्बन्धस्त्वं मे मित्रमकृत्रिमम् ॥ ९

दिनं तदेव सानन्दं स क्षणः क्षणकारणम् ।
यस्मिंस्तव प्रणामोर्वी-रजो मे तिलकायते ॥ १०

गानं तव श्रीजिन ! कीर्त्तिपङ्क्तेः
पानं तु ते वाक्यरसामृतस्य ।
ध्यानं पुनस्ते शमिताघनाम्न-
श्चेन्मार्गितं स्यात्सततं ममाऽऽस्ताम् ॥ ११

## ॥ श्रीजिनेन्द्रप्रार्थनास्तुतिप्रस्तवनो नाम षष्ठः स्तवः ॥

तवेश ! सिद्धा घनकर्मविघ्न-करामरालीविनिवारकेण ।
सद्ध्यानयोगोत्तरसाधकेन श्रीकेवलज्ञाननभोगविद्या ॥ १

विनयेन समं विद्या गाम्भीर्येण सहाऽऽर्जवम् ।
मन्दाक्षेण समं दाक्ष्यं शीलेन सह रूपिता ॥ २

प्रियवाचा समं दानं सम्पत्त्याऽमा विवेकिता ।
त्वत्तः सम्पद्यते नृणा-मर्थश्चिन्तामणेरिव ॥ (यु.) ३

जनता सुषमां धत्ते भवता निर्मलीकृता ।
हेम्नोऽपि घटितस्यैव जनमण्डनता यतः ॥ ४

अभुर्विश्वोपकारी त्वं त्वां च सत्कुरुते जगत् ।
इत्यन्योन्योपकारित्वा-न्न्यायस्ते वानसैंहिकः ॥ ५

दारिद्र्यमिव कल्पद्रुस्तमिस्रमिव तापनः ।
समर्थस्त्वं तथा मोहं निहन्तुं त्रिजगत्यपि ॥ ६

लक्ष्मीवतीव कार्पण्यं क्षारत्वं वारिधाविव ।
दानिवाचीव पारुष्यं कलङ्कश्च विधाविव ॥ ७

कण्टकित्वमिवाम्भोजे चण्डत्वं तरणाविव ।
आविर्भवँस्तथा मोहो मयि ध्वंस्यस्त्वयेश ! हि ॥ (यु.) ८

चैत्यकार इव स्वेन कर्मणोर्ध्वगतिस्त्वयि ।
भक्तः स्यादन्यथा कूप-कृदिवाधोगतिः पुनः ॥ ९

भवाब्धौ तरणे शक्तो मादृशोऽपि त्वदाश्रयात् ।
नभःपारीणतामेति मृगः किं नेन्दुमाश्रितः ? ॥ १०

सद्य एव दुरितारिजयेन, स्वीकृता शिवरमाऽपि मयेश ! ।
अद्य मे त्रिभुवने जिन ! कीर्तिः,
स्फूर्तिमेति यदि दृक्पथमेषि ॥ ११

॥ श्रीजिनेन्द्ररूपातिशयप्रस्तवनो नाम सप्तमः स्तवः ॥

विधीयमानोग्रतपोऽग्नितापितात् कर्मालिमूषान्तरमात्मलोहतः ।
सद्ध्यानचूर्णेन किलाऽऽपिवान् भवान्,
विश्वेऽद्भुतां काञ्चनकेवलश्रियम् ॥ १

शङ्के पङ्केरुहं त्यक्त्वा लक्ष्मीर्न्यक्षाऽपि भेजुषी ।
मुखशीतमयूखं ते सदाऽखिलकलास्पदम् ॥ २

क्षमाधरं समाकर्ण्य द्रष्टुं त्वां भ्रूशिखाद् बहिः ।
शेष एष द्विरूपोऽगादिवोद्विग्नः क्षमाधृतौ ॥ ३

नेत्राऽऽस्यगीर्गुणैस्तत्र (व) जितान्याशु गतानि किम् ? ।
जलेऽब्जं खे विधुः श्वभ्रे सुधाऽब्धौ रत्नराशयः ॥ ४

दयामौदार्यमौचित्यं कस्को नाप्नोति तेऽग्रतः ।
रत्नाकरमुपेतस्य कस्य नो रत्नसङ्ग्रहः ? ॥ ५

उच्चैः स्थितानि सौख्यानि समादातुमना इव ।
उत्पश्यन् भवतो रूपमेकतानो भवेज्जनः ॥ ६

त्वां जिनं पश्यतां नृणां विघ्नो माऽभूदिति द्रुतम् ।
किं दोषाढ्यं तमो हन्तुं सदार्कोप्युदयाद्रिगः ? ॥ ७

सतामेव मनोवृत्तिर्नूनं त्वामुपयच्छते ।
भ्रमरी मालतीपुष्पं मुक्त्वाऽन्यत्र रमेत किम् ? ॥ ८

तवांह्रिनत्या जिन ! कीर्तिप्रीत्या, गुणालिगीत्या मतमार्गभक्त्या।
नाथ ! त्वयाऽथ प्रभुणा सनाथः, संसारपाथःपतिपारमापम् ॥९

## ॥ श्रीजिनेन्द्ररूपातिशयप्रस्तवनो नाम अष्टमः स्तवः ॥

भवोदधौ संयमवायुभाम्बुदोद्भवच्छुभध्यानरसेन सङ्गतः ।
आत्मा स्थितः कार्मणशुक्तिसम्पुटे,
सूते स्म ते केवलमौक्तिकश्रियम् ॥ १

भ्रमता घोरसंसारे मया कचवरोत्करे ।
रत्नमालेव मूर्तिस्ते भाग्येनाऽदर्शि दुर्लभा ॥ २

हृदाऽऽस्यांह्रिकराऽक्षीणि स्मेराब्जानीव ते प्रभो ! ।
वीक्ष्य लक्ष्मीस्त्वदीयाङ्गं पद्माकरधियाऽऽश्रयत् ॥ ३

पार्वणेन्दुं तृणीयन्ति तव वक्त्रनिरीक्षणे ।
प्रणामे च भवाम्भोधिं गोष्पदीयन्ति कोविदाः ॥ ४

द्विरूपस्ते भूवोर्दम्भाद् दृक्सुधाकुण्डगः श्रमम् ।
छेत्तुं शेषः क्षमाभारादुद्विग्न इव निर्गतः ॥ ५

कौटिल्यं भ्रूयुगेऽभूत्तेऽनुदयो नखकेशयोः ।
लाघवं रदरोमाल्यो-र्भान्यथा (र्नान्यथा) सर्वथा पुनः ॥ ६

स्थापनाजिनरूपोऽपि त्वमुल्लासयसे जगत् ।
किमिन्दुरभ्रगर्भस्थः सागरं नोत्तरङ्गयेत् ? ॥ ७

अहो ! पुण्यैर्ममागण्यै-रुदमीलि पचेलिमैः ।
यदद्य स्वर्द्रुमः सद्यस्त्वं समासाद्यसे मया ॥ ८

एवं न कस्ते जिन ! कीर्त्तिगङ्गा-पगानघस्नानमुपेत्य भक्त्या ।
गुणस्तवस्मेरसुमार्चनेन, विश्वार्चनामर्हति सर्वदार्हन् ॥ ९

## ॥ श्रीजिनेन्द्रदुर्लभदर्शनादिसञ्जातफलप्रस्तवनो नाम नवमः स्तवः ॥

कर्माम्बुयुक्केवलबोधदुग्धं,
स्थितं गुणस्थानकपात्रमध्ये ।
सद्ध्यानचञ्च्वा प्रविवेच्य पीतं,
तवात्मना तत्स कथं न हंसः ? ॥ १

अतर्कितमुपागास्त्वं दृक्पथं मेऽद्य दुर्लभः ।
प्राचीनो मूर्तिमानेव पुण्यराशिरिवात्मनः ॥ २

जङ्गमः सुरशाखीव स्वारत्नमिव चेतनम् ।
अपशुः स्वर्गवीवाऽद्य त्वं ममैषि दृशोः पथि ॥ ३

निस्तुले त्वयि सम्बद्धं को निवर्त्तयितुं क्षमः ? ।
नेत्रद्वयं समुल्लासि लावण्याम्भःपिपासितम् ॥ ४

धिक् तमो येन पापेन वञ्चिता मे दृगान्तरी ।
नापश्यत्त्वां पुरा कुहू तमिस्रेव कलाधरम् ॥ ५

दृग् योगस्पर्द्धयेवोद्यन्मनोयोगोपि ते पुरः ।
कस्यचित्पुण्ययोगेन धन्यस्यैवैधतेऽधिकम् ॥ ६

सत्यङ्कारमिवापार-चिदानन्दश्रियां परम् ।
नमस्कारं पुमानाविष्करोति त्वत्पुरो गुरुः ॥ ७

समलोऽपि जनस्त्वत्तो भावितान्तःस्वरूपतः ।
सम्प्राप्नोति सुतारत्वमयं सिद्धरसादिव ॥ ८

इतीशतः श्रीजिन ! कीर्त्तिगानं भक्त्या प्रधानं तव यस्तनोति ।
स्वर्गापवर्गाप्तिजसौख्यलक्ष्मीर्मृगीव लीना तमुपैत्यवश्यम् ॥९

## ॥ श्रीजिनेन्द्रदर्शनादिमहाप्रभावप्रस्तवनो नाम दशमः स्तवः ॥

ध्यानानिलावाप्तबलस्त्वयाश्रितः
कर्मैधभस्मीकरणोदितोदयः ।
प्रकाशिताऽशेषचराचरो बभौ,
जाड्यापहो भास्वरकेवलानलः ॥ १

सद्यस्त्वां भाग्ययोगेन धन्यः स्फारितलोचनः ।
सर्वाङ्गसुभगं साक्षादिवेक्षेत सुरद्रुमम् ॥ २

रुद्धः कदाग्रहग्रस्तैः शूकरः कुर्कुरैरिव ।
वराकत्वेन देवाऽहं लभे न त्वां शिवास्पदम् ॥ ३

हरामि ते गुणश्रेणि-मजरामरताप्रदाम् ।
सद्योऽप्यवहितोऽद्याऽहं वैनतेयः सुधामिव ॥ ४

नमतां नौर्भवोदन्वत्तारणायाथ पारणा ।
सुधायाः पश्यतां नृणां मूर्तिः स्वस्ति श्रियेऽस्तु ते ॥ ५

नेत्रे त्वयि पवित्रे मे यदाश्मघटिते इव ।
अप्रकम्पभरे स्यातां तदात्तोऽहं शिवश्रिया ॥ ६

नोज्झति प्रतिपद्य त्वा-मरण्येऽपि वरेण्यधीः ।
सतां साधुप्रपन्नं हि व्यसनेष्वपि दुस्त्यजम् ॥ ७

रमणीयरमारामाऽऽक्रीडास्पदमिदं पदम् ।
सद्यस्तेऽद्य प्रपद्येऽहं साक्षादिव परं पदम् ॥ ८

उचितं जिन ! कीर्तिसुन्दरी, भवतः श्राम्यति जातु न क्वचित् ।
यदमन्दमनोरथाश्रिता, सततं याति जगत्त्रयेऽप्यसौ ॥ ९

## ॥ जिनेन्द्रभक्तिफलातिशयप्रस्तवनो नाम एकादशः स्तवः ॥

रत्नाकरे स्वे घनकर्मभूभिं, सद्ध्यानकुद्दालबलेन लेभे ।
त्वया खनित्वा गुणरत्नतारतम्यातुलं केवलदेवरत्नम् ॥ १

विश्वत्रयेऽपि धन्योऽसौ तवाऽऽस्योक्तानि यः पिबेत् ।
चातकोऽम्बुदमुक्ताम्बु-बिन्दूनिव पिपासितः ॥ २

कृताऽशेषविपत्पोषं (मनः) त्वन्मतदीक्षितः ।
को न दक्षो निगृह्णाति निषादीव मतङ्गजम् ? ॥ ३

स्यन्दनं तर्णक इव दुर्वहं यो वहेद् व्रतम् ।
त्वदीयाज्ञामयं देव ! सेवतेऽसौ शिवास्पदम् ॥ ४

त्वयि वामाङ्गिनामङ्गे द्वेषिणां क्षयिणामिव ।
दोषायैव चिकित्सापि न पुनर्जायते गुणः ॥ ५

यस्याज्ञातमपीक्षित्वा त्वां वैद्यमिव वत्सलम् ।
मोदते हृत् सपापोऽपि रोगीवाऽऽशु गुणास्पदम् ॥ ६

फलेच्छमस्तपो जाप-स्त्वयि भावं विना नहि ।
पाल्यमानापि धान्यश्री-रनुकूलमिवानिलम् ॥ ७

त्वयीशाऽभङ्गरङ्गस्य प्रत्यक्षसुरशाखिनः ।
स्वर्गादिसम्पदः पुष्पं कैवल्यश्रीः फलं नृणाम् ॥ ८

भवतो जिन ! कीर्तियोषितः, सौभाग्यं भुवनेऽप्यनुत्तरम् ।
यदहो ! अपमातृकाऽप्यसा-वतिशुश्रूष्यत ईश्वरैरपि ॥ ९

## ॥ श्रीजिनेन्द्रप्रार्थनाप्रस्तवनो नाम द्वादशः स्तवः ॥

ध्यानप्रथाऽऽराधितकामदात्मा-मरप्रसादाप्तवरो जयार्हन् ।
त्वं केवलश्रीवरकामधेनु-प्रभावलब्धाभिमतार्थसार्थः ॥ १

दुराचारैः परैर्मोहा-द्भक्तिर्न ज्ञायते तव ।
वैमनस्यात्स्मरासक्तै-र्धनार्जनमिव प्रभो ! ॥ २

पारावारमिवापारं संसारं स तितीर्षति ।
पुपूर्षति य एवाङ्गी तवाज्ञां तरणीमिव ॥ ३

हित्वा दुर्धर्मिणं धर्म-दुग्धविध्वंसकाञ्जिकम् ।
त्वामिष्टे योऽन्वगुस्तं माः सरस्वन्तमिवापगाः ॥ ४

मम भ्रान्तस्य लुब्धस्य स्मरस्त्वां फलदं विना ।
तृषार्त्तस्याऽध्वनीनस्य ग्रीष्मातप इवार्तिदः ॥ ५

त्वन्मताज्ञानतोऽकारि प्राक् परोपासनं मया ।
अनात्मनीनमात्मज्ञः कर्म प्रक्रमते हि कः ? ॥ ६

नैव मुञ्चति मत्पृष्ठिं राक्षसीवाविवेकता ।
इयतैव कृतं तेन यन्मे त्वं स्या विवेकदः ॥ ७

बोधिलाभकरो भूयाद्भवानभिमतप्रदः ।
भक्तिः प्रस्तररेखेव क्षीयते न यतो मम ॥ ८

मुदामरैर्निर्मितपादसेवं, देवाधिदेवं गतसंविदेवम् ।
स्तुत्वाऽहमप्यादरतो भवन्तं
वव्रेऽद्य मुक्तिं जिन ! कीर्तिमन्तम् ॥ ९

## ॥ श्रीजिनेन्द्रभक्त्यविसंवादिफलातिशयकीर्तनो नाम त्रयोदशः स्तवः ॥

चारित्रवृत्या विहितान्यरक्षो वरेण्यकारुण्यवसन्तदीप्तः ।
सद्ध्यानवातेन च केवलश्रीफलोदयो भाति तवात्मकल्पः ॥१

नानास्तवनगीतादि–वाचालितदिगन्तरः ।
जायते धन्यमूर्द्धन्यः पुरस्ते नाङ्गभृत्परः ॥ २

स्वछायामिव ते भक्तिं यः स्वामिन्नुपयच्छते ।
वृण्वते तं गुणग्रामा दातारमिव मार्गणाः ॥ ३

भक्तिरास्तां हि यो धत्ते न माध्यस्थ्यमपि त्वयि ।
कर्मणा वेष्टते स स्वं लूतेव निजलालया ॥ ४

कुशकासावलम्बेन भवाम्भोधिं तितीर्षवः ।
पोतायितं विमुच्य त्वां परे स्युर्हास्यभूमयः ॥ ५

त्वदीयाचरणोद्योत–प्रद्योतिसुदिनं जनम् ।
कल्पान्तार्कमिव द्विष्टो द्रष्टुमप्यैष्ट कोऽपि न ॥ ६

भवारण्ये कषायाग्नि–ज्वालाजालकरालिते ।
शरणं भवरीणानां भवानेवौन्नतं (वोन्नत) स्थलम् ॥ ७

आसाद्य मानुषाद्यं यो न त्वामाद्रियते मुदा ।
न मन्दो मणिमादत्ते रोहणाद्रिमवाप्य सः ॥ ८

न स्यात्ते भजनौचित्यं कर्मवर्मितदेहिनाम् ।
कौङ्कुमः किमु रागः स्या–न्नीलीभावितवाससाम् ? ॥ ९

सतां बन्धुरिवाह्नाय त्वमज्ञातोऽपि यन्मनः ।
दृष्टो मोदयसेऽधीश ! तद्भक्त्या त्वां भजे कृती ॥ १०

जिन ! कीर्तिपयोभरं तवाश्रितगुणगानसितोपलारसम् ।
सस्नेहमहो ! जगत्त्रये पिबति स्यान्नहि कः सुखैकभूः ? ॥११

## ॥ श्रीजिनेन्द्रसौभाग्याऽतिशयवर्णनो नाम चतुर्दशः स्तवः ॥

कर्माब्धिमध्यस्थितिनष्टरूपः, सद्ध्यानपोताधिगमेन सिद्धः ।
लब्धाखिलार्थस्तव केवलैकश्रीदक्षिणावर्त्तविशालशङ्खः ॥ १

तवोत्पत्तौ जनन्यादे-र्मूर्त्ता हर्षभरा इव ।
हृदयान्तरमान्तोऽगु-र्ज्योतिर्दम्भाज्जगत्त्रये ॥ २

स्वामिँस्ते वपुषा पुण्य-पुषा पापभरप्लुषा ।
दृग्मार्गमीयुषा पुंसां जन्मसाफल्यमप्रथि ॥ ३

तवाऽऽस्येन समं स्वामिन् ! धत्ते स्पर्द्धां कथं विधुः ? ।
कलाः सङ्ख्यातिगा भेजे यदिदं स तु षोडश ॥ ४

रागद्वेषोग्रमोहेश-जयोत्थयशसां चयैः ।
उज्ज्वलैरिव शीर्षस्थै-स्त्रिभिश्छत्रैर्विराजसे ॥ ५

रत्नकोटीरसङ्क्रान्त्या धृतं भक्त्येव मूर्द्धनि ।
तव पादाम्बुजं नत्वा पुरोऽसङ्ख्याः स्थिताः सुराः ॥ ६

सुरभूमिरुहौदार्य-श्रीवैहासिकवैभवः ।
क्रमस्ते भावि सङ्कल्पा-तिक्रामद्दानविक्रमः ॥ ७

हास्यं विदूषकस्येव परस्याचरणं मुहुः ।
ददाति त्वां प्रभूकृत्य स्थाष्णोः कस्य न सद्दृशः ? ॥ ८

प्रीणासि न परं सभ्यान् मुधा मधुरया गिरा ।
किन्तु कामाधिकार्थानां दानेनापि जगत्त्रयम् ॥ ९

प्राज्यं त्रैलोक्यसाम्राज्यं त्वदिति श्रुतपूर्विणः ।
धन्या एव मुहुर्नेमु-स्त्वामुपायनपाणयः ॥ १०

जिन ! कीर्तितरङ्गिणीरस-स्फुटपूरस्त्रिजगत्यनारतम् ।
वहतीति तव स्फुरद्गुणा-द्भुतगानाम्बुदवृष्टियोगतः ॥ ११

॥ **श्रीजिनेन्द्रपरदैवतान्तरदर्शनो नाम पञ्चदशः स्तवः** ॥

सकर्मसौवात्मदधिव्रजं त्वं,
सद्ध्यानमन्थानकमादधानः ।
विलोड्य भास्वद्गुणगोलिकायां,
श्रीकेवलम्रक्षणपिण्डमाप्तः ॥ १

नवीनस्वस्तरोर्भूमौ प्रतिमानमिव स्थितम् ।
बिम्बं तेऽङ्घ्रिकदम्बस्य कामं कामप्रदं सदा ॥ २

स्वामीकृतभवान् भव्यो यो धर्ममनुशीलति ।
त्रैलोक्यस्याऽप्यशेषस्य स्वामिभावं स गच्छति ॥ ३

परेषां तेऽपि यो ब्रूते रीरीहेम्नोरिवान्तरम् ।
शस्यरीतिः शरीरी स विहितेहितसाधनः ॥ ४

ज्यायसि ज्यायसी भक्ति-र्येषां रेखाञ्चिता त्वयि ।
लेखास्तेषामशेषार्थं प्रथयन्त्यर्थनां विना ॥ ५

साधोरिन्दाविवाऽऽस्ये ते दृष्टे भक्तिर्विभास्वरा ।
राकारात्रिरिवाम्भोधे-रङ्गोल्लासाय जायते ॥ ६

तव भक्तिः समिथ्यात्वे जीवे नैवावतिष्ठते ।
चिरं न वारिणः काणे घटे हि घटते स्थितिः ॥ ७

त्वयि नाथेऽत्र लब्धेऽपि परस्याऽऽसङ्गतो नृणाम् ।
सुदृक् तुषोदकस्येव क्षैरेयीव विनश्यति ॥ ८

त्वां विना दुरितध्वंस–कृते किं स्यात् पराश्रयैः ? ।
विना निदानज्ञानं हि फल्गुरेव प्रतिक्रिया ॥ ९

त्वमेव वीतरागत्वात् सर्वज्ञः सर्वकामदः ।
इति देवाधिदेवत्वं तव प्राहुर्विचक्षणाः ॥ १०

भविनामघजालसल्लकी–वनमुन्मूलितवान् भवाँश्चिरम् ।
जिन ! कीर्तिकरं करीश्वरः, परितः स्फोरयते जगत्त्रये ॥ ११

## ॥ श्री जिनेन्द्रधर्मोन्नतिहेतुकप्रभावकफलवर्णनो नाम षोडशः स्तवः ॥

ज्ञानप्रदीपप्रकटप्रकाशो रुद्धाश्रवश्चेन्द्रियनिर्जयेन ।
कर्मैकपुञ्जं तपसा विशोध्य शुद्धात्मसौधः सुखितस्त्वमेव ॥ १

धन्य एव नवीनं ते सद्म निर्मापयेद्विभो ! ।
निवासाय नवोढायाः सौवपुण्यश्रिया इव ॥ २

रम्भास्तम्भाभिरामाणि तोरणानि सृजन्कृती ।
पोतानीव भवाब्धौ ते मन्दिरे स्फुरदिन्दिरे ॥ ३

चकासे त्वत्सकासेन निःसमः सुमसञ्चयः ।
किन्तु भक्तासुमत् त्रस्तात् च्युतोऽनङ्गाच्छरोत्करः ॥ ४

साधुचित्तमिवात्युच्चं सिद्धानन्दमिवायतम् ।
सत्पुण्यमिव निष्पङ्कं कृती राति ध्वजं तव ॥ ५

प्रत्यहं क्षीयते लक्ष्मी–स्त्वत्पराश्रयिणोऽङ्गिनः ।
पीयूषांशोरिव ज्योत्स्ना कृष्णपक्षमुपेयुषः ॥ ६

भाति श्रीः सैव पुष्पौघा-च्छादितत्वं चकास्ति या ।
द्यौरिवादभ्रशुभ्राभ्र-स्थगितादित्यमण्डला ॥ ७

सतां तवार्चने पुष्प-मपि सर्वातिशायिने ।
फलाय जायते बीजं क्षेत्रेषु प्रवरेष्विव ॥ ८

तवाज्ञायामसारोऽपि दत्तोऽर्थः स्फीतसम्पदे ।
मुक्ताफलकृते शुक्तौ भवेन्मेघोदकं यथा ॥ ९

न्यायोपात्तं व्ययेद्वित्तं धन्यस्ते हि मतोन्नतौ ।
न्यासीकुर्वन्नु सुस्थान-लोभाल्लाभाभिलाषुकः ॥ १०

अद्य सत्कर्ममाकन्द-द्रुमो मञ्जरितो मम ।
फलितोऽपि च सद्योऽसौ सञ्जाते तव दर्शने ॥ ११

शमिताघभरा मनोहरा, तनुवत्ते सुरसोर्मिवर्मिता ।
जिन ! कीर्तिरनन्तगामिनी, सततं नैकजनोक्तिगीतिभिः ॥१२

## ॥ श्रीजिनेन्द्रमतोन्नतिकारक-फलातिशयवर्णनो नाम सप्तदशः स्तवः ॥

अदभ्रकर्माभ्रभरापकर्षं, तपःप्रकर्षप्रबलानिलेन ।
वितन्वतः शुद्धविधेरनन्त-प्रकाशशाली तव केवलार्कः ॥ १

त्वमेव भुवने नित्यैः प्रोद्यत्कलशमौलिभिः ।
चैत्यैर्विश्रान्तमार्तण्ड-मण्डलैरिव राजसे ॥ २

शासने निःसमाने ते दानेन धनिनां प्रभा ।
महिमानं हि धत्ते श्री-र्विवेकौदार्यभूषणा ॥ ३

वार्द्धेरिव सरिद्वारि तव मार्गगमङ्गिनाम् ।
वित्तमक्षयतामेति क्षयमुन्मार्गगं त्विदम् ॥ ४

तव क्षेत्रगमीशाऽल्पमपि स्वं वटबीजवत् ।
उत्तरोत्तरवृद्धिः स्या-दन्यथेदं स्थलाम्बुवत् ॥ ५

दानाद्यनेकधा धर्मं प्राप्तौ तेऽर्जन्ति धीधनाः ।
रत्नाकरं गतो रत्नं नादत्ते कः सचेतनः ? ॥ ६

यत्सतामक्षता सम्पत् महिमा सोऽपि तावकः ।
पङ्कजस्य हि या लक्ष्मीः स प्रभावः प्रभापतेः ॥ ७

सर्वाङ्गीणसुखाराम-प्रावृषेण्यघनागमः ।
पापतापापहः कं न मोदते तव सङ्गमः ॥ ८

भूयांसोऽपि हि जायन्ते नृखेटाः कुलपांसनाः ।
कुलदीपः स एवैको यस्तवैकोपचारकृत् ॥ ९

भव्यानां वर्द्धमानस्ते मुखस्येन्दोरिवेक्षणात् ।
हर्षो न स्खल्यते कैश्चिद् वार्द्धिपूर इव द्रूमैः ॥ १०

अद्यवज्जिन ! कीर्तिपटकं, भुवि ते नृत्यति किं सविस्मयम् ।
इति मां वितनु स्वसेवकं, परमानन्दमयो भवामि यत् ॥ ११

**॥ श्रीजिनेन्द्रहितविज्ञप्तिप्रस्तवनो नाम अष्टादशः स्तवः॥**

निर्मथ्य कर्माम्बुनिधिं विशुद्ध-ध्यानप्रसर्पत्कनकाचलेन ।
मनोहरा निर्मलकेवलश्री-स्त्वयोपयेमे पुरुषोत्तमेन ॥ १

लावण्यागण्यमाधुर्यां वीप्सां पीयूषसम्पदः ।
पात्रीकुर्वन्ति मूर्त्तिं ते मच्चारित्राः स्वनेत्रयोः ॥ २

ऋते त्वां मन्मनोवृत्ते-र्भवदावसमुद्भवम् ।
को निर्वापयिता ताप-मवन्या इव वारिदम् ? ॥ ३

शीतीभावमितोऽपि त्वं पिनष्टि प्रौढमप्यघम् ।
सुशीतमपि किं नाम्बु शैलं स्फोटयते स्फुटम् ? ॥ ४

त्वद्वैरादिव ते भक्तं मोहो मां हन्ति तं जहि ।
मन्दायन्ते हि नापद्भ्यः परमुद्धर्त्तुमुत्तमाः ॥ ५

अज्ञानं हंसि चेन्मे त-द्धता मोहादयोऽरयः ।
यदग्निः शुष्कसंसर्गाद् दहत्यार्द्रमपि क्षणात् ॥ ६

भजामि विषयग्रामं विहाय त्वामहं हि यत् ।
तन्मुक्त्वाऽऽखुरिव स्वौकः सर्पाकीर्णं महाबिलम् ॥ ७

ममैहिकसुखेनालं विपाके दुःखदायिना ।
सुवर्णेनापि किं तेन कर्णच्छेदो भवेद् यतः ? ॥ ८

त्वयीश ! भक्तियोगेन तितीर्षामि भवार्णवम् ।
पक्षीव पक्षयोगेन विगतालम्बमम्बरम् ॥ ९

नौषधीभिर्न भैषज्यै-र्न चूर्णैर्नापि चाञ्जनैः ।
न मन्त्रैर्नहि यन्त्रैर्यः कर्माऽऽमः सोऽस्यते त्वया ॥ १०

या माता यः पिता विश्वे यः स्वामी यश्च बान्धवः ।
हितोऽस्येभ्योऽपि सर्वेभ्य-स्तत्त्वं नाथीकृतो मया ॥ ११

भवतो जिन ! कीर्तिरुज्ज्वला, सर्वत्राऽक्षयतां गता यतः ।
तेन श्रितवत्सलो भवान्, शरणं मे भवताद् भवे भवे ॥ १२

## ॥ श्रीजिनेन्द्रमतैकान्तताफलातिशयवर्णनो नाम एकोनविंशः स्तवः ॥

जितेन्द्रियत्वस्फररक्षितात्मा, सुशीलवाहाधिगतोऽरिचक्रम् ।
तपःकृपाणेन निहत्य विश्वे, जयश्रियं त्वं वृणुषे प्रवीर ! ॥ १

मोहेनाऽहं त्वयीशेऽपि पातितः पातकैधसि ।
तद्दग्धो दहनेनेव स्मरेणाहं तवो (तो) ऽव माम् ॥ २

मोहारिध्वंसि यन्मेऽद्य त्वं ददासि स्वदर्शनम् ।
ततः सर्वस्वदानेऽपि नाऽपर्णः स्यामहं तव ॥ ३

मित्रं त्वां सङ्गतः पुण्यो-ज्ज्वलपक्षाश्रयाज्जनः ।
श्रियमिन्दुरिवाप्नोति गतामपि शुभायतिः ॥ ४

मुष्णाति त्वन्मतैकस्वं मां प्रमादो विमोहितम् ।
स्वर्णकार इव स्वर्ण-रक्षं व्याक्षिप्तचेतसम् ॥ ५

ग्रसेन्नैव प्रमादोऽपि त्वन्मतैकान्तताश्रितम् ।
सैंहिकेय इवेशाना-भ्यर्णभाजं सुधाकरम् ॥ ६

भव्यस्त्वज्ज्ञानमात्रेण न सिद्ध्येत्त्वद्विधिं विना ।
न ह्यौषधैकबोधेन सामयः स्यादनामयः ॥ ७

कार्या लज्जापि नान्येभ्यः स्वार्थाय त्वत्क्रियाकृता ।
शिरः प्रावरणं युक्तं किं प्रवृत्तस्य नर्त्तितुम् ? ॥ ८

त्वद्विध्याच्छादितो नाथाऽभव्योऽप्युच्चैः श्रियं श्रयेत् ।
किं नार्घेत्कागदान्तर्द्धि-जीर्णमप्यट्टकर्पटम् ॥ ९

ससारो वासरोऽपीश ! शर्वरी साप्युदित्वरी ।
भवन्तं यत्र वन्देऽहं चञ्चद्रोमाञ्चकञ्चुकः ॥ १०

प्रभया जिन ! कीर्त्तिराशु ताराप्य-
सकृत्तेऽत्र विधुं विजेजिते यत् ।
जगदीश ! तवैव सोऽनुभावः
श्रयणाद्वै महतां न किं सुसाधम् ? ॥ ११

## ॥ श्रीजिनेन्द्रभक्तिफलातिशयवर्णनो नाम विंशतितमः स्तवः ॥

ध्यानानलोत्सारितकर्मकिट्टं,
स्वमात्मदर्शं तपसातिघृष्टम् ।
उत्तेज्य साम्येन च तत्र विश्वं,
सङ्क्रान्तमालोकितवान् जिन ! त्वम् ॥ १

कला हि सफला सैव या धर्मस्योपयोगिनी ।
त्वया दयालुनादिष्टो धर्मः प्रष्ठो हि विष्टपे ॥ २

भुजिष्यामि मुहुर्दिष्ट्या विष्टपाभीष्टदे त्वयि ।
किमु प्रत्ययितोपाये मन्दायन्ते हितेच्छवः ? ॥ ३

भास्वद् घनागमोऽसि त्वं युक्तं यत्ते गिरां भरः ।
भक्तिवल्लिसमुल्लासे वारिदामासिवान् सदा ॥ ४

स्यादुद्यापनिकोद्यानं द्वेषद्विपनिषादिनः ।
रागराजस्य संसार-पुरे प्राणी त्वयोज्झितः ॥ ५

कृताशेषविपत्पोषं द्वेषं त्वन्मतदीक्षितः ।
को न दक्षो निगृह्णाति निषादीव मतङ्गजम् ? ॥ ६

सरसीव मते क्रीडँ-स्तवाऽसौ धन्यकुञ्जरः ।
दिशो दिश्यघसङ्घात-पद्मखण्डमिव क्षिपेत् ॥ ७

गुणौघसेनयोन्मत्तो विवेकगुणनायकः ।
त्वद्भक्ते रमतेऽरण्ये सयूथ इव हस्तिराट् ॥ ८

पृथुपाथोनिधेः पाथो-भरैः पृथ्वीव वेष्टिता ।
स्फारैः प्रभावपूरैस्ते भक्तिः स्वापा कृपावता ॥ ९

धेनुः कामगवीव त्व-द्भक्तिः कामितकामधुक् ।
यः समाश्रयते कामं स रमा परमाऽऽस्पदम् ॥ १०

जिन ! कीर्त्तिरसौ गुणस्तवं ते,
स्फुटमङ्गीकुरुते ततस्त्रिलोके ।
निजपतिसहचारिणी सदा सा,
गदिता विश्वजनैः सतीति युक्तम् ॥ ११

## ॥ श्री जिनेन्द्रभक्तिप्रसूताऽनेकगुणातिरेकवर्णनो नाम एकविंशः स्तवः ॥

कर्मावनीमध्यगपुण्यराशि-सुवर्णशैलोपरिभागभाजि ।
तेजः स्फुरत्केवलचूलिकायां,
प्राप्तोऽसि सद्ध्यानविमानयोगात् ॥ १

तव लम्भेऽप्यनादृत्या-धोगतिर्जातिबोधतः ।
को न घर्षेत् करावक्ष-द्यूतेऽक्षान् पातयन्निव ॥ २

दुर्लम्भं रत्नमप्रत्नं विदूरगिरिभूरिव ।
प्रसूते भवतो भक्तिः सत्पुण्यं सुषमावहम् ॥ ३

भोगिभोगैरिवैभिर्मे भोगैरलमतः परम् ।
इति भावाद्भवच्छिक्षा-श्रितो दीक्षां श्रयेत्कृती ॥ ४

यः प्रद्युम्न इवासक्त-स्त्वद्दीक्षाङ्गनया समम् ।
प्रकामं रमते स स्यात् सद्यः सन्मोक्षनन्दनः ॥ ५

त्वां स्तुवन् स्तावयन्नन्या-नज्ञानान् यः प्रतिस्वनैः ।
मुदमुद्भावयेच्चित्ते सदा स्यान्न स दास्यकृत् ॥ ६

मूर्त्तिं तवामलां पुष्पा-लङ्कारेऽप्यपसारिते ।
धन्य एवाब्दनिर्मुक्ता-मिन्दुलेखामिवेक्षते ॥ ७

त्वं मे भावः प्रणामश्च त्रिवेणीसङ्गमो ह्ययम् ।
भाग्ययोगेन केनापि ममाऽद्य समपद्यत ॥ ८

ऊररीकुरुते गुणस्तवं ते,
भुवने निर्निभभाग्यसम्पदेषा ।
निजपत्यनुगामिनी ततः साऽजनि
नियतं जिनकीर्ति-साधुमूर्त्ते ! ॥ ९

## ॥ श्रीजिनेन्द्रमतैकान्तसेवाफलवर्णनो नाम द्वाविंशः स्तवः ॥

सद्ध्याननालप्रसरेण मुक्तं
कर्मैकपङ्कं जडभावसङ्गम् ।
हि वा स्फुटं केवलकेसराढ्यं,
हंसेन भुक्तं भवताऽऽत्मपद्मम् ॥ १

भक्तिं विना न भुक्तिस्त्वत् तामृते त्वां कथं परे ।
स्तुवन्ति यद्विना भुक्तिं मुरजोऽपि न गुञ्जति ॥ २

तवाज्ञामनुतिष्ठन्तः शिष्टाः कर्मोपशान्तये ।
ईशते रोगनाशाय वैद्याज्ञामिव रोगिणः ॥ ३

न प्रहर्त्तुं न वा बद्धुं मोहस्तेनः स केनचित् ।
स्वप्नचौर इवाशाकि त्वां विनान्तर्धनापहृत् ॥ ४

मोहाल्लोष्ठाहतः सिंह इव ज्ञात्वा पराभवम् ।
तं छेत्तुं द्विगुणोत्साह-स्त्वयीशे यतते कृती ॥ ५

विषमेषुं स्वबाणेन घ्नन्तं हन्त्येकमानसः ।
भवद्गोजालगो धन्यः शरस्पृष्टवराहवत् ॥ ६

भवत्तपोऽग्निसम्बद्धो निर्मांसरुधिरोऽप्यहो ।
चर्मभस्त्रोपमानोऽङ्गी सत्क्रियः कर्मदाहकृत् ॥ ७

तपो विनाऽपि सिद्ध्यन्ति केऽपि तेऽत्यन्तभक्तितः ।
स्वामिनी मरुदेवीव यद्वा चन्द्रावतंसकः ॥ ८

मोहे व्याधाविवासाध्ये सिद्ध्येन्नैव प्रतिक्रिया ।
तावद्यावन्न ते स्वामिँ-ल्लाभो धन्वन्तरेरिव ॥ ९

ददासि केवलज्ञानं त्वमाराधकदेहिनाम् ।
न्यासार्पितमिव द्युम्नं स्वं जीवितमिवाशु वा ॥ १०

स प्रमोदः कदा भावी मम त्वद्दर्शने प्रभो ! ।
यदग्रतस्तृणं मेरुः समुद्रोऽपि च गोष्पदम् ॥ ११

इति ते जिन ! कीर्तिचारुमुक्ता-वलिरेकापिजगत्त्रयाङ्गभाजाम् ।
प्रत्येकममन्दकण्ठपीठे सुषमैषा कुरुते तदत्र चित्रम् ॥ १२

**॥ श्रीजिनेन्द्रपर्युपास्तिफलातिशयवर्णनो नाम त्रयोविंशः स्तवः ॥**

आत्मा लसत्कर्ममलाविलाङ्गः
सुध्यानशुद्धोदकमध्यधौतः ।
सत्केवलौज्ज्वल्यधरो विभूषां
सदंशुकश्रीस्तव किं न दत्ते ? ॥ १

कल्पद्रुमः प्रापि मयाऽद्य सद्य-
श्चिन्तामणिः कामघटादयश्च ।
पचेलिमप्राक्तनपुण्यलभ्यः
प्रभो ! यतो मे नयनाध्वगोऽसि ॥ २

कुर्यात्तवाराधनसम्प्रयोगे-
नैवाऽन्यभावं क्वचनाऽपि धन्यः ।
विलुम्पते तस्य फलं किलाऽसौ
सत्काञ्चनं ध्मातमिवाऽऽस्यवातः ॥ ३

कर्मावलीकर्दमिलस्य निर्मली-
भावं सृजन् संवरसङ्गमेन मे ।
जगत्त्रयीलोचनलोभनो भवान-
तीतलोभोऽपि विभोऽस्तु मुक्तये ॥ ४

पूर्णेन्दुवक्त्रः स्मितपद्मनेत्रः, पीयूषवर्षी वचसा दृशा च ।
जीवातुरेवासि समग्रजन्तु-जाते हितं धर्ममुदाहरँस्त्वम् ॥ ५

सुभगत्वलसत्सुधाम्बुधौ वदने भ्रूशितिपद्धती न ते ।
तरणीयितलोचनोपरि स्फुरतोऽमू किमहो ! पताकिके ॥ ६

सतृषी इव चक्षुषी सतां त्वयि सौभाग्यसुधाह्रदे स्थिते ।
विरतिं श्रयतो न जात्वहो कथमीशासि जगत्तृषापहः ? ॥ ७

त्वयि पुण्यसुधाम्बुधौ सनामीनामासय दीयमानसम् ।
पुरुषोत्तमताजुषोऽस्य वै शिवलक्ष्मीः कुरुते करग्रहम् ॥ ८

विदुषां भुवि दौःस्थ्यमीयुषां विभवाय त्वदुपास्तिरेव सा ।
भुवने वसतिस्त्वमेव यत्कमलायाः कमलं तु रूढतः ॥ ९

अधुना भुवनत्रयेशता समजनि मे भजनेन ते जिन ! ।
क्वचिदप्यफलेग्रहिर्नहि स्यान्महतः समुपास्तिराश्रिते ॥ १०

भवतो जिन ! कीर्तिगीतयस्तन्यन्ते भवकाननान्तरे ।
निजरङ्गभरेण यैर्बुधैः श्रयते मुक्तिरियं मृगीव तान् ॥ ११

**॥ श्रीजिनेन्द्रवागतिशयवर्णनो नाम चतुर्विंशः स्तवः ॥**

स्वान्यप्रकाशस्तव घातिकर्म-ध्वान्तव्रजध्वंसनबद्धकक्षः ।
मोहोच्चयं स्नेहमयं निपीयाऽप्यनश्वरः केवलनव्यदीपः ॥ १

तरुः फलानां जलधिर्जलानां
चन्द्रः कलानां च हरिर्बलानाम् ।
गिरिर्मणीनां तरणिर्घृणीनां
यथा तथा त्वं निलयो गुणानाम् ॥ २

पवित्रयन्तीव सुधारसैक-
श्रोतांसि ते चारुवचांसि भक्तान् ।
गङ्गापयांसीव नु ते यशांसि
स्पर्द्धादिव त्रीणि जगन्त्यपीश ! ॥ ३

अवन्ध्यबीजं ध्रुवमुक्तिशर्मणां
पदं विदम्भोजदृशः सुनर्मणाम् ।
निर्वापणं तापनकर्मघर्मणां
स्तुवे वचस्ते प्रथनं सुधर्मणाम् ॥ ४

विनोदनं योगनियोगिचेतसां
विभेदनं खेदनिबन्धनैनसाम् ।
विशोधनं संशयराशिवर्चसां
वचस्तव स्तौमि धनं सुमेधसाम् ॥ ५

उद्वेलनं सम्मदसागराम्भसां
विलोपनं संयतसंयमागसाम् ।
प्रदीपनं दुष्कृतसञ्चयैधसां
स्तुवे वचस्तेऽन्तकृदन्यतेजसाम् ॥ ६

असौ लसत्सौधरसैकवापी-
त्याशङ्कते नो भुवि यः स पापी ।
उत्कर्णमाकर्ण्य तवेश ! वाणी-
मेव सकर्णा हृदि निर्णयन्ति ॥ ७

त्वदीयदीव्यद्वचनप्रपञ्चः
सुचेतसा येन धृतो हितार्थः ।
स कल्पवृक्षः फलितो ह्यनल्प-
जातः शुभस्तस्य च कामकुम्भः ॥ ८

महोदधिं त्वां परमेन्दिरास्फुरत्-
सरस्वतीसङ्गमतीर्थमद्भुतम् ।
संसेव्य सार्वं स्वमहोदयेच्छया
भवत्यजस्रं पुरुषोत्तमो न कः ? ॥ ९

वचस्तटाके प्रशमाम्बुपूर्णे
नालीकसम्पर्किणि तेऽपतर्षाः ।
गतप्रमीलाः सुमनोमरालाः
खेलन्त्यतुल्याः कमलाङ्कपाल्याः ॥ १०

कोमलैरपि भवद्वचनौघैः
संशयावलीरभेद्यतरापि ।

भिद्यते त्रिजगतो न किमाशु
क्ष्माधरालिरिव सिन्धुपयोभिः ॥ ११

तव चारुवचःसुधामुधाकृ-
न्नवरसबन्धुरमाधुरीधुरीणम् ।
नयति जनमनो लसन्मनोभू-
विषधरविषमविषं समस्तमस्तम् ॥ १२

इति ते जिन ! कीर्तियानपात्रं
गुणसन्धा अधिरुह्य विश्ववार्द्धौ ।
प्रति सज्जनमन्दिरं गतास्ते
महिमार्थव्रजमर्जयन्ति नित्यम् ॥ १३

इति श्रीजिनपचतुर्विंशतिविततिः साहित्यशर्कराह्वाना ।
येनास्वादि न स कथं स्वमनस्तापं समापयति ? ॥ १

श्रीमज्जिनकीर्तिगुरुक्रमकमलमरालतां मुदा कलयन् ।
स्तुतिविततिचतुर्विंशति-परागवान् नेमिरत्नगणिः ॥ २

इति श्रीतपागच्छाधिराजसुविहितचक्रचूडामणि-सुरश्रेणिपुरन्दर-श्रीसोमसुन्दरसूरिशिष्यपूज्यश्रीजिनकीर्तिसूरिविनेयाणुना पं. नेमिरत्नगणिना विनिर्मितायां स्तोत्रावल्यां श्रीजिनवर-लघुस्तवा-धिकारे साहित्यशर्कराभिधा तृतीयचतुर्विंशतिका समाप्ता

## १४. ॥ श्री जिनेन्द्रसेवाभीष्टफलाविसंवादवर्णनो नाम प्रथमः स्तवः ॥

स्फुरत्तपःपावकयोगतप्तः, सदोल्लसत्कर्ममृदो वियुक्तः ।
भवान् शुभध्यानरसैकरूपो, निस्तुल्यकल्याणमयोऽजनिष्ट ॥१

पुरो मोहाकुलस्येव निष्फलास्ते गुणस्तवाः ।
कटाक्षाः किं हि वामाक्ष्या वेधकाः क्षीणचक्षुषः ? ॥ २

दुःखानामिव संव्यानं प्रतिमानमिवाम्बुधेः ।
सौख्याद्वैतमिवानन्दं धन्य एवैति ते स्तवात् ॥ ३

भवं तीर्त्वाऽश्नुते स्थानं त्वन्मना जनता शिवम् ।
सद्ध्यानयोः प्रयोगेण दण्डयोरिव नौर्जलम् ॥ ४

हस्ताभ्यां चाल्यमानाभ्यां कृतिना तेऽञ्जलिक्षणे ।
सत्कर्म जन्यते व्योम्नि पक्षाभ्यामिव पक्षिणा ॥ ५

त्वदवाप्तफलाः पापा नाद्रियन्ते पुनस्त्वयि ।
यथाऽत्र केचिदाम्रेऽपि गृहीतफलसञ्चये ॥ ६

यत्प्रमादेन ते धर्ममुपेक्ष्यान्ते तदुद्यमः ।
लग्ने प्रदीपने नूनं तत्कूपखननोपमम् ॥ ७

ये प्रमादं परित्यज्य भजन्त्याजन्म ते मतम् ।
अस्फुटिते तटाके हि बद्धा तैः पालिरुत्तमा ॥ ८

अजरामरताकामी कामीव चरणश्रियाम् ।
रमते तव सेवार्थी व्यर्थीभूतान्तरायकः ॥ ९

कल्याणिनेय ! कल्याणं गृहिणां चानगारिणाम् ।
विश्राणय क्षणाद्येन द्विधा सिध्येन् महोदयः ॥ १०

व्योम्नीव ते श्रीजिन ! कीर्तिराजी, तवांह्रिराजीव इव ध्रुवश्रीः ।
नाम्नीव ते बन्धुरसर्वसिद्धिश्चित्ते तथा मे तव भक्तिरास्ताम्॥११

## ॥ श्रीजिनेन्द्रभक्तैकान्तवात्सल्यातिशयवर्णनो नाम द्वितीयः स्तवः ॥

प्रभुज्य चारित्रलसन्मनोभू-
दयेन कर्मस्थितिपङ्कजाक्षीम् ।
सद्ध्यानवीर्योद्भवजातगर्भान्
मुक्तः सुतस्तेऽजनि केवलात्मा ॥ १

त्वया हृद्यधिरूढेन कदाऽहमकदाग्रहः ।
भावी सशालभञ्जीक-स्तम्भशोभी पुरस्तव ॥ २

स्तम्भिताङ्गः क्षणं धन्यो दृष्टया तावकश्रिया ।
भवेत्पुमानिव ग्राम्यः प्रौढनागरसम्पदा ॥ ३

अम्भोभृता इवाम्भोदाः फलिता इव पादपाः ।
उन्नता अपि नम्राः स्यु-स्त्वां प्रत्यानन्दपूरिताः ॥ ४

भक्त्योल्लसँस्तव स्तोत्रं लल्लमन्मनया गिरा ।
विज्ञोऽप्यज्ञस्य को नैव शिशोरप्याश्रयेच्छ्रियम् ? ॥ ५

यस्य गीस्ते स्तवं सूते रत्नं रोहणभूरिव ।
वल्लीव द्रुममालम्ब्य श्रेयःश्रीः स्फातिमेति तम् ॥ ६

शमेनैव न शाम्यन्ति कर्माणि त्वन्मतं विना ।
तैलदाहो जलेनात्र यथा मुक्त्वा तुषोदकम् ॥ ७

स्वकीयं महिमानं तं त्वं सङ्क्रमयसे निजे ।
सेवके गुणजल्पाके तेजोऽर्क इव पावके ॥ ८

स्यादानन्दः सदानन्द ! दानादिव सदा तव ।
प्रीतिः सङ्क्रामति ह्याप्ते प्रतिच्छायेव दर्पणे ॥ ९

भृगुपातेन शस्त्रेण सलिलेनानलेन वा ।
मिथ्यादृग् म्रियते दुःखे त्वामेव त्वाश्रयेत् सुदृक् ॥ १०

विवेकी शयने याने भोजनेऽपि न मुञ्चति ।
भवद्भक्तिं हृदः पाणे-र्मङ्गल्यामिव मुद्रिकाम् ॥ ११

भवाधीने विनाशेऽपि भवी स्यादविनश्वरः ।
तवोपास्त्यैव तद्युक्तं यतस्त्वत्तोऽपुनर्भवः ॥ १२

तवैव मूर्तिर्भुवि हर्षवर्षिणी,
त्वन्मूर्तिवत् श्रीजिनकीर्तिरद्भुता ।
त्वत्कीर्तिवद्व्याप्तजगद्गुणावली,
गुणावलीवच्छुचिरस्तु मे रुचिः ॥ १३

## ॥ श्री जिनेन्द्रैकान्तभक्तिफलातिशयवर्णनो नाम तृतीयः स्तवः ॥

क्षुण्णस्तपोभिश्चरणाम्बरेण,
पूतः पृथक्कर्मतुषस्तवात्मा ।
सत्केवलश्रीसमितैकरूपः,
प्राज्यः सिताप्तः परमोदकोऽभूत् ॥ १

प्रमादिजनसंसर्गा-द्विमुक्तः स्यां तथा कुरु ।
वंशालीबद्धवंशो हि क्रियते दुष्करं बहिः ॥ २

धन्ये त्वद्भक्तिमच्चित्तं वचोऽङ्गं वा शुभश्रिये ।
क्षेत्रे पित्रे हि भूबीजं वृद्धि ह्येति न चापरम् ॥ ३

ते दुःस्था अपि जीवन्त-स्त्वद्भक्तौ ये सचेतनाः ।
ये त्वद्भक्तिबहिर्भूता चित्ते सत्यपि ते मृताः ॥ ४

त्वामधीशं विना मूढै-र्नाना प्रकटिताः कलाः ।
हास्यायैव भवन्त्यत्र काणदृग्भङ्गयो तथा ॥ ५

त्वद्वियुक्तौ परासक्त्या न मुक्तिः कर्मतो नृणाम् ।
मत्तेभान्नेशुषां पुंसां करे क्षैरण्डसंश्रयात् ॥ ६

जडाश्रित्योन्नतौ श्रीर्या त्वयीशे मे तयाप्यलम् ।
यन्मुहुर्मज्जनं कूपे घटीनां स्यात्तथा सति ॥ ७

हर्षप्रकर्षपल्यङ्क-मारूढाः स्तुतिसम्पदः ।
विश्रान्तास्त्वयि यस्येश ! प्रशस्येष्वादिमो हि सः ॥ ८

प्रणम्रानेकभूपाल-मौलिमालार्चितक्रमः ।
मनस्याप्तोऽसि मेऽद्य त्वं मूर्तो धर्म इव स्वयम् ॥ ९

विज्ञानदर्शनादर्श-सङ्क्रान्तभुवनत्रयः ।
त्वं सङ्क्रामसि यस्यान्तः-करणे करणिः स ते ॥ १०

आनम्रकम्रसुरसुन्दरवृन्दहार्द-
भक्तीन्दिरारुचिरमन्दिरपादपद्मः ।
त्वं सच्छरण्य ! करुणामृतसारणिर्मे
देया महोदयपदं जिनकीर्तिताभम् ॥ ११

## ॥ श्री जिनेन्द्रविज्ञप्तिपूर्वप्रार्थना प्रस्तवना नाम चतुर्थः स्तवः ॥

कर्मालिपङ्काष्टकलेपमग्नः, सुसंवरौघप्रसरेण धौतः ।
तुम्बः स्वरूपस्तव केवलात्मा, तीर्णो भवाब्धेः परतारकश्च ॥१

पथा यथा गतेनैव सत्यं व्याघुटति स्फुटम् ।
द्वेषस्त्वद्वचसा रुद्धः सेतुनेव जलप्लवः ॥ २

सतामन्तर्मनोद्वेषः प्रविष्टोऽप्यापुषा त्वया ।
प्रविशन्नप्यसौ सर्प इव निर्वास्यते बहिः ॥ ३

भवत्सरस्वतीपूरे पात्यपि द्वेषपावकः ।
आगच्छत्युपमच्चित्तं मध्येऽम्भोधीव वाडवः ॥ ४

प्रमादोर्वीभुजा त्वत्तो विमोच्य व्यथितो मुहुः ।
अज्ञोऽहं वधबन्धाद्यै-र्वनानीत इव द्विपः ॥ ५

मच्चित्तोत्पन्नयोर्नेत-स्त्वयि भावप्रमादयोः ।
अन्तरं क्षीरसिन्धूत्थ-पीयूषविषयोरिव ॥ ६

तव सेवापरं स्वामिन् ! बाधन्ते मान्तरारयः ।
स किं प्रभुः समृद्धो यो वैधुर्ये न धरेन्निजम् ? ॥ ७

यात्यायाति भवद्भावेऽभवन् मे दुर्दशा मुहुः ।
तमस्विनीव तिग्मांशा-वुदीयाऽस्तमुपेयुषि ॥ ८

कार्यं त्वया मुहुः शं मे कृतघ्नस्य प्रमादिनः ।
परेषामुपकारे हि नोद्विजन्ते महाशयाः ॥ ९

परिणामहितं तत्स्यात् यन्मतं ते प्रमाद्यपि ।
प्रसह्य ग्राह्यते दक्षै-र्वाजीवाज्यगुडव्रजम् ॥ १०

त्वत्तो मे निर्मलस्यापि जहि मोहं मलावहम् ।
किमु कज्जलयोगेन हीयते नावदातता ? ॥ ११

ईयतापि न मे न्यूनं प्रसन्नेन त्वया प्रभो ! ।
विभूष्योऽहं विवेकेन सुवर्णं मणिना यथा ॥ १२

जयति श्रीजिन ! कीर्तिस्तव नवकर्पूरपूरचूरनिभा ।
जगतीकृतीहितार्था-मितदानानल्पकल्पलता ॥ १३

## ॥ श्रीजिनेन्द्रानन्यसमसेवाफलप्रस्तवनो नाम पञ्चमः स्तवः ॥

चारित्रसद्ध्यानबलप्रयुक्त्या, प्रभूतकर्मारणिदारुघर्षात् ।
तव प्रसूतोऽतुलकेवलात्मा-ऽनलो नवीनः स्वपरप्रकाशी ॥१

दर्शनं तव सङ्केत-निकेतः सकलश्रियाम् ।
विस्फुरद्गुणरत्नाना-माकरः शमसागरः ॥ २

भूयादजननिस्तस्य मुधाम्बायौवनच्छिदः ।
नमस्यति न यः प्रातः स्वामिंस्ते चरणाम्बुजम् ॥ ३

कैरवाणि च पद्मानि स्मेराणि भुवि नो परम् ।
किन्तु तेषां वयस्यानि त्वत्पुरः सन्मुखान्यपि ॥ ४

प्राप्य त्वां सङ्गनिर्मुक्तो नीचवंश्योऽपि शुद्ध्यति ।
कमलं पङ्कजन्मापि नैर्मल्यं किमु नाश्रयेत् ? ॥ ५

मूर्त्तिं ते प्राप्य मे प्रीता भवार्त्ता हृदयस्थली ।
यथा तपर्त्तुसन्तप्ता-वनी कादम्बिनीं नवाम् ॥ ६

विश्वे तवाज्ञया प्रौढि-शालिनोऽन्यमते क्वचित् ।
न रङ्गः स्याद् गजस्येव लुठनं पांसुलावनौ ॥ ७

हिते तव मते कोऽपि विषयासक्तमानसः ।
न भजेद् घनकर्माङ्गी रतिं रोर इवामवान् ॥ ८

देहिवृन्देहितां देहि मुक्तिदां मे मतिं प्रभो ! ।
बुद्ध्यैव हि बलासाध्यं साध्यं निर्मान्ति धीधनाः ॥ ९

तवाऽशेषसुखं दातु-र्विशुद्धं सेवनं विना ।
नैव स्वमनृणीकर्त्तु-मलङ्कर्मीणता सताम् ॥ १०

एवं सदा ते जिन ! कीर्तिनट्या, जगत्त्रयीरङ्गभुवि स्फुरन्त्या ।
नाट्यं नटन्त्या सुमनोजनानां,
मनो हरन्त्याऽजनि नाद्भुतं किम् ? ॥ ११

**॥ श्रीजिनेन्द्रैकताननताप्रस्तवनो नाम षष्ठः स्तवः ॥**

ध्यानसत्कतकचूर्णयोगतः, प्रोल्लसद्विमलकेवलामृतः ।
देशनैकरसदानतोऽङ्गिनां,
त्वं तृषापनयनः (ने) क्षमो ध्रुवम् ॥ १

सतां मानसिकोल्लास-स्मेररोमाञ्चकञ्चुका ।
त्वत्तोऽतिस्फायते मूर्ति-र्वसन्तादिव वल्लरी ॥ २

विषयेष्वेव मच्चित्तं रंरमीति न च त्वयि ।
यन्त्रेऽपि बहुशः क्षिप्तं श्वपुच्छं न ऋजूभवेत् ॥ ३

भव्यस्त्वत्तः सुशब्दोऽत्र प्रभो ! सहजनिर्मलः ।
शुभः शङ्खायते चित्र-मन्तः कुटिलतोज्झितः ॥ ४

तव गीर्नव्यपीयूष-मधुरत्वमवापुषी ।
रेजुषी मोहभूपस्या-खर्वगर्वमपासुषी ॥ ५

विराद्धोऽपि मया मोहाद् दुःखितं तेन पाहि माम् ।
यतश्चन्दनवत्सन्तो-ऽपकारेप्युपकारिणः ॥ ६

सम्बध्यप्यशुभो मोह-स्त्वया मत्तो वियोज्यताम् ।
दूरमेवापसार्यो हि मलवन् मलिनात्मकः ॥ ७

देवत्वं वीतरागाप्ते गुरुत्वं चारुचित्क्रिये ।
धर्मो दयागुणे चेति ख्यातिगीस्ते न चान्यगीः ॥ ८

त्वामाप्तमपि मुक्त्वा येऽनाप्तासक्ता न तेऽनघाः ।
भविष्यदापदामेवा-पथ्यं यत्स्वदतेऽधिकम् ॥ ९

कामितान्यमितानि स्युस्तेषां यद्व्यानसङ्गतम् ।
मानसं त्वमलङ्कुर्याः कल्पशाखीव नन्दनम् ॥ १०

भवतः स्तवदीप्रदीपकस्तमसां स्तोममपास्य सर्वतः ।
जिनकीर्तितकेवलप्रभां प्रथतां मे हृदयालये सदा ॥ ११

## ॥ श्रीजिनेन्द्ररूपादिगुणप्रकर्षप्रस्तवनो नाम सप्तमः स्तवः ॥

ध्यानदैवतवरप्रसादतः, कर्मकूपपतितं मनोहरम् ।
केवलामृतभृतं शुभान्वितं,
स्वात्मकामघटमापिवान् भवान् ॥ १

छत्रत्रयेण पर्वेन्दु-गर्वसर्वङ्कषश्रिया ।
भवान् मूर्तिमता कीर्ति-स्तोमेनेव विराजते ॥ २

तव पर्षद्ध्रुवं दृष्टवा पुष्पप्रकरदन्तुराम् ।
नगरर्द्धिमिव ग्राम्याः स्तम्भिताङ्गा न के जनाः ? ॥ ३

धूपधूमोच्चयैर्मेघा-डम्बरश्रीविडम्बिभिः ।
त्वामाराध्यति यो धन्यमीडते तं बिडौजसः ॥ ४

तव रूपं निरूप्यैवा-ऽऽनन्दनिःस्यन्दलोचनाः ।
धन्या ध्यानैकतानाः स्यु-रालेख्यलिखिता इव ॥ ५

योगीवैकमना भूत्वा भोगीव शिवकामुकः ।
रोगीव भुक्त्यनाकाङ्क्षी त्वयि ध्यानी स जायते ॥ ६

त्वदीयाज्ञाङ्गनाकेलि-रङ्गचङ्गितचेतसा ।
कृतिनैव सदानन्दः प्राप्यते मोक्षनन्दनः ॥ ७

पापेऽप्यल्पं सुखं यत्तत् त्वदाज्ञांशेन जन्यते ।
प्रकाश इव दीपेन विभावर्या यास्तमो भरे ॥ ८

तवाचीर्णानुषङ्गेण सतां धत्तेऽघमल्पताम् ।
संश्लेषेण प्रदोषस्य सङ्कोचमिव पङ्कजम् ॥ ९

हर्षोत्कर्षवशोत्फुल्ल-गल्लीभूतविलोकिभिः ।
गुणाः पथि गिरां पान्थी-कृतास्ते पुरतो न कैः ? ॥ १०

जगतीवरकन्दरान्तरे, जिन ! कीर्तिव्रजकेसरी तव ।
जनतादुरितौघदन्तिनां, रचयन्नाशमतीव गर्जति ॥ ११

## ॥ श्रीजिनेन्द्रतपःप्राधान्यातिशयप्रस्तवनो नाम अष्टमः स्तवः ॥

स्फुरत्कर्मरात्रौ लसन्मोहराहू-
परागाच्छुभध्यानचारेण मुक्तः ।
सदा केवलश्रीयुतः क्षीणविघ्न-
स्तवात्मासुधांशुर्नवस्त्यक्तदोषः ॥ १

अर्कादिप्रीतये किं मे तपसा संश्रिते त्वयि ।
पात्रमेवात्र भुङ्क्तेऽन्नं यदि भोक्तुस्तदेश ! किम् ? ॥ २

घूकोऽर्कस्येव ते तेजो द्रष्टुमप्यक्षमोऽत्र यः ।
वल्गुल्येव तपस्तेना-धोमुखेनार्जताऽपि किम् ? ॥ ३

उदितेनापि नो राज-यक्ष्मणेव तपोवपुः ।
कोपेन क्षीयते नृणां त्वद्गीःपीयूषसेकतः ॥ ४

दूरीभावात्तवेनस्य तपःश्रीः क्षीयते नृणाम् ।
दोषोदये कषायाप्ता हिमालीढेव पद्मिनी ॥ ५

अनुच्छेद्या भवन्मुक्तैः सुधीभिर्विषयाशयाः ।
अदण्डमण्डितैर्वृक्षाः छिद्यन्ते पर्शुभिः किमु ? ॥ ६

निःसङ्गतैव मोक्षस्य मूलं युक्तं त्वयाऽकथि ।
येनोत्पाद्याऽनृतान् दोषान् धनी सर्वत्र बाध्यते ॥ ७

विना त्वत्तपसात्मा मे न त्यजेत् कर्मवक्रताम् ।
यन्नार्जवँ भजेच्चारु वक्रं दारु विनाग्निना ॥ ८

हैम न्तेन तुषारेण निदाघेनातपेन वा ।
क्लिश्यामि त्वन्मते मुक्त्यै निर्जलाम्बुजवत् कदा ॥ ९

साम्प्रतं त्वत्तपस्तापः कर्मतप्ताङ्गिनां श्रिये ।
अग्निरेवौषधं यस्मा-दग्निदग्धस्य देहिनः ॥ १०

दिष्ट्या तपोऽग्निना वह्नि-शौचांशुकमिव स्वकम् ।
कदा प्रक्षालयिष्यामि परिव्रज्य भवन्मते ॥ ११

अभव्यो दूरभव्यो वा भवी मिथ्यात्वतोऽपधीः ।
कथं त्वां प्राप्नुयादन्धः किमारोहति भूधरम् ? ॥ १२

शरणागताङ्गिनां यत्त्वं पालने वज्रपञ्जरः ।
तेनाऽहं तेऽवनीयोऽस्मि शक्या नीतिर्न लङ्घितुम् ॥ १३

येनारोपि हृदावापे तवाज्ञास्वर्लता निजे ।
तस्य पाणिगता एव स्वर्गादिफलसम्पदः ॥ १४

श्रियं वहन्ती सरसां सदोज्ज्वला,
किलाहरन्ती कलुषैकशैवलम् ।
मन्मानसाब्जे मुदिता मरालिका,
सुस्थायतां ते जिन ! कीर्तिमालिका ॥ १५

## ॥ श्रीजिनेन्द्रसौभाग्यादिमहिमातिशय-प्रस्तवनो नाम नवमः स्तवः ॥

शुद्धध्यानस्पर्शोपलेन दीव्यत्तपोऽग्निना तप्तः ।
सदयस्थितिरपि भास्वन्निर्मलकल्याणतां धत्से ॥ १

कल्पलतेवानल्पं वितरति जननीव पात्यधःपतनात् ।
चन्द्रस्येव तवेयं मूर्त्तिः कुमुदं विकाशयति ॥ २

सकलकलाकलितस्य त्वदाननस्याग्रतः कलाहीनः ।
मन्ये कलयत्येकां पलायनकलां कलाभृदपि ॥ ३

जनलोचनवनसिञ्चन-सुधारसस्फारसारणीकरणिः ।
दृष्टिर्घटयति तव भवघटितोत्कटसङ्कटोपशमम् ॥ ४

आश्चर्यमाशु दृष्टाच्छ्रुताच्च ते प्रातिहार्यसौन्दर्यात् ।
सततमपि विश्वविश्वे रचयत्येकातपत्रत्वम् ॥ ५

जयसि प्रभूतभूतप्रेतपिशाचादिदर्पदलनचणः ।
विषयाभिलाषविषभृत्प्रचण्डगुरुवज्रतुण्डस्त्वम् ॥ ६

मुखमण्डनमिह विदुषां व्यावर्णनमेव तावकगुणानाम् ।
त्वन्नतिजरजस्तिलकः श्रीवश्यं नेमुषामलिके ॥ ७

भवतः प्रभावजलधौ कलधौतगिरिस्थकल्पतरवोऽपि ।
उपजीवितदानरसास्तट[टिनी]विटपि
वं[त्वं न]भजन्ते किम् ? ॥ ८

अरजसि तवात्मसरसि प्रोल्लासि प्रशमवारिघनपूरे ।
अनुवेलमलं खेलत्यतुल्यकैवल्यकलहंसः ॥ ९

गङ्गा विगलितरङ्गा गतमहिम हिमं समेदुरपि बिन्दुः ।
सारं न च घनसारं भुवि गौरे कीर्तिपूरे ते ॥ १०

भुवि ते जिन ! कीर्तिकीर्त्तनात्, प्रमदैराशु मनांसि मानवानाम् ।
निभृतानि लसन्ति वारिपूरैर्जलदासारभराद् यथा सरांसि ॥११

## ॥ श्रीजिनेन्द्रसौभाग्यादिगुणातिशयप्रस्तवनो नाम दशमः स्तवः ॥

समुद्रस्य ते संस्तवो वास्तवोऽसौ,
गरिष्ठो गुणैर्दक्षिणावर्त्तशङ्खः ।
लसद्भाग्ययोगेन मे चित्तगेहे,
विलासी किलाऽऽसीत्सहाऽसीमलक्ष्म्या ॥ १

पुष्पोत्कराः स्मेरतराः स्फुरन्ति,
व्यपाकृतार्त्तौ भवदीयमूर्त्तौ ।
प्रोल्लासिसौभाग्यपयः पयोधे-
रुच्चैस्तरङ्गा इव दत्तरङ्गाः ॥ २

दृष्टिः कृता सृष्टिकृता प्रभो ! ते
पीयूषयूषैरतुषैः किलैषा ।
तद्भेजुषां यद्विदुषां समेषां,
तापाद्यपाया विलयं श्रयन्ति ॥ ३

त्वां तीर्थमुख्यं श्रितयोर्विभातः,
सौभाग्यभाग्यैकतपस्विनोः किम् ।

पवित्रनेत्रामृतकुण्डभाजो-
रमू जटे भ्रूकपटेन नेतः ! ॥ ४

जयन्ति तेऽद्यापि वचोविलासा,
दीपा इव प्रत्ततमःप्रकाशाः ।
अमातमायामिव दुःषमायां
श्रीकेवलार्केऽस्तमितेऽपि लोके ॥ ५

सौभाग्यलक्ष्मीरनिभा सुपर्व-तर्वादितः सातिशयः प्रभावः ।
कृपापगाऽनारतमुत्तरङ्गा, विमुक्तसङ्गा च तवाङ्गमुद्रा ॥ ६

वाणीकृपाणी भववल्लिभेत्री,
छेत्री जगत्संशयवंशराशेः ।
नेत्रे च पात्रे प्रशमामृतस्य
किं किं जयत्यत्र न चित्रकृत्ते ? ॥ (यु.) ७

प्रशस्यसौभाग्यसरस्यनश्वरे,
प्रेङ्खन्मयूखामृतपूरपूरिते ।
पुनर्भवश्रीयुतमप्यहो ! भवत्-
पदाम्बुजं भात्यपुनर्भवप्रदम् ॥ ८

सदा नभोगा अपि भाक्तिकास्ते,
कुलीनतां जातु नहि त्यजन्ति ।
अणूपमामप्यनिशं क्षितिं च,
नैते श्रयन्तीत्यपि चित्रकृत्ते ॥ ९

नीलाङ्कुरैः क्षेत्रभुवः प्रदेशः
सुरैः सुरेशो नगरैश्च देशः ।

ऋद्धः सुभैः कल्पतरुर्यथा वा
तथा गुणैस्त्वं प्रगुणैः समृद्धः ॥ १०

एवं प्रोद्यदगण्यपुण्यवचनप्राज्यामृतासारतो,
निर्विघ्नं भवतोऽम्बुदादिव विभो ! श्रीपुष्करावर्त्ततः ।
शान्ते कर्मधरातिधर्मनिकरे स्तोत्रैकबीजं मम,
क्षेत्रे प्राग् जिनकीर्तितां प्रथयताच्छस्यश्रियं सिद्धिगाम् ॥ ११

# શાસ્ત્રસંદેશનું નવલું નજરાણું
# "પદ્યાનુક્રમણિકા સંપુટ"

- આ સંપુટમાં ચાર ભાગ છે.
- પ્રથમ ભાગમાં આગમના ૪૪ ગ્રંથો અને સંવેગરંગશાલાની પદ્યાનુક્રમણિકા છે.
- દ્વિતીય ભાગમાં પ્રાકૃતના ૩૭૩ ગ્રંથોની પદ્યાનુક્રમણિકા છે.
- તૃતીય ભાગમાં સંસ્કૃતના ૨૦૫ ગ્રંથો અને લોકપ્રકાશની પદ્યાનુક્રમણિકા છે.
- ચતુર્થભાગમાં ત્રિષષ્ટિશલાકાપુરુષચરિત્ર અને વૈરાગ્યકલ્પલતા-રતિની પદ્યાનુક્રમણિકા છે.
- આ સંપુટમાં ૭ પરિશિષ્ટો છે.
- આ સંપુટમાં ટોટલ ૬૨૬ ગ્રંથોનો સમાવેશ કરેલ છે.
- આ સંપુટમાં ટોટલ ૧,૭૭,૦૦૦ શ્લોકનો સમાવેશ કરેલ છે.
- આ સંપુટના ટોટલ ૧૫૭૦ પેજ છે.
- આ સંપુટની કિંમત ૧૮૦૦/-રૂપિયા છે.

# পরিশিষ্ট

## સ્તોત્રસંદેશમાલાના ૨૦ ભાગમાં આવેલા છંદોની યાદી

| | | |
|---|---|---|
| अचलधृति | आर्यागीति | औपच्छन्दसिक |
| अतिधृति | आलिंगनक | |
| अतिशर्करी | | कन्या |
| अतिशायिनी | इन्द्रवंशा | कामक्रीडा |
| अतिरुचिरा | इन्द्रवज्रा | कामबाण |
| अनङ्गशेखर | | किसलयमाला |
| अनुष्टुप् | उज्जवल | कुटज |
| अपरनाराचक | उत्कलिका | कुटील |
| अपरललितक | उदयम् | कुसुमलता |
| अपरवक्र | उद्गता | कुसुमविचित्रा |
| अपराजिता | उद्धत | कुसुमितलता |
| अपरान्तिका | उपचित्रा | कुसुमितलतावेल्लिता |
| अभिमुखी | उपजाति | केकीरव |
| अवितथ | उपेन्द्रवज्रा | केसर |
| अशोकपुष्पमञ्जरी | उर्वशी | क्रीडनक |
| अष्टि | ऋषभ | |
| असम्बाधा | ऋषभगजविलसित | क्षिप्तक |
| आख्यानकी | एकावली | खिञ्जित |
| आपातलिका | औपच्छन्दसका-परान्तिका | |
| आर्या | | |

गाहा
गीतपद्धति
गीति
गुणमणिनीकर

चन्दनप्रकृति
चन्द्रवर्त्म
चन्द्रलेखा
चन्द्रिणी
चपलम्
चम्पकमाला
चलधृति
चलम्
चित्रमाला
चित्रलेखा
चित्राक्षरा
चूडामणि

छाया

जगती
जया
जयानन्द
जलधरमाला
जलोद्धतगति

तामरस
तोटक
त्रिभङ्गी

दण्डक
(अर्णवदण्डक
उद्दामदण्डक
गगनदण्डक
चण्डवृष्टिदण्डक
प्रयातदण्डक
महादण्डक
सुरामदण्डक)
दयाविमल
दीपक
दोधक
दोहा
द्रुतविलम्बित
द्विपदी

धृति

नगस्वरूपिणी
नन्दितक
नन्दिनी
नर्कुटक
नवमालिनी
नाराचक
नारी
निशा

पङ्क्ति
पञ्चकावली
पञ्चचामर
पत्रपतितं
पथ्या
पथ्यावक्त्र
पद्म
पद्धतिका
पादाकुलक

पुष्पदाम
पुष्पिताग्रा
पृथ्वी
प्रकृति
प्रमिताक्षरा
प्रभावती
प्रबोधिता
प्रमाणिका
प्रमुदितवदना
प्रियंवदा
प्रहरणकलिका
प्रहर्षिणी

बृहती

भद्रक
भद्रिका
भाराक्रान्ता
भासुरक
भुजगशशभृता
भुजङ्गपरिरिङ्गितक
भुजङ्गविजृम्भित
भुजङ्गप्रयात

भ्रमरविलसिता

मञ्जुभाषिणी
मणिगुणनिकर
मणिमध्य
मत्तक्रीडा
मत्तमयुर
मत्ता
मत्तेभविक्रीडित
मदनावतार
मदिरा
मधुनामा
मधुमती
मन्दाक्रान्ता
ममातिशायिनी
महास्रग्धरा
मागधिका
माणवक
मालभारिणी
मालाचित्र
मालिनी
मुखमोटनक
मेघमाला

मेघविस्फूर्जिता
मोटनक
मौक्तिकदाम
मौक्तिकमाला
मृगचपला
मृगी
मृदका
मृदङ्गक

युगलम्
युग्मविपुला

रत्नमाला
रथोद्धता
रमणा
रासकनन्दितक
रासकलुब्धक
रुक्मवती
रुचिता
रुचिरा

लक्ष्मी
ललितक

ललिता

वंशपत्रप्रतितं
वंशस्थ
वक्त्र
वनमञ्जरी
वसन्तचामर
वसन्ततिलका
वस्तु
वस्तुवदन
वाणिनी
वानवासिका
विद्युद्विलसित
विद्युन्माला
विभावरी
विभ्रमगति
वियोगनी
विषम
वेगवती
वेष्टक
वैतालीय
वैश्वदेवी
वृन्दारक

श्री
श्लोको
शङ्ख
शरभललित
शर्करी
शशिलेखा
शशिवदना
शशीकला
शार्दूलविक्रीडित
शालिनी
शिखरिणी
शुद्धविराट्
शोभा
श्येनी

संगतक
सान्द्रपदं
सिंहोद्धता
सिद्धि
सुदन्त

सुधा
सुधाकळश
सुन्दरम्
सुप्रभा
सुभद्रामालिनी
सुमति
सुमुख
सुवदना
सोपानक
सोमराजी
सौभाग्यविमल
स्रग्धरा
स्रग्विणी
स्त्री
स्वागता

हंसमाला
हंसलयं
हंसी
हक्काषट्पदी
हरिगीत
हरिणी

# शास्त्रसंदेशना प्रकाशनो

१. पू.आ.श्री हरिभद्रसूरीश्वराणां कृतयः-१

२. पू.आ.श्री हरिभद्रसूरीश्वराणां कृतयः-२

३. पू.आ.श्री हरिभद्रसूरीश्वराणां कृतयः-३

४. पू.उपा.श्री यशोविजयगणिवराणां कृतयः-१

५. पू.उपा.श्री यशोविजयगणिवराणां कृतयः-२

६. शतकसंदोहः

७. कुलयसंग्गहो

८. भावणासत्थणिअरो

९. भावनाशास्त्रनिकरः

१०. आयारसत्थणिअरो

११. आचारशास्त्रनिकरः

१२. काव्योपदेश-ज्ञातोपदेशग्रन्थनिकरौ

१३. प्रारम्भिकाणि कार्मग्रन्थिकाणि
लोकप्रकाशीयानि च प्रकरणानि

१४. अन्तिमाराधनाग्रन्थाः

१५. आगमिकानि प्रकरणानि तथा प्रकीर्णकानि

१६. दार्शनिक-चर्चा ग्रन्थनिकरौः

१७. विविधविषयसंकलनाग्रन्थाः

१८. ध्यानयोग-गणित-व्याकरणशास्त्रनिकराः

१९. वैराग्य कल्पलता-१

२०. वैराग्य कल्पलता-२

२१. शतक - कुलक - भावना - चर्चाग्रन्थनिकरः

२२. आचार - प्रारम्भिक-नाममाला-
व्याकरणशास्त्रनिकरः

२३. कार्मग्रन्थिक-लोकप्रकाशीयग्रन्थनिकरः

२४. पू.आ.श्री हेमचन्द्रसूरीश्वरविरचितनाममाला

२५. आगमपद्यानाम् अकारादिक्रमेण अनुक्रमणिका-१

२६. प्राकृतपद्यानाम् अकारादिक्रमेण अनुक्रमणिका-२

२७. संस्कृतपद्यानाम् अकारादिक्रमेण अनुक्रमणिका-३

२८. त्रिषष्टिशलाकापुरुषचरित्र श्लोकानाम्
अकारादिक्रमेण अनुक्रमणिका-४

२९. संवेगरंगशाला

३०. शास्त्रसंदेशमाला-भाग-२५

३१. शास्त्रसंदेशमाला-भाग-२६

३२. स्तोत्र संदेशमाला–१
अर्हदादिसहस्रनामसमुच्चयः

३३. स्तोत्र संदेशमाला–२
अनेककर्तृकृतचतुर्विंशतयः

३४. स्तोत्र संदेशमाला–३
बहुकर्तृकृतानेकस्तोत्रसमुच्चयः

३५. स्तोत्र संदेशमाला–४
श्रीपंचपरमेश्वर–गणधराणां स्तोत्राणि

३६. स्तोत्र संदेशमाला–५
कल्याणक–छायापूर्तिस्तोत्राणि

३७. स्तोत्र संदेशमाला–६
चतुर्विंशतिजिनस्तोत्राणि

३८. स्तोत्र संदेशमाला–७
श्रीआदिनाथजिनस्तोत्राणि

३९. स्तोत्र संदेशमाला–८
श्रीनेमिनाथजिनस्तोत्राणि

४०. स्तोत्र संदेशमाला–९
श्रीपार्श्वनाथजिनस्तोत्राणि–१

४१. स्तोत्र संदेशमाला–१०
श्रीपार्श्वनाथजिनस्तोत्राणि–२

४२. स्तोत्र संदेशमाला-११
श्रीपार्श्वनाथजिनस्तोत्राणि-३

४३. स्तोत्र संदेशमाला-१२
श्रीमहावीरस्वामिजिनस्तोत्राणि

४४. स्तोत्र संदेशमाला-१३
शेष तीर्थंकरजिनस्तोत्राणि

४५. स्तोत्र संदेशमाला-१४
सामान्यजिनस्तोत्राणि

४६. स्तोत्र संदेशमाला-१५
पञ्चपरमेष्ठि-सिद्धचक्राणांस्तोत्राणि

४७. स्तोत्र संदेशमाला-१६
शाश्वताशाश्वततीर्थानांस्तोत्राणि

४८. स्तोत्र संदेशमाला-१७
सम्यग्दृष्टिदेव-देवीनां स्तोत्राणि

४९. स्तोत्र संदेशमाला-१८
पू.आचार्यादियोग्यमन्त्रस्तोत्राणि

५०. स्तोत्र संदेशमाला-१९
स्तुतयः-१

५१. स्तोत्र संदेशमाला-२०
स्तुतयः-२

# स्तोत्रसंदेशमाला

१ अर्हदादिसहस्रनामसमुच्चयः
२ अनेककर्तृकृतचतुर्विंशतय
३ बहुकर्तृकृतानेकस्तोत्रसमुच्चयः
४ श्रीपञ्चजिनेश्वर–गणधराणां स्तोत्राणि
५ कल्याणक–छायापूर्तिस्तोत्राणि
६ चतुर्विंशतिजिनस्तोत्राणि
७ श्रीआदिनाथजिनस्तोत्राणि
८ श्रीनेमिनाथजिनस्तोत्राणि
९ श्रीपार्श्वनाथजिनस्तोत्राणि –१
१० श्रीपार्श्वनाथजिनस्तोत्राणि –२
११ श्रीपार्श्वनाथजिनस्तोत्राणि –३
१२ श्रीमहावीरस्वामिजिनस्तोत्राणि
१३ शेषतीर्थंकरजिनस्तोत्राणि
१४ सामान्यजिनस्तोत्राणि
१५ पञ्चपरमेष्ठिसिध्दचक्राणां स्तोत्राणि
१६ शाश्वताशाश्वततीर्थानां स्तोत्राणि
१७ सम्यग्दृष्टिदेव–देवीनां स्तोत्राणि
१८ पू.आचार्यादियोग्यमन्त्रस्तोत्राणि
१९ स्तुतयः १
२० स्तुतयः २